MADRAS UNIVERSITY SANSKRIT SERIES No 7.

THE UNĀDISŪTRAS IN VARIOUS RECENSIONS

PART VI

THE UṆĀDISŪTRAS OF BHOJA WITH THE VṚTTI OF DAṆḌANĀTHA NĀRĀYAṆA

AND

THE UṆADISUTRAS OF THE KĀTANTRA SCHOOL WITH THE VṚTTI OF DURGASIMHA

EDITED BY

T R CHINTAMANI, M A, PH D

SENIOR LECTURER IN SANSKRIT UNIVERSITY OF MADRAS



UNIVERSITY OF MADRAS

1934

PRICE RS. 3] [FOREIGN 6 S.

PRINTED AT THE
HINDI PRACHAR PRESS,
TRIPLICANE, MADRAS

मद्रपुरीयविश्वविद्यालयसंस्कृतग्रन्थावलिः

ग्रन्थाङ्कः ७.

उणादिसूत्राणि भोजीयानि

दण्डनाथनारायणविरचितवृत्तियुतानि

कातन्त्रोणादिसूत्राणि

दुर्गसिंहविरचितवृत्तियुतानि

च

षष्ठो भागः

ति. रा. चिन्तामणिना

संपादितानि

मद्रपुरीयविश्वविद्यालयः

१९३४

FOREWORD

The sixth part of the Madras University Sanskrit Series, No 7, contains two sets of Unādis, both distinct from the Unādis of the Pāninīyan system, as published in the first two parts of this number in the series. The first set is the Unādi contained in the Bhojavyākarana, along with the commentary of Dandanātha Nārāyana The second set is the Unādi according to the Kātantra, along with the commentary of Durgasimha

Nārāyanabhatta, whose commentary on the Pāninīyan Unādi was published as part II of the number in the series, has brought many of the Unādisūtras of Bhoja under the various Pāninīyan sūtras, while commenting on the latter, and as a supplement he has given all the Bhojasūtras which he could not bring under the Pāninīyan Sūtras (vide pp 142 to 149 in the second part of this number in the series), adding brief explanatory notes. In this number, the Bhojasūtras are given in their proper order and the commentary of Dandanātha is also given This is the first time that the Bhojavyākarana is being published.

The text of the Kātantra has been published in the Bibliotheca Indica Series, with extracts from some commentaries For the first time, the text of the Unādis belonging to this Vyākarana, with the commentary of Durgasimha, is now published Apart from giving a

correct version of the text and the commentary, there is much to be accomplished by way of settling the authorship and the interrelation of the various works constituting this school of Vyākarana

I regard it as a great privilege to be able to introduce these two important works to the world.

University of Madras,
5th April, 1934

C KUNHAN RAJA,
Reader in Sanskrit

TABLE OF CONTENTS

I

II

PREFACE

This edition of the Unādisūtras, which form part of the Sarasvatīkanthābharana of Bhoja, with the Vrtti of Daṇḍanātha Nārāyana is based on the following Mss

1. Text of the Sūtras of Bhoja—R. No 3279, Government Oriental Mss Library, Madras

2. The commentary of Dandanātha Nārāyana, R No 4179, Government Oriental Mss Library, Madras.

The ms containing the commentary of Daṇḍanātha contains the text also The differences in the reading of the sūtras as found in the mss. referred to above have not been set forth in this edition, as they have been noted in my edition of the text of the Sarasvatīkanthābharana, which will be issued shortly.

The editon of the Unādisūtras of the Kātantra School with the Vrtti of Durgasimha is based on a single palm leaf Ms deposited in the Government Oriental Mss Library, Madras The ms is pretty old and is in old Kannaḍa characters. Though the ms is well preserved, several letters have been eaten away by moths To add, the copyist has made several errors in copying It was extremely difficult to give a fairly accurate text with the scanty material on hand Much of the literature connected with the Kātantra School is in manuscript form, and necessarily therefore the works belonging to that school could only be sparingly utilized The excellent

edition of the Kātantra by Julius Eggeling was perhaps the only guide in several places. Labouring under difficulties of this kind it was possible to present only a tentative text.

My professors Mahāmahopādhyāya S. Kuppuswami Sastriar and Brahmaśrī S. K. Padmanabha Sastriar, with their usual kindness helped me in the solution of several knotty problems My colleagues Dr. C Kunhan Raja and Brahmaśrī S K Ramanatha Sastriar rendered valuable help in pushing this edition through. Brahmaśrī S. K. Ramanatha Sastriar read through the proofs in addition and I avail myself of this opportunity to express my grateful thanks to them.

I am indebted to the Curator, Government Oriental Mss Library, Madras and the Director, Adyar Library, Madras, for having very kindly allowed me the use of the mss. in their respective libraries. I thank the Hindi Prachar Press for having done the printing satisfactorily.

LIMBDI GARDENS,
MADRAS.
1st April, 1934

T. R. CHINTAMANI.

INTRODUCTION

I

The Sarasvatīkanthābharana, the grammatical work of Bhoja is mainly based on the Astādhyāyī of Pāṇini, the Vārtikas of Kātyāyana, the Unādisūtras and the Ganapātha To a large extent, the author Bhoja draws upon the Cāndrasūtras also. Pānini, Candra and other grammarians have devoted separate sections for the treatment of the Ganas, the Unādis etc. Bhoja differs from them in this, that he has included all of them in the body of the work and does not treat them separately.

The extent to which Bhoja is indebted to Pānini and Candra is indicated in the preface to my edition of the text of the Sarasvatīkanthābharana, now in the course of publication Suffice it to say here that Bhoja has succeeded, remarkably well, in presenting in a cogent from what is found distributed in different works, like the Aṣṭādhyāyī, Vārtika, and Bhāsya

The name of this grammatical treatise was probably S'abdānuśāsana In the preface to his commentary on the Yogasūtras, Bhoja says :—

शब्दानामनुशासनं विदधता पातञ्जले कुर्वता

वृत्तिं राजमृगाङ्कसंज्ञकमपि व्यातन्वता वैद्यके ।

Some of the later writers refer to the grammatical work of Bhoja as Sabdānuśāsana But on the other hand we find in the ms of the text the name, Sarasvatīkanthābharana alone The latter name is some what interesting It was the name of the Parisad Hall of Bhoja[1], one of the cowherds[2] of Bhoja had that name, some the the panditas of his court had that name[3]. The rhetorical work of Bhoja, published in the Kāvyamālā series bears that name The grammar too bears that name in the ms The coincidence is not casual, but what is that due to cannot be said at present

A discussion on the date and works of Bhoja, though essential here, has not been made, as it has been done in the preface to the text of the Sarasvatīkanthābharana

Daṇḍanātha Nārāyana.

The commentator on the Sarasvatīkanthābharana goes by the name of Daṇḍanātha Nārāyana or commander Nārāyana. Whose Daṇḍanātha he was is not clear It is not unlikely that he was the Daṇḍanātha of Bhoja himself. All we know about the him is that he is older than the author of the Mādhavīya Dhātuvrtti. We find the latter extracting several passages from the work of Daṇḍanātha Nārāyana.

Attempts to settle the date and identity of this Nārāyana have not been successful, we come across several Daṇḍanāthas of this name One Daṇḍanātha Nārāyana was assisting the Devagiri King Singana about 1216 A D[4] Another Daṇḍanātha Nārāyana was the

1. Prabandhacintāmani, Twaney P. 56
2 Ibid P 66
3 Vāraruсakosa
4 See the ins of Singana in Gorantla of Krishnagiri Ṭaluka of the Kaṛnul District.

brother of Anantapāla of the Vanavāsi branch of Kadambas An inscription of the Cālukya Vikramāditya VI, dated in Cālukya Vikrama Samvat 24 found in Chikkanahadigol in the Gadag Tālūka of the Dharwad District mentions Anantapāla and his brother Nārāyana, two of the Danḍanāthas of the king [1] We know that Anantapāla was the Governor of Vanavāsi in the beginning of the 12th century.[2] Yet another Danḍanātha Nārāyana was the patron of Kavirāja Panḍita, the author of Pārijātaharanakāvya [3] The last mentioned Nārāyana lived about 1120 A. D in the Vanavāsi country and belonged to the Vanavāsi branch of the Kadambas. It is not unlikely that the Nārāyana of the Sarasvatīkanthābharanavyākhyā is identical with the patron of Kavirāja Panḍita.

II

The promulgator of the Kātantra system of grammar is known to all to be Sarvavarman. The reference in the Kathāsaritsāgara [4] to Sarvavarman and how he invented his new grammar is not unknown.

The sūtras composed by Sarvavarman for the benefit of his pupil Sātavāhana do not seem to have covered all the sections of Sanskrit grammar Durgasimha, the commentator says at the beginning of the Krtprakarana

वृक्षादिवदमी रूढाः कृतिना न कृताः कृतः ।
कात्यायनेन ते सृष्टा विबुद्धिप्रतिबुद्धये ॥

---

1 I am indebted to Dr N. Venkataramana Aiyah for this reference The inscription belongs to the latest collection of the Epigraphist Office and has not yet been even described

2 Fleet, Dynasties of the Kanarese Districts.

3 R. 2961. G. O. mss. Library, Madras.

4 Kathāsaritsāgara. I, vii, 4—13.

meaning thereby that Śarvavarman adopted *in toto* the sūtras of Kātyāyana on the Kṛts. The Uṇādisūtras (belonging to the kṛt section) of the Kātantra school were therefore not composed by Śarvavarman but by Kātyāyana alone. It was probably on the basis of this statement that Vimalasarasvatī attributes, in his Rūpamālā, the authorship of the Uṇādis to Vararuci[1].

About Durgasiṃha, the commentator on Śarvavarman much could hardly be said at present.

The quotations in the Vṛtti of Durgasiṃha have not been traced to their sources in separate index because almost all the citations are found in the text of Eggeling's edition of the Kātantra.

1. This of course presupposes the identity of Vararuci and Kātyāyana.

THE UṆĀDISŪTRAS OF BHOJA

WITH

THE VṚTTI OF DAṆḌANĀTHA NĀRĀYAṆA

॥ श्रीः ॥

महाराजाधिराजश्रीभोजविरचितम्

॥ सरस्वतीकण्ठाभरणम् ॥

श्रीदण्डनाथनारायणविरचितहृदयहारिणीसहितम्



॥ १ ॥ कृवापाजिमिस्वदिसाध्यशूभ्य उण् ॥ २. १. १ ॥

बहुल कर्तरि वर्तमाने सज्ञायाम् इति वर्तते। कृआदिभ्यः संज्ञायां कर्तरि बहुलमुण्प्रत्ययो भवति। कारुः शिल्पी ॥ वायुः पवन ॥ पायुः अपानम् ॥ जायुः औषधम् ॥ मायुः पित्तम् ॥ गोमायु सृगालः ॥ स्वादुः मधुरः ॥ साधुः श्रेयान् ॥ आशु शीघ्रम्। णकारो वृद्धयर्थ ॥

॥ २ ॥ दृस्नासनिजनिचटिचरिभ्यो ञुण् ॥ २. १. २ ॥

दृणात्यादिभ्य. ञुण्प्रत्ययो भवति। दारु काष्ठम् ॥ स्नायुः अस्थिसंहननम् ॥ सानुः प्रस्थ ॥ जानु ऊर्वेकदेश अष्ठीवान् ॥ चाटुः प्रियालाप ॥ चारु शोभनम्। ञकारो वृद्धिस्वरार्थः। ण ... न [णानुबन्धसामर्थ्येन] प्रतिषिद्धादपि वृद्धिर्भवति ॥

॥ ३ ॥ किमि श्रुः ॥ २. १. ३ ॥

श्रृणोते. किम्युपपदे ञुण्प्रत्ययो भवति। किंशारु सस्यशूकम्, शूकधान्यशिखा ॥

॥ ४ ॥ जराजटावनरसेष्विणः ॥ २. १. ४ ॥

इणो धातो जरादिषूपपदेषु [ञुण्]प्रत्ययो भवति। जरायुः गर्भाशयवेष्टनम् ॥ जटायुः संपातिभ्राता ॥ वनायुः देशविशेषः ॥ रसायुः भ्रमरः ॥

॥ ५ ॥ त्रोरश्च लः ॥ २. १. ५ ॥

तृ ऋ इत्येताभ्या ञुण् भवति । तयो. रेफस्य च ल । तालु काकुदम् ॥ आलु गलान्तिकम् । ऋ इत्यत्र केचित् [ऋदन्तं मन्यन्ते] । तेन शृणोने शालु हिस्र । मृडो मालु । मालुधाणिरित्यादयः[१]॥

॥ ६ ॥ कृके वचः कश्च ॥ २. १. ६ ॥

कृके उपपदे वचे ञुण् भवति कश्चान्तादेश । कृकवाकुः कुक्कुट ॥

॥ ७ ॥ भृमृतृचरित्सरितनिमिमस्जिशीङ्वटिचटिचञ्चिभ्य उः ॥ २. १. ७ ॥

भृप्रभृतिभ्य उप्रत्ययो भवति । भरुः भर्ता ॥ मरुः निर्जलप्रदेश ॥ तरुः पादपः ॥ चरुः हविर्विशेष ॥ त्सरुः खड्गमुष्टि. ॥ तनुः शरीरम् ॥ मयुः अश्वमुखम् ॥ मद्गुः जलपक्षी ॥ शयुः अजगर ॥ वटुः माणवक ॥ चटुः प्रियालापः ॥ चञ्चुः पक्षिमुखम् ॥

॥ ८ ॥ अणश्च ॥ २. १. ८ ॥

अणश्च धातोरुर्भवति । अणुः सूक्ष्म. ॥

॥ ९ ॥ धान्ये नित् ॥ २. १. ९ ॥

अणो धातो धान्येऽभिधेये उप्रत्ययो निद्भवति । अणवः व्रीहय । स्वरे विशेषः ॥

॥ १० ॥ पटिकट्यसिवसित्रपिहनिमनिश्रृस्वृस्निहिक्लिदिकन्दिबिद्यन्धिबन्धिभ्यः ॥ २. १. १० ॥

पटयादिभ्य उप्रत्ययो निद्भवति । पटुः दक्ष ॥ कटुः रसविशेष ॥ असवः प्राणा ॥ वसु द्रव्यम् ॥ त्रपु सीसकम् ॥ हनुः वदनैकदेश ॥ मनुः प्रजापतिः ॥ शरुः हिंस्रः ॥ स्वरुः वज्रम् ॥ स्नेहुः मित्रम् ॥ क्लेदुः चन्द्रमाः ॥ कन्दुः पाकस्थानम् । बिन्दुः विप्रुट् ॥ अन्धुः कूप. ॥ बन्धुः जाति ॥

॥ ११ ॥ उन्देरिच्चादेः ॥ २. १. ११ ॥

उन्देरुप्रत्ययो भवति । आदेश्चेकारादेश । इन्दुः चन्द्रमाः ॥

॥ १२ ॥ बहिरहिपंसां दीर्घश्च ॥ २. १. १२ ॥

बह्यादिभ्य उप्रत्ययो भवति । एषां दीर्घश्च । बाहुः भुजः ॥ राहुः सैंहिकेय ॥ "पंस" इति सौत्रो धातुः । पांसुः धूलिः ॥

॥ १३ ॥ अशेर्नुम् च ॥ १. २. १३ ॥

अश्नोतेरुप्रत्ययो नुं चागमो भवति । अंशुः मयूख ॥

॥ १४ ॥ नमिमनिजनां नाकिधतश्च ॥ २. १. १४ ॥

नम्यादिभ्य उप्रत्ययो भवति । एषा यथासङ्ख्य नाकिधत इत्येते आदेशाश्च । नाकुः वल्मीकम् ॥ मधु क्षौद्रम् ॥ जतु लाक्षा ॥

॥ १५ ॥ वलिफलोर्गुक् च ॥ २. १. १५ ॥

वलिफलिभ्यां उप्रत्यय. । तयो· गुक् चागमो भवति । वल्गु मनोज्ञम् ॥ फल्गु असारम् ॥

॥ १६ ॥ अर्जेः ऋज च ॥ २. १. १६ ॥

अर्जे. उप्रत्ययो भवति । ऋज चास्यादेश. । ऋजु अकुटिलम् ॥

॥ १७ ॥ कृतेः कतयोस्तकौ च ॥ २. १. १७ ॥

कृतेरुप्रत्यय । ककारस्य तकार , तकारस्य ककार आदेशो भवति । कृन्ततीति तर्कुः सूत्रकर्तनम् ॥

॥ १८ ॥ नावञ्चेः ॥ २. १. १८ ॥

अञ्चेर्नावुपपदे उप्रत्ययो भवति । न्यङ्कुः मृगविशेषः ॥

॥ १९ ॥ इषिभिदिविदिमृदिव्यधिगृधिधृषिहृषिकावृभ्यः कुः ॥ २. १. १९ ॥

इष्यादिभ्य कुप्रत्ययो भवति । इषुः शर ॥ भिदुः वज्रम् ॥ विदुः हस्तिकुम्भमध्यम् ॥ मृदु अकठिनम् ॥ विधुः चन्द्रमा. ॥ गृधुः कामः ॥ धृषुः प्रगल्भ ॥ हृषुः हृष्टः ॥ कुः पृथ्वी ॥ उरु बृहत् ॥

॥ २० ॥ याहन्कृभृवृतां द्वे च ॥ २. १. २० ॥

[यादिभ्य उप्रत्य]यो द्विवचनं चैषा भवति । ययुः अश्व. ॥ जघ्नुः इन्द्रः ॥ चक्रुः वैकुण्ठ ॥ बभ्रुः नकुल ॥ वव्रुः समुद्र ॥ तत्रुः नौका ॥

॥ २१ ॥ शः सन्वच्च ॥ २. १. २१ ॥

शे कुप्रत्यय । सनीव चास्मिन् । अस्य द्वित्वमित्वं च भवति । शिशुः बालः ॥

॥ २२ ॥ पचेरिच्चोपधायाः ॥ २. १. २२ ॥

पचेः कुप्रत्ययः उपधायाश्चेकारादेशो भवति । पिचुः निरस्थीकृत कार्पासः ॥

॥ २३ ॥ कृग्रोरुच्च ॥ २. १. २३ ॥

कृगृभ्या कुप्रत्ययः । उकारश्चान्तादेशो भवति । कुरुः क्षत्रियविशेषः ॥ गुरुः उपाध्यायः ॥

॥ २४ ॥ ऊर्णोर्नुलोपश्च ॥ २. १. २४ ॥

ऊर्णोतेरुप्रत्यय. नुलोपश्च भवति । ऊरुः शरीरावयवः ॥

॥ २५ ॥ महति ह्रस्वश्च ॥ २. १. २५ ॥

ऊर्णोतेर्महत्यभिधेये कुप्रत्ययो नुलोपो ह्रस्वश्च भवति । उरुः महान् ॥

॥ २६ ॥ ऋक्षेरो डश्च ॥ २. १. २६ ॥

ऊर्णोतेर्नक्षत्रेऽभिधेये कुप्रत्ययो नुलोपो ह्रस्वः रेफस्य च डकारादेशो भवति । उडु नक्षत्रम् ॥

॥ २७ ॥ श्लिषेः कश्च ॥ २. १. २७ ॥

[श्लिषेः कुप्रत्यय] कश्चान्तादेशो भवति । श्लिकुः सव्यवायः ॥

॥ २८ ॥ रिभिप्रथ्योः प्रसारणं च ॥ २. १. २८ ॥

रिभिप्रथिभ्यां कुप्रत्यय. प्रसारण चानयोर्भवति । ऋतुः देव ॥ पृथुः राजा ॥

॥ २९ ॥ स्यन्देर्धश्च ॥ २. १. २९ ॥

स्यन्देः कुप्रत्यय प्रसारण धश्चान्तादेशो भवति । सिन्धुः नदी ॥

॥ ३० ॥ स्पशिभ्रस्जोः सलोपश्च ॥ २. १. ३० ॥

स्पशिभ्रस्जिभ्या कुप्रत्ययः सलोप. प्रसारणं च भ्रस्जेः भवति । पशुः प्राणिविशेषः ॥ भृगुः प्रपात ॥

॥ ३१ ॥ सृजेरसुक् च ॥ २. १. ३१ ॥

सृजेः कुप्रत्यय सलोप असुक् चागमो भवति । रज्जुः दाम ॥

॥ ३२ ॥ बंहिरङ्घिलङ्घिलिङ्गिनां नलोपश्च ॥ २. १. ३२ ॥

बंह्यादिभ्य. कुप्रत्यय नलोपश्च भवति । बहु स्फारम् ॥ रघुः राजा ॥ लघुः तुच्छः ॥ लिगुः मुनि. ॥

॥ ३३ ॥ पराङोः शृखनिभ्यां डित् ॥ २. १. ३३ ॥

पराङोरुपपदयो. शृखनिभ्या यथासङ्ख्यं कुप्रत्ययो डित् भवति । परशुः कुठारः ॥ आखुः मूषिक ॥

॥ ३४ ॥ द्युद्रुभ्यां च ॥ २. १. ३४ ॥

द्युद्रुभ्यां च कुप्रत्ययो डिद्भवति । द्युः स्वर्ग ॥ द्रुः वृक्षः ॥

॥ ३५ ॥ हरिमितशतकसु द्रुवः ॥ २. १. ३५ ॥

द्रुवादेः हर्म्यादिषूपपदेषु कुप्रत्ययो डिद्भवति । हरिद्रुः पादपः ॥ मितद्रुः मितक्रमः ॥ शतद्रुः नदी ॥ कद्रुः नागमाता ॥

॥ ३६ ॥ **अपदुस्सुवनिषु स्थः** ॥ २. १. ३६ ॥

अपादिषूपपदेषु तिष्ठते कुप्रत्ययो भवति । अपष्ठु पाम ॥ **दुष्ठु** कृच्छ्रम् ॥ **सुष्ठु** [शोभनम्] ॥ **वनिष्ठुः** ऊर्वेकदेश ॥

॥ ३७ ॥ **पीमृगमित्रदेवसुम्नास्मसु युः** ॥ २. १. ३७ ॥

पीप्रभृतिषूपपदेषु युप्रत्ययो भवति । **पीयुः** उलूक ॥ **मृगयुः** व्याध. ॥ **मित्रयुः** मुनि ॥ **देवयुः** धार्मिक ॥ **सुम्नयुः** यजमान ॥ **अस्मयुः** मूर्ख ॥

॥ ३८ ॥ **कैशीशमिरमिभ्यः कुः** ॥ २. १. ३८ ॥

कैप्रभृतिभ्यः कुर्भवति । **काकुः** स्वरविशेष ॥ **शेकुः** उद्भिद्विशेष ॥ **शङ्कुः** कीलक ॥ **रङ्कुः** मृग । पुनर्विधानात् ककारो निवर्तते ॥

॥ ३९ ॥ **प्रि[ह्रि]यः किद्रो लश्च वा** ॥ २. १. ३९ ॥

जिह्रेते कुप्रत्ययः कित् रेफस्य च लो वा भवति । [ह्रीकुः] शालीन ॥ **ह्लीकुः** स एव ॥

॥ ४० ॥ **चटिकठिभ्यामाकुः** ॥ २. १. ४० ॥

आभ्यामाकुप्रत्ययो भवति । **चटाकुः** मुनि ॥ **कठाकुः** कुटुम्बपोषकः ॥

॥ ४१ ॥ **शिविकुटिकुषिभ्यां कित्** ॥ २. १. ४१ ॥

शिवादिभ्य कुप्रत्ययो कित् भवति । **शिवाकुः**..... [ऋषिः] ॥ **कुटाकुः** ..[कुटुम्बपोषक.] ॥ **कुषाकुः** मूषिक ॥

॥ ४२ ॥ **चेरुपन्योर्डित्** ॥ २. १. ४२ ॥

चिनोतेरुपन्योरुपपदयोः डित् भवति । **उपचाकुः** मुनि. ॥ **निचाकुः** निपुणः ॥

॥ ४३ ॥ **शालेराकुः** ॥ २. १. ४३ ॥

शालेराकुप्रत्ययो भवति । **शलाकुः** ॥

॥ ४४ ॥ सृवृभ्यां दाकुक् ॥ २. १. ४४ ॥

आभ्यां दाकुक्प्रत्ययो भवति । सृदाकुः सर्त्ता ॥ दाकुः सर्पः ॥

॥ ४५ ॥ अमेर्गुः ॥ २. १. ४५ ॥

अमेर्गुप्रत्ययो भवति । अङ्गुः शरीरावयव ॥

॥ ४६ ॥ दमेर्लोपश्च ॥ २. १. —४६ ॥

दमेर्गुप्रत्ययो लोपश्चान्त्यस्य भवति । दगुः मुनि ॥

॥ ४७ ॥ हेः किन्नुट् च ॥ २. १. ४७ ॥

हिनोते गुप्रत्ययः कित् नुट्चास्यागमो भवति । हिङ्गुः रामठम् ॥

॥ ४८ ॥ प्रीकैपानीलिभ्यः कङ्गुच् ॥ २. १. ४८ ॥

प्रीणात्यादिभ्य कङ्गुच्प्रत्ययो भवति । प्रियङ्गुः फलिनी ॥ कङ्गुः अणु ॥ पङ्गुः खञ्ज । नीलङ्गुः तिमि ॥

॥ ४९ ॥ अर्त्यविभ्यामट्टुच् ॥ २. १. ४९ ॥

आभ्यामट्टुच्प्रत्ययो भवति । अरट्टुः वृक्षविशेषः ॥ अवट्टुः कृकाटिका ॥

॥ ५० ॥ शालेराट्टुच् ॥ २. १. ५० ॥

शालेराट्टुच्प्रत्ययो भवति । शलो[ला]ट्टुः कोमलं फलम् ॥

॥ ५१ ॥ तनिमनिकणिभ्यो डुः ॥ २. १. ५१ ॥

एभ्यो डुप्रत्ययो भवति । तण्डुः प्रपथ ॥ मण्डुः मुनि. ॥ कण्डुः वेदनाविशेष ॥

॥ ५२ ॥ पनेर्दीर्घश्च ॥ २. १. ५२ ॥

पनेर्डुप्रत्ययो दीर्घश्च भवति । पाण्डुः [श्वेत] ॥

॥ ५३ ॥ मृपल्योः कनुगानुगौ च ॥ २. १. ५३ ॥

मृपलिभ्यां डुप्रत्ययः। तत्सन्नियोगेन च मृङः कनुक्, पलेरानुक्चागमो भवति। **मृकण्डुः** मुनिः॥ **पलाण्डुः** लशुनभेदः॥

॥ ५४ ॥ गमेः कित् ॥ २. १. ५४ ॥

गमेः डुप्रत्ययः किद्भवति। **गड्डुः** व्रणविशेषः॥

॥ ५५ ॥ स्थो णुः ॥ २. १. ५५ ॥

तिष्ठतेः णुप्रत्ययो भवति। **स्थाणुः** शिवः॥

॥ ५६ ॥ अजिवृरीभ्यो नित् ॥ २. १. ५६ ॥

अज्यादिभ्यो णुप्रत्ययो निद्भवति। **वेणुः** वंशः॥ **वर्णुः** वर्णकः॥ **रेणुः** धूलिः॥

॥ ५७ ॥ कृहृभ्यामेणुः ॥ २. १. ५७ ॥

आभ्यामेणुर्भवति। **करेणुः** हस्ती॥ **हरेणुः** गन्धद्रव्यम्॥

॥ ५८ ॥ कमिमनिजन्यसिगाभापायाहिभ्यस्तुः ॥ २. १. ५८ ॥

कम्यादिभ्यस्तुप्रत्ययो भवति। **कन्तुः** कन्दर्पः॥ **मन्तुः** मानः॥ **जन्तुः** प्राणी॥ **अस्तुः** अस्तिभावः॥ **गातुः** गायकः॥ **भातुः** भानुः॥ **पातुः** रक्षिता॥ **यातुः** रक्षः॥ **हेतुः** कारणम्॥

॥ ५९ ॥ चायः कि च ॥ २. १. ५९ ॥

चायतेः तुप्रत्ययः। कि चास्यादेशो भवति। **केतुः** ध्वजः॥

॥ ६० ॥ आपो ह्रस्वश्च ॥ २. १. ६० ॥

आप्नोतेस्तुप्रत्ययः, ह्रस्वश्च भवति। **अप्तुः** देवताविशेषः॥

॥ ६१ ॥ सितनिगमिमसिसच्यविधाञ्पूञ्-कुशिभ्यस्तुन् ॥ २. १. ६१ ॥

सिञादिभ्यस्तुन्प्रत्ययो भवति। **सेतुः** जलबन्धः॥ **तन्तुः** सूत्रम्॥

गन्तुः पथिकः ॥ आगन्तुः आगामी ॥ मस्तु दध्नोऽध पानीयम् ॥ सक्तु यवविकारः ॥ ओतुः बिडालः ॥ धातुः लोहादि ॥ पोतुः पविता ॥ क्रोष्टुः सृगालः ॥

॥ ६२ ॥ वसेर्णिद्वा ॥ २. १. ६२ ॥

वसेस्तुन् णिद्वा भवति । वस्तु पदार्थः ॥ वास्तु गृहम् ॥

॥ ६३ ॥ पाज्यर्तिभ्यो डित् ॥ २. १. ६३ ॥

पिबत्यादिभ्यः तुन्प्रत्ययो डिद्भवति । पीतुः सूर्यः ॥ अक्तुः रात्रिः ॥ ऋतुः वसन्तादिः ॥

॥ ६४ ॥ कृञः क्तुः ॥ २. १. ६४ ॥

करोतेः क्तुप्रत्ययो भवति । क्रतुः यज्ञः ॥

॥ ६५ ॥ एधिवह्योरतुच् ॥ २. १. ६५ ॥

आभ्यामतुच्प्रत्ययो भवति । एधतुः पुरुषः ॥ वहतुः अनड्वान् ॥

॥ ६६ ॥ तनेर्यक् च ॥ २. १. ६६ ।

तनेरतुच्प्रत्ययो यक्चागमो भवति । तन्यतुः विस्तारः ॥

॥ ६७ ॥ जीवेरातुः ॥ २. १. ६७ ॥

जीवेरातुप्रत्ययो भवति । जीवातुः प्राणः ॥

॥ ६८ ॥ यमेर्दुक् ॥ २. १. ६८ ॥

यमेर्दुक्प्रत्ययो भवति । यदुः क्षत्रियविशेषः ॥

॥ ६९ ॥ शीङो धुक् ॥ २. १. ६९ ॥

शीङो धुक्प्रत्ययो भवति । शीधु मद्यम् ॥

॥ ७० ॥ धुञो नुट् च ॥ २. १. ७० ॥

धुनोतेः धुक्प्रत्ययो भवति, नुट् चान्त्यागमः । धुन्धुः दानवः ॥

॥ ७१ ॥ दाभाभ्यां नुः ॥ २. १. ७१ ॥

आभ्या नुप्रत्ययो भवति। दानुः दाता ॥ भानुः सूर्यः ॥ चित्र-भानुः अग्निः। स्वर्भानु राहु ॥

॥ ७२ ॥ वचेर्गश्च ॥ २. १. ७२ ॥

वचेर्नुप्रत्ययो गश्चान्तादेशो भवति। वग्नुः वाग्मी ॥

॥ ७३ ॥ धेट इश्च ॥ १. २. ७३ ॥

धेटो नुप्रत्ययः इकारश्चान्तादेशो भवति। धेनुः अभिनवप्रसवा गौः ॥

॥ ७४ ॥ सूविषिकृञ्भ्यः कित् ॥ २. १. ७४ ॥

एभ्य· नुप्रत्यय किद्भवति। सूनुः पुत्र· ॥ विष्णुः वासुदेव· ॥ कृणुः कोशकार· ॥

॥ ७५ ॥ होर्द्वे लोपश्च ॥ २. १. ७५ ॥

जहातेर्जिहीतेर्वा नुप्रत्ययो द्विर्वचनमन्त्यलोपश्च भवति। जह्नुः मुनिविशेष ॥

॥ ७६ ॥ गमेः सन्वच्च ॥ २. १. ७६ ॥

गमेर्नुप्रत्यय कित् सनीव चास्मिन् कार्यं भवति। जिगनुः वायुः ॥

॥ ७७ ॥ तनेर्डुः ॥ २. १. ७७ ॥

तनेर्डुप्रत्यय·। स च सन्वद्भवति। तितउः परिपवनम् ।

॥ ७८ ॥ अञ्जेरिष्णुच् ॥ २. १. ७८ ॥

अञ्जेरिष्णुच्प्रत्ययो भवति। अञ्जिष्णुः घृतम् ॥

॥ ७९ ॥ क्षिपिनदिपदिपतिदाभूभ्यश्च नुक् ॥ २. १. ७९ ॥

क्षिपादिभ्य· नुक्प्रत्ययो भवति। क्षिपनुः वायु· ॥ नदनुः मेघ ॥ पदनुः पक्ता ॥ पतनुः पक्षी ॥ दनुः दानवमाता ॥ भुवनुः भवितव्यता ॥

॥ ८० ॥ कृशेरानुक् ॥ २. १. ८० ॥

कृशेरानुक्प्रत्ययो भवति। **कृशानुः** वह्नि. ॥

॥ ८१ ॥ जीवेरदानुक् ॥ २. १. ८१ ॥

जीवे रदानुक्प्रत्ययो भवति। **जीवरदानुः** पर्जन्य. ॥

॥ ८२ ॥ वचेरक्नुः ॥ २. १. ८२ ॥

वचेरक्नुप्रत्ययो भवति। **वचक्नुः** वाक् ॥

॥ ८३ ॥ स्तनिहृषिपुषिगदिमदिघुषिगडिमण्डिजनिनन्दिभ्यो णेरित्नुच् ॥ २. १. ८३ ॥

स्तन्यादिभ्य· ण्यन्तेभ्य इत्नुच्प्रत्ययो भवति। **स्तनयित्नुः** मेघ· ॥ **हर्षयित्नुः** सुजन ॥ **पोषयित्नुः** भर्ता ॥ **गदयित्नुः** वावदूकः ॥ **मदयित्नुः** शीधु ॥ **घोषयित्नुः** कोकिल ॥ **गण्डयित्नुः** जलदः ॥ **मण्डयित्नुः** कामुक ॥ **जनयित्नुः** पिता ॥ **नन्दयित्नुः** पुत्र ॥

॥ ८४ ॥ अर्तिकशिभ्यां चिपुक् ॥ २. १. ८४ ॥

आभ्यां चिपुक्प्रत्ययो भवति। **रिपुः** शत्रु ॥ **कशिपुः** भोजनाच्छादने ॥

॥ ८५ ॥ अमिकमिभ्यां बुः ॥ २. १. ८५ ॥

आभ्या बुप्रत्ययो भवति। **अम्बु** पानीयम् ॥ **कम्बुः** शङ्खः ॥

॥ ८६ ॥ अभ्रेरमुः ॥ २. १. ८६ ॥

अभ्रेरमुप्रत्ययो भवति। **अभ्रमुः** देवहस्तिनी ॥

॥ ८७ ॥ जनिमनियजिशुन्धिदसिभ्यो युस् ॥ २. १. ८७ ॥

जन्यादिभ्यो युस्प्रत्ययो भवति। **जन्युः** प्राणी ॥ **मन्युः** कोपः ॥ **यज्युः** यज्ञः ॥ **शुन्ध्युः** पवित्रम् ॥ **दस्युः** चोर। सकारो · ···· ॥

॥ ८८ ॥ नञि ध्वरे ॥ २. १. ८८ ॥

नञ्युपपदे ध्वरेर्युसुप्रत्ययो भवति । अध्वर्युः ऋत्विक् ॥

॥ ८९ ॥ भुजेः कित् ॥ २. १. ८९ ॥

भुजे. इप्रत्यय. । स च किद्भवति । भुजिः ऋषि· ॥

॥ ९० ॥ सर्तेरयूः ॥ २. १. ९० ॥

सर्तेरयूप्रत्ययो भवति । सरयूः नदीविशेष· ॥

॥ ९१ ॥ हेतुभावयोः मृङस्त्युक् ॥ २. १. ९१ ॥

हेतौ भावे चार्थे मृङस्त्युक्प्रत्ययो भवति । मारयतीति मृत्युः काल ॥

॥ ९२ ॥ पीम्यशिभ्यो रुः ॥ २. १. ९२ ॥

एभ्यो रुप्रत्ययो भवति । पेरुः सूर्य ॥ मेरुः देवाद्रि ॥ अश्रु नेत्रजलम् ॥

॥ ९३ ॥ रुपूभ्यां क्रुन् ॥ २. १. ९३ ॥

आभ्यां क्रुन्त्ययो भवति । रुरुः मृगजाति ॥ पुरुः राजा ॥

॥ ९४ ॥ खनो लोपश्च ॥ २. १. ९४ ॥

खनेः क्रुन्प्रत्यय·, [नकारस्य च] लोपो भवति । खरुः दविष्ठ· ॥

॥ ९५ ॥ जनेस्त च ॥ २. १. ९५ ॥

जनेर्धातो क्रुन्प्रत्ययः, तकारश्चान्तादेशो भवति । जत्रु शरीरावयवः ॥

॥ ९६ ॥ शातेर्ह्रस्वश्च ॥ २. १. ९६ ॥

शातेः क्रुन्प्रत्ययः ह्रस्वश्च भवति । शत्रुः अराति· ॥

॥ ९७ ॥ षिञ्जेः शिग् च ॥ २. १. ९७ ॥

षिञ्जे. क्रुन्प्रत्ययः शिग् चादेशो भवति । शिग्रुः सौभाजनकः ॥

॥ ९८ ॥ श्मनि शीङो डित् ॥ २. १. ९८ ॥

शीङः श्मन्युपपदे क्रुन्प्रत्ययो डिद्भवति । श्मश्रु मुखलोमानि ॥

॥ ९९ ॥ कुटचर्तिभ्यामरुः ॥ २. १. ९९ ॥

आभ्यामरुप्रत्ययो भवति । कुटरुः पक्षिविशेषः ॥ अररुः असुरः ॥

॥ १०० ॥ कर्केरारुः ॥ २. १. १०० ॥

कर्केरारुप्रत्ययो भवति । कर्कारुः क्षुद्रचिञ्चिटी ॥

॥ १०१ ॥ और्वेरादेरुदेतौ च ॥ २. १. १०१ ॥

और्वेरारुप्रत्ययो भवति । आदेरुकारोकारौ च । उर्वारु कटुचिञ्चिटी ॥ एर्वारुः स्वादुचिञ्चिटी ॥

॥ १०२ ॥ तुम्बेरुरुः ॥ २. १. १०२ ॥

तुम्बेरुरुप्रत्ययो भवति । तुम्बुरुः गन्धर्वेशः ॥

॥ १०३ ॥ कन्देरत उच्च ॥ २. १. १०३ ॥

कन्देरुरुप्रत्ययो भवति । अकारस्य चोकार आदेशः । कन्दुरुः सल्लकीनिर्यासः ॥

॥ १०४ ॥ चमेरूरुः ॥ २. १. १०४ ॥

चमेरूरुप्रत्ययो भवति । चमूरुः चित्रकः ॥

॥ १०५ ॥ शीङ्पीङ्शल्भ्यो लुट्लुगालुचः ॥ २. १. १०५ ॥

शीङ्पीङ्शल्भ्यः यथासङ्ख्यं लुट् लुक् आलुच् प्रत्ययो भवति । शेलुः श्लेष्मातकः ॥ पीलुः वृक्षविशेषः ॥ शलालुः गन्धद्रव्यविशेषः ॥

॥ १०६ ॥ कमण्डलुगुहलुगुलुगुलवः ॥ २. १. १०६ ॥

एते लुलुगालुजन्ता निपात्यन्ते । कमनित्यस्यामिति कमण्डलुः अमत्रम् ॥

गूहति ब्रह्म इति **गुह्लुः** मुनिविशेष ॥ गुवति गन्धमिति **गुलुगुलुः** वृक्षविशेषः ॥

॥ १०७ ॥ परः शुन् ॥ २. १. १०७ ॥

पिपर्तेः शुन्प्रत्ययो भवति । परशुः ॥

॥ १०८ ॥ मस्जिषो: षुक् ॥ २. १. १०८ ॥

मस्जिषो षुक्प्रत्ययो भवति । **मुक्षुः** मुनिविशेष. ॥ **इक्षुः** पुण्ड्र-कादिः ॥

॥ १०९ ॥ तरतेरक्षुः ॥ २. १. १०९ ॥

तरक्षुः श्वापदविशेषः ॥

॥११०॥ कृषिचमितनिधन्यन्दिसर्जिखर्जिभ्य ऊः ॥ २. १. ११० ॥

कृष्यादिभ्यः ऊप्रत्ययो भवति । **कर्षूः** गर्त. ॥ **चमूः** सेना ॥ **तनूः** शरीरम् ॥ **धनूः** धान्यराशि ॥ **अन्दूः** पादकटकम् ॥ **सर्जूः** क्षारम् ॥ **खर्जूः** कण्डूः ॥

॥ १११ ॥ खण्डघज्योर्डुक्जुकौ च ॥ २. १. १११ ॥

खण्डघजिभ्या ऊप्रत्ययो यथासङ्ख्य चानयोः डुक् जुक् चागमो भवति । **खण्डूः** बालानामाभरणम् ॥ **अज्जूः** जननी ॥

॥ ११२ ॥ कषेश्छ च ॥ २. १. ११२ ॥

कषेरूप्रत्ययः छकारश्चान्तादेशो भवति । **कच्छूः** पामा ॥

॥ ११३ ॥ तृद्रोः दूश्च ॥ २. १. ११३ ॥

आभ्यामूप्रत्ययो दूश्चाभ्यामागमो भवति । **तर्दूः** दर्वी ॥ **दद्रूः** कुष्ठभेदः ॥

॥ ११४ ॥ मृजेर्गुणश्च ॥ २. १. ११४ ॥

मृजेरूप्रत्ययो गुणश्च भवति । मर्जूरः रजक ॥

॥ ११५ ॥ वहो ध च ॥ २. १. ११५ ॥

वहेरूप्रत्ययो धकारश्चान्तादेशो भवति । वधूः स्नुषा ॥

॥ ११६ ॥ कसिपद्यर्तिभ्यो णित् ॥ २. १. ११६ ॥

एभ्य ऊप्रत्ययो णिद्भवति । कासूः शक्ति ॥ पादूः पादुका ॥ आरूः वृक्षविशेष. ॥

॥ ११७ ॥ अडो लश्च वा ॥ २. १. ११७ ॥

अडेरूप्रत्ययो णिद्भवति । लकारश्चान्तादेशो वा भवति । आडूः आलूश्च भृङ्गारः ॥

॥ ११८ ॥ नञि लम्बेर्नलोपश्च ॥ २. १. ११८ ॥

नञ्युपपदे लम्बेरूप्रत्ययो णित् नलोपश्च भवति । अलाबूः तुम्बी ॥

॥ ११९ ॥ के शीङो रट्चास्य ॥ २. १. ११९ ॥

के उपपदे शीङ ऊप्रत्ययो भवति, रट् चास्यागम. । कशेरूः ॥

॥ १२० ॥ जनेर्बुक् च ॥ २. १. १२० ॥

जम्बूः ॥

॥ १२१ ॥ कफईलेर्णिलुक् ॥ २. १. १२१ ॥

कफ उपपदे ईलेरूप्रत्ययो णिलुक् च भवति । कफेलूः श्लेष्मातक. ॥

॥ १२२ ॥ कृञः कन्धुक् च ॥ २. १. १२२ ॥

करोतेः ऊप्रत्यय. कन्धुक् चागमो भवति । कर्कन्धूः क्षुद्रबदरी ॥

॥ १२३ ॥ धृषेर्दिधिष च ॥ २. १. १२३ ॥

धृषेरूप्रत्ययः दिधिष चास्यादेशो भवति । दिधिषूः पूर्वपरिणीता ॥

॥ १२४ ॥ दृभिचपोर्नुश्च ॥ २. १. १२४ ॥

आभ्यामूप्रत्ययो नुश्चागमो भवति । दृम्भूः सर्पजातिः ॥ **चम्पूः** कथाविशेषः ॥

॥ १२५ ॥ नृतिशृधिकुहिभ्यः कूः ॥ २. १. १२५ ॥

नृत्यादिभ्यः कूप्रत्ययो भवति । नृतूः नर्तक ॥ शृधूः शर्धनः ॥ कुहूः अमावास्या ॥

॥ १२६ ॥ ऋतेरं च ॥ २. १. १२६ ॥

ऋतेः कूप्रत्ययो भवति । अ चागमो न भवति ॥ रकूः नाम नदी ॥

॥ १२७ ॥ भ्रमेर्डूः ॥ २. १. १२७ ॥

भ्रमेर्डूप्रत्ययो भवति । भ्रूः नेत्रयोरुपरि रोमरेखा ॥

॥ १२८ ॥ योरागूच् ॥ २. १. १२८ ॥

यौतेरागूच्प्रत्ययो भवति । यवागूः ॥

॥ १२९ ॥ दिवेः ऋन् ॥ २. १. १२९ ॥

दिवेः ऋन्प्रत्ययो भवति । देवा देवरः ॥

॥ १३० ॥ नियो डित् ॥ २. १. १३० ॥

नयतेः ऋन्प्रत्ययो भवति डिच्च । ना पुरुष ॥

॥ १३१ ॥ सव्ये स्थः ॥ २. १. १३१ ॥

तिष्ठतेः सव्य उपपदे ष्ठन्प्रत्ययो भवति । सव्येष्ठा सादेवी [सारथिः] ॥

॥ १३२ ॥ सुभ्यसेः ऋन् ॥ २. १. १३२ ॥

अस्यतेः सुञ्युपपदे ऋन्प्रत्ययो भवति । स्वसा भगिनी ॥

॥ १३३ ॥ यातेर्वृद्धिश्च ॥ २. १. १३३ ॥

यातेः ऋन्प्रत्ययो वृद्धिश्च भवति । याता देवरभार्या ॥

॥ १३४ ॥ नञि नन्देः ॥ २. १. १३४ ॥

नन्देर्नञ्युपपदे ऋन्प्रत्ययो भवति, वृद्धिश्च । ननान्दा भर्तृभगिनी ॥

॥ १३५ ॥ पातेस्तृजिच्च ॥ २. १. १३५ ॥

पातेस्तृच्प्रत्ययः इकारश्चाकारस्य भवति । पिता जनकः ॥

॥ १३६ ॥ मानेर्लोपश्च ॥ २. १. १३६ ॥

मानेस्तृच्प्रत्ययोऽन्तलोपश्च भवति । माता जननी ॥

॥ १३७ ॥ भ्राजेश्च ॥ २. १. १३७ ॥

भ्राजेश्च तृच्प्रत्ययोऽन्तलोपश्च भवति । भ्राता सोदर्य. ॥

॥ १३८ ॥ दुहेरिट् किच्च ॥ २. १. १३८ ॥

दुहेस्तृच्प्रत्ययः किच्चेडागमो भवति । दुहिता तनया ॥

॥ १३९ ॥ जायां मिञः ॥ २. १. १३९ ॥

जा इत्येतस्मिन्नुपपदे मिञ तृच्प्रत्ययो भवति । जामाता दुहितु· पति ॥

॥ १४० ॥ नमेः पश्च ॥ २. १. १४० ॥

नमेः तृच्प्रत्यय पकारश्चान्तादेशो भवति । नप्ता प्रपौत्र ॥

॥ १४१ ॥ आपो ह्रस्वश्च ॥ २. १. १४१ ॥

आप्नोते ह्रस्व· क्विप्[तृच्]प्रत्ययश्च भवति । अप्ता यज्ञ ॥

॥ १४२ ॥ हुपूभ्यामृत्विजि तृन्ननिट् च ॥ २. १. १४२ ॥

आभ्यामृत्विज्यभिधेये तृन्प्रत्ययोऽनिट् चासौ भवति । होता ऋत्विक् ॥ पोता ऋत्विग्भेद· ॥

॥ १४३ ॥ नियः षुक् च ॥ २. १. १४३ ॥

नयतेः ऋत्विजि तृन्प्रत्यय· षुक्चागमो भवति । नेष्टा…… … · [ऋत्विक्] ॥

॥ १४४ ॥ उदिगायश्च चित् ॥ २. १. १४४ ॥

उद्युपपदे गायतेर्नयनेश्च ऋत्विजि तृन्प्रत्ययश्चिद्भवति। उद्गाता उन्नेता ऋत्विक् ॥

॥ १४५ ॥ प्रे स्तुशासिभ्याम् ॥ २. १. १४५ ॥

स्तौतिशासिभ्या प्र उपपदे ऋत्विज्यभिधेये तृन्प्रत्ययो भवति । प्रस्तोना ॥ प्रशास्ता ॥

॥ १४६ ॥ हृप्रस्थोः प्रतौ ॥ २. १. १४६ ॥

हरतेः प्रपूर्वाच्च तिष्ठते प्रतावुपपदे ऋत्विज्यभिधेये तृन्प्रत्ययो भवति । प्रतिहर्ता प्रतिप्रस्थाता ऋत्विक् ॥

॥ १४७ ॥ त्विषेर्देवतायामितोऽच्च ॥ २. १. १४७ ॥

त्विषेर्देवतायामर्थे तृन्प्रत्यय इकारस्य चाकार आदेशो भवति । त्वष्टा सूर्य. । त्वक्ष्णातेस्तु तृचि त्वष्टा देववर्धकि· ॥

॥ १४८ ॥ क्षदेर्युक्ते ॥ २. १. १४८ ॥

क्षदेर्युक्तेऽर्थे तृन्प्रत्ययोऽनिट्चासौ भवति । क्षत्ता नियुक्त· ।

॥ १४९ ॥ रातेर्डैः ॥ २. १. १४९ ॥

रातेर्डैप्रत्ययो भवति । राः द्रव्यम् ॥

॥ १५० ॥ द्युगमिभ्यां डोः ॥ २. १. १५० ॥

द्युगमिभ्यां डोप्रत्ययो भवति । द्यौः स्वर्ग ॥ गौः पृथिव्यादि ॥

॥ १५१ ॥ ग्लानुभ्यां डौः ॥ २. १. १५१ ॥

आभ्यां डौप्रत्ययो भवति । ग्लौः चन्द्रमा· ॥ नौः जलतरणम् ॥ बहुलाधिकारादेजन्तत्वेऽपि रैप्रभृतयो नाव्ययानि ॥

॥ १५२ ॥ अच इः ॥ २. १. १५२ ॥

अजन्ताद्धातोरिप्रत्ययो भवति । रविः सूर्यः ॥ कवि· काव्यकर्ता ॥ पवि वज्रम् ॥ हरि. शक्रः ॥ दरिः प्रपातः ॥

॥ १५३ ॥ खनिकष्यञ्ज्यसिवसिध्वनिसनिमणिग्रन्थिचरिभ्यश्च ॥ २. १. १५३ ॥

खन्यादिभ्यश्च इप्रत्ययो भवति । खनिः आकरः ॥ कषिः खनित्रम् ॥ म्रमञ्जिः शस्त्रम् ॥ असिः खड्ग· ॥ वसिः वसिता । ध्वनिः शब्दः ॥ सनिः सभक्ता ॥ मणिः रत्नम् ॥ ग्रन्थिः पर्वसन्ध्यादि ॥ चरिः प्राकारशिखरम् ॥

॥ १५४ ॥ उभे द्वत्रौ च ॥ २. १. १५४ ॥

उभेरिप्रत्ययो भवति द्वत्र इत्येतौ चादेशौ भवत ॥ द्वौ सङ्ख्या ॥ त्रयः सैव ॥

॥ १५५ ॥ भुजः कित् ॥ २. १. १५५ ॥

भुजेरिप्रत्यय· किद्भवति । भुजिः भोक्ता ॥

॥ १५६ ॥ कॄगॄशॄपॄकुटिच्छिदिभिदिभ्यश्च ॥ २. १. १५६ ॥

एभ्यो धातुभ्य· इप्रत्यय. किद्भवति । किरिः सूकरः ॥ गिरिः पर्वत ॥ शिरिः हिंस्र ॥ पुरिः पूजितः ॥ कुटिः गृहम् ॥ छिदिः छेत्ता ॥ भिदिः भेत्ता ॥

॥ १५७ ॥ अंहिकुण्ठिकम्पां नलोपश्च ॥ २. १. १५७ ॥

अंह्यादिभ्यः इप्रत्ययः कित् नलोपश्च भवति । अहिः सर्पः ॥ कुठिः कुठारः ॥ कपिः मर्कटः ॥

॥ १५८ ॥ तरतेः सन्वत्तुक्चाभ्यासस्य ॥ २. १. १५८ ॥

तरतेः इप्रत्ययः कित् सन्वदभ्यासस्य तुगागमो भवति । तित्तिरिः पक्षिविशेषः ॥

॥ १५९ ॥ इगुपधात्कित् ॥ २. १. १५९ ॥

इगुपधाद्धातोः कित्प्रत्ययो भवति । स्वरे विशेष । कृषि कर्षणम् ॥ शुचिः विविक्तः ॥ रुचि दीप्ति ॥ स्नुहिः वृक्षविशेष ॥ तुरि तन्तुवायोपकरणम् ॥ कुणिः कुष्ठः ॥ दुलि कच्छप ॥ ऋषि वेद ॥

॥ १६० ॥ वौ रिचेर्नु च ॥ २. १. १६० ॥

वौ उपपदे रिचेर्धातो कित्प्रत्ययो भवति नुमागमश्च । विरिञ्चिः ब्रह्मा ॥

॥ १६१ ॥ क्रमितमिनमिस्तम्भामत इच्च ॥ २. १. १६१ ॥

क्रम्यादीना कित्प्रत्ययोऽकारस्य चेकारादेशो भवति । क्रिमिः क्षुद्रजन्तुः ॥ तिमिः मत्स्यविशेषः ॥ निमिः राजा ॥ स्तिभिः केतकादिसूची ॥

॥ १६२ ॥ मनेरुच्च ॥ २. १. १६२ ॥

मने. कित्प्रत्ययः अकारस्य चोकारादेशो भवति । मुनिः ऋषि. ॥

॥ १६३ ॥ हलिकलिकिलिकटिवटित्रुटिकुटिबलिवलिवल्ल्यलिभ्य इत् ॥ २. १. १६३ ॥

एभ्य इत्प्रत्ययो भवति । हलिः महद्धलम् ॥ कलिः कलह ॥ केलिः क्रीडा ॥ कटिः शरीरावयव. ॥ वटिः गुलिका ॥ त्रोटिः चञ्चु ॥ कोटिः सङ्ख्या ॥ बलिः दानव. ॥ वलिः त्वग्वर्ती ॥ वल्लिः लता ॥ अलिः भ्रमरः ॥

॥ १६४ ॥ हृपिशिरुहिवृतिविदिकीर्तिभ्यश्च ॥ २. १. १६४ ॥

एभ्य इत्प्रत्ययो भवति । हरिः विष्ण्वादि ॥ पेशिः मांसशल्कम् ॥ रोहिः वृक्षविशेष ॥ वर्तिः दशादि ॥ वेदिः इज्यादिस्थानम् ॥ कीर्तिः यशः ॥

॥ १६५ ॥ भ्रमेः संप्रसारणं च ॥ २. १. १६५ ॥

भ्रमेरित्प्रत्ययः सम्प्रसारण च भवति। भृमिः वायु ॥

॥ १६६ ॥ कृशॄवसिवपिराजिध्राजिध्वजिसदिहनिकमिवमिफलिकशिवाशिवदिवारिसंपतिभ्य इञ् ॥ २. १. १६६ ॥

एभ्य इञ्प्रत्ययो भवति। **कारिः** तक्षादि· ॥ **शारिः** द्यूतोपकरणम् ॥ **वासिः** तक्षोपकरणम् ॥ **वापिः** पुष्करिणी ॥ **राजिः** पङ्क्ति ॥ **ध्राजिः** पद्धति· ॥ **ध्वाजिः** पताका ॥ **सादिः** आरोह ॥ **घातिः** अस्त्रविशेष ॥ **कामिः** कामुक· ॥ **वामिः** स्त्री ॥ **फालिः** दलम् ॥ **काशिः** वाराणसी ॥ **वाशिः** झिल्लिकः ॥ **वादिः** वक्ता ॥ **वारि** पानीयम् ॥ **संपातिः** पक्षिराज· ॥

॥ १६७ ॥ नहो भश्च ॥ २. १. १६७ ॥

नह्यतेरिञ्प्रत्यय· भश्चान्तादेशो भवति। **नाभिः** चक्रमध्यम् ॥

॥ १६८ ॥ अलिशलिपलितलिघसिजम्यणिपणिभ्य इण् ॥ २. १. १६८ ॥

एभ्य इण्प्रत्ययो भवति। **आलिः** सखी ॥ **शालिः** धान्यविशेष· ॥ **पालिः** सेतुबन्ध ॥ **तालिः** आभरणम् ॥ **घासिः** अग्नि· ॥ **जामिः** भगिनी ॥ **आणिः** द्वारकीलिका ॥ **पाणिः** हस्त· ॥

॥ १६९ ॥ अज्यतिभ्यां पादे च ॥ २. १. १६९ ॥

अज्यतिभ्या पादे चोपपदे इण्प्रत्ययो भवति। **आजिः** संग्राम· ॥ **आदिः** पक्षी ॥ **पदाजिः** अनुचर ॥ **पदातिः** स एव ॥

॥ १७० ॥ अशो रुट् च ॥ २. १. १७० ॥

अश्नोतेरिण्प्रत्ययो रुट्चागमो भवति। **राशिः** धान्यादि ····· च ॥

॥ १७१ ॥ वातेर्डित् ॥ २. १. १७१ ॥

वाधातोरिण्प्रत्ययो डिद्भवति। **विः** पक्षी ॥

॥ १७२ ॥ प्रे हृञः कूपे ॥ २. १. १७२ ॥

प्रे उपपदे कूपे अभिधेये हरतेरिण्प्रत्ययो भवति, डिच्च । प्रहिः कूपः ॥

॥ १७३ ॥ कायः किः ॥ २. १. १७३ ॥

कायते. किप्रत्ययो भवति । काकिः स्वरदोष ॥

॥ १७४ ॥ वर्धेरकिः ॥ २. १. १७४ ॥

बर्धतेरकिप्रत्ययो भवति । वर्धकिः तक्षा ॥

॥ १७५ ॥ सनेर्डखिः ॥ २. १. १७५ ॥

सनेर्डखिप्रत्ययो भवति । सखा मित्रम् ॥

॥ १७६ ॥ कौतेर्डिखिः ॥ २. १. १७६ ॥

कौतेर्डिखिप्रत्ययो भवति । किखिः लोम ॥

॥ १७७ ॥ मृकर्ण्यवदधिभ्य ईचिः ॥ २. १. १७७ ॥

एभ्य ईचिप्रत्ययो भवति । मरीचिः ॥ कर्णाचिः ॥ अवीचिः-नरकविशेषः ॥ दधीचिः राजर्षि. ॥

॥ १७८ ॥ श्वेश्चित् ॥ २. १. १७८ ॥

श्वयतेरीचिप्रत्यय· चिद्भवति । श्वयीचिः चन्द्रमा· ॥

॥ १७९ ॥ वेञो डित् ॥ २. १. १७९ ॥

वेञः ईचिप्रत्ययो डिद्भवति । वीचिः कल्लोल. ॥

॥ १८० ॥ श्रिञो डिः ॥ २. १. १८० ॥

श्रिञो डिप्रत्ययो भवति । श्रेडिः········ ·· ॥

॥ १८१ ॥ चमेरुच्चातः ॥ २. १. १८१ ॥

चमेर्डिप्रत्ययो भवति, अकारस्य चोकारादेश· । चुण्डिः क्षुद्रवाची ॥

॥ १८२ ॥ मुषेः किदुनट् च ॥ २. १. १८२ ॥

मुषेर्डिप्रत्ययः, किदुनट् चागमो भवति । मुषुण्डिः प्रहरणम् ॥

॥ १८३ ॥ वेतेर्णिः ॥ २. १. १८३ ॥

वेनेर्णिप्रत्ययो भवति । वेणिः कबरी ॥

॥ १८४ ॥ वितसिवसिसपिपदिभ्यस्तिप् ॥ २. १. १८४ ॥

एभ्यस्तिप्प्रत्ययो भवति । वितस्तिः अर्धहस्त ॥ वस्तिः मूत्राधारः ॥ सप्तिः अश्वः ॥ पत्तिः पदाति ॥

॥ १८५ ॥ भसेर्गट् च ॥ २. १. १८५ ॥

भसेस्तिप्प्रत्ययो गट्चागमो भवति । गभस्तिः रश्मिः ॥

॥ १८६ ॥ यजेस्तिः ॥ २. १. १८६ ॥

यजेस्तिप्प्रत्ययो भवति । यष्टिः दण्ड. ॥

॥ १८७ ॥ कुङो यषुट् च ॥ २. १. १८७ ॥

कवनेस्तिप्प्रत्ययो यषुट्चास्यागमो भवति । कोयष्टिकः पक्षिविशेषः ॥

॥ १८८ ॥ गिरः षुग्घ्रस्वश्च ॥ २. १. १८८ ॥

गिरतेस्तिप्प्रत्ययः षुगागमो भवति ह्रस्वश्च । गृष्टिः सकृत्प्रसूता गौः ॥

॥ १८९ ॥ दृकृषिरिषिविषिमुषिशाशुच्यशिभ्यः क्तिन् ॥ २. १. १८९ ॥

दृणात्यादिभ्यः क्तिन्प्रत्ययो भवति । दृतिः छागादित्वङ्मयो जलाधरः ॥ कृष्टिः पण्डितः ॥ रिष्टिः प्रहरणम् ॥ विष्टिः अवेतन. कर्मकरः ॥ मुष्टिः हस्तसन्निवेशः ॥ शितिः कृष्णः ॥ शुक्तिः मुक्ताद्याधारः ॥ अष्टिः छन्दोविशेषः ॥

॥ १९० ॥ कुचिञोश्चिन्नुक् च ॥ २. १. १९० ॥

कौतेश्चिनोतेश्च क्तिन्प्रत्ययः, चिनुक् चानयोरागमो भवति । कुन्तिः राजा ॥ चिन्तिः राजा ॥

॥ १९१ ॥ अमेरतिः ॥ २. १. १९१ ॥

अमेरतिप्रत्ययो भवति । अमतिः मार्गः ॥

॥ १९२ ॥ युपाभ्यां कित् ॥ २. १. १९२ ॥

आभ्यामतिप्रत्ययः किद्भवति । युवतिः तरुणी ॥ पतिः भर्ता ॥

॥ १९३ ॥ वहिवसिखल्यर्तिभ्यश्चित् ॥ २. १. १९३ ॥

वह्यादिभ्योऽतिप्रत्ययः चिद्भवति । वहतिः गौः ॥ वसतिः ग्रामसन्निवेशः ॥ खलतिः शीर्णकेशः ॥ अरतिः वर्त्म ॥

॥ १९४ ॥ वृञो व्रत च ॥ २. १. १९४ ॥

वृञोऽतिप्रत्ययः चिद्भवति, व्रतादेशश्च । व्रततिः वल्ली ॥

॥ १९५ ॥ वस्यतिभ्यामातिः ॥ २. १. १९५ ॥

आभ्यामातिप्रत्ययो भवति । वसातिः योजनपदम् ॥ अरातिः शत्रुः ॥

॥ १९६ ॥ अभौ यामाभ्याम् ॥ २. १. १९६ ॥

यातिमिनात्योरभावुपपदे आतिप्रत्ययो भवति । अभियातिः शत्रुः ॥ अभिमातिः स एव ॥

॥ १९७ ॥ यजो यश्च ॥ २. १. १९७ ॥

यजो धातोरातिप्रत्ययो भवति, यश्चान्तादेशो भवति । ययातिः राजा ॥

॥ १९८ ॥ अविभूभ्यामन्तिः ॥ २. १. १९८ ॥

आभ्यामन्तिप्रत्ययो भवति । अवन्तिः राजा ॥ भवन्तिः कालः ॥

॥ २०० ॥ शकेरुन्तिः ॥ २. १. २०० ॥

शकेरुन्तिप्रत्ययो भवति । **शकुन्तिः** पक्षी ॥

॥ २०१ ॥ अजिसञ्जयसिभ्यः क्थिन् ॥ २. १. २०१ ॥

अजि सञ्जि असि इत्येतेभ्यः क्थिन्प्रत्ययो भवति । **वीथिः** मार्गः ॥ **सक्थि** ऊरुः ॥ **अस्थि** कीकसम् ॥

॥ २०२ ॥ सारेरथिन् ॥ २. १. २०२ ॥

सारेरथिन्प्रत्ययो भवति । **सारथिः** यन्ता ॥

॥ २०३ ॥ तनेर्डिथिः ॥ २. १. २०३ ॥

तनेर्डिथिप्रत्ययो भवति । **तिथिः** प्रतिपदादिः ॥

॥ २०४ ॥ अतेरिथिः ॥ २. १. २०४ ॥

अतेरिथिप्रत्ययो भवति । **अतिथिः** अभ्यागतः ॥

॥ २०५ ॥ उषेरधिः ॥ २. १. २०५ ॥

उषेरधिप्रत्ययो भवति । **ओषधिः** उद्भिद्विशेषः ॥

॥ २०६ ॥ विदेः किद्रट् च ॥ २. १. २०६ ॥

विदेरधिप्रत्ययः किद्रट् चास्यागमो भवति । **विद्रधिः** व्याधिविशेषः ॥

॥ २०७ ॥ चूर्यगिभ्यां निः ॥ २. १. २०७ ॥

आभ्यां निप्रत्ययो भवति । **चूर्णिः** ॥ **अग्निः** ज्वलनः ।

॥ २०८ ॥ वह्निश्रुश्रियुक्षुभ्यो नित् ॥ २. १. २०८ ॥

वह्यादिभ्यो नित्प्रत्ययो भवति । **वह्निः** पावकः ॥ **श्रोणिः** जघनम् ॥ **श्रेणिः** सङ्घः । निःश्रेणिः सक्रमः ॥ **योनिः** उत्पत्तिस्थानम् ॥ **क्षोणिः** पृथ्वी ॥

॥ २०९ ॥ शाशीङोः ह्रस्वश्च ॥ २. १. २०९ ॥

आभ्यां निप्रत्यय ह्रस्वश्च भवति । **शनिः** सौरि ॥ **शिनिः** यादव. ॥

॥ २१० ॥ घृसृधुवृषिप्रच्छिज्वरित्वरिभ्यः कित् ॥ २. १. २१० ॥

एभ्यो निप्रत्यय किद्भवति । **घृणिः** रश्मि ॥ **सृणिः** अङ्कुशम् ॥ **धुनिः** नदी ॥ **वृष्णिः** यदुविशेष ॥ **पृश्निः** अल्पतनु ॥ **जूर्णिः** पुराण ॥ **तूर्णिः** शीघ्रम् ॥

॥ २११ ॥ पृषेर्वृद्धिश्च ॥ २. १. २११ ॥

पृषेर्निप्रत्ययो वृद्धिश्च भवति । **पार्ष्णिः** पादपश्चाद्भाग ॥

॥ २१२ ॥ ऋतृसृकृधृधम्यश्यविवृतिग्रहि-रजिकटयटिभ्यो निः ॥ २. १. २१२ ॥

एभ्यो निप्रत्ययो भवति । **अरणिः** अग्न्याधारकाष्ठम् ॥ **तरणिः** आदित्य. ॥ **सरणिः** मार्ग ॥ **करणिः** अनुकृति ॥ **धरणिः** पृथ्वी । **धमनिः** मन्था ॥ **अशनिः** वज्रम् ॥ **अवनिः** भू ॥ **वर्तनिः** मार्गः ॥ **ग्रहणिः** जाठराग्न्याधारः ॥ **रजनिः** रात्रिः ॥ **कटनिः** शैलमेखला ॥ **अटनिः** चापकोटिः ॥

॥ २१३ ॥ अदेर्मुट् च ॥ २. १. २१३ ॥

अदेरनिप्रत्ययो भवति, मुट् चागम. । **अद्मनिः** अग्नि. ॥

॥ २१४ ॥ कृषेरादेश्च च ॥ २. १. २१४ ॥

कृषेरनिप्रत्ययः, चकारश्चादेरादेशो भवति । **चर्षणिः** विदग्ध. ॥

॥ २१५ ॥ आङि शुषेस्सनः ॥ २. १. २१५ ॥

आङ्युपपदे शुषेस्सनन्तादनिप्रत्ययो भवति । **आशुशुक्षणिः** ज्वलनः ॥

॥ २१६ ॥ क्षिपेः कित् ॥ २. १. २१६ ॥

क्षिपेरनिप्रत्ययः किद्भवति । **क्षिपणिः** आयुधम् ॥

॥ २१७ ॥ अर्तेरत्निच् ॥ २. १. २१७ ॥

अर्तेरत्निच्प्रत्ययो भवति । अरत्निः उत्कनिष्ठो हस्तः ॥

॥ २१८ ॥ शकेरुनिः ॥ २. १. २१८ ॥

शकेरुनिप्रत्ययो भवति । शकुनिः पक्षी ॥

॥ २१९ ॥ नीदलिभ्यां मिः ॥ २. १. २१९ ॥

आभ्या मिप्रत्ययो भवति । नेमिः चक्रधारा ॥ दल्मिः शङ्कु ॥

॥ २२० ॥ अर्तेरू च ॥ २. १. २२० ॥

अर्तेर्मिप्रत्यय ऊचादेशो भवति । ऊर्मिः तरङ्ग ॥

॥ २२१ ॥ अशे रश च ॥ २. १. २२१ ॥

अशेर्मिप्रत्यय. रशादेशश्च भवति । रश्मिः प्रग्रह ॥

॥ २२२ ॥ भुवः क्मिन् ॥ २. १. २२२ ॥

भुवः क्मिन्प्रत्ययो भवति । भूमिः ॥

॥ २२३ ॥ क्षणेर्दयिः ॥ २. १. २२३ ॥

क्षणतेर्दयिप्रत्ययो भवति । क्षयिः पक्षिविशेषः ॥

॥ २२४ ॥ अङ्किवङ्किमङ्क्यङ्घिसद्यशूभ्यो रिः ॥ २. १. २२४ ॥

एभ्यो रिप्रत्ययो भवति । अङ्क्रिः ॥ वङ्क्रिः परशु ॥ मङ्क्रिः प्रपकः ॥ अङ्घ्रिः पादः ॥ सद्रिः वृक्षविशेष । अश्रिः . [कोटि.] ॥

॥ २२५ ॥ भूसूभ्यां कित् ॥ २. १. २२५ ॥

आभ्या रिप्रत्यय. किद्भवति । भूरि प्रभूतम् ॥ सूरिः पण्डित. ॥

॥ २२६ ॥ रासदिशकिकतिभ्यस्त्रिप् ॥ २. १. २२६ ॥

एभ्यस्त्रिप्प्रत्ययो भवति । रात्रिः रजनी ॥ सत्रिः . . ॥ शक्रिः . . ॥ कत्रिः अद्रि ॥

॥ २२७ ॥ अदेः क्रिश्च ॥ २. १. २२७ ॥

अदे क्रिश्च प्रत्ययो भवति । अत्रिः ॥

॥ २२८ ॥ कुशिविशिभ्याम् ॥ २. १. २२८ ॥

आभ्या क्रिन्प्रत्ययो भवति । कुश्रिः ॥ विश्रिः ॥

॥ २२९ ॥ कुपेर्दुक् च ॥ २. १. २२९ ॥

कुपे क्रिन्प्रत्ययो दुक्चाभ्यागमो भवति । कुद्रिः ॥

॥ २३० ॥ वल्ल्यर्तिकृतिभ्यो रिः ॥ २. १. २३० ॥

एभ्यो रिप्रत्ययो भवति । वल्लरिः लता ॥ अररिः कवाटम् ॥ कर्तरिः केशादि [खण्डनी] ॥

॥ २३१ ॥ अङ्गिजसिसहिभ्य उरिन् ॥ २. १. २३१ ॥

एभ्य उरिन्प्रत्ययो भवति । अङ्गुरिः करशाखा ॥ जसुरिः क्रोढः ॥ सहुरिः सूर्यः ॥

॥ २३२ ॥ पाटयञ्जिभ्यामलिच् ॥ २. १. २३२ ॥

पाटि अञ्जि इत्येताभ्यामलिच्प्रत्ययो भवति । पाटलिः वृक्षविशेषः ॥ अञ्जलिः पाणिस [मूहः] ॥

॥ २३३ ॥ धूञ्मूङ्माङ्शलिभ्यो लिग्लिणौकुलिञ्-मलिच् ॥ २. १. २३३ ॥

धूञादिभ्यो यथासङ्ख्य लिक् लिण् औकुलिच् मलिच् इत्येते प्रत्यया भवन्ति । धूलिः पांसु ॥ मौलिः जूटः ॥ मौकुलिः काक ॥ शाल्मलिः वृक्षविशेषः ॥

॥ २३४ ॥ दॄभ्यां विपॄन् ॥ २. १. २३४ ॥

आभ्या विन्प्रत्ययो भवति । दर्विः तद्रु ॥ पर्विः शकटम् ॥

॥ २३५ ॥ जॄशॄस्तृजागृकृनीघृषिभ्यो क्विन् ॥ २. १. २३५ ॥

एभ्यो क्विन्प्रत्ययो भवति ॥ **जीर्विः** वृद्ध ॥ **शीर्विः** हिंस्र ॥ **स्तीर्विः** गर्विष्ठ ॥ **जागृविः** जागरूक ॥ **कृविः** रुद्र ॥ **नीविः** परिधानग्रन्थि ॥ **घृष्विः** वराह ॥

॥ २३६ ॥ छविस्थविकिकिदीविदीदिव्यटविशिन्नयः ॥ २. १. २३६ ॥

एते शब्दा क्विन्प्रत्ययान्ता निपात्यन्ते [छ्यते] ह्रस्वश्च । **छविः** त्विट् ॥ **स्थविः** प्रसेवकः ॥ किकीति कुर्वन् दीव्यति **किकिदीविः** शाटकः ॥ दीव्यन्त्यस्मिन्निति **दीदिविः** स्वर्ग ॥ अटन्त्यस्यामिति **अटविः** अरण्यम् ॥ शेरतेऽस्मिन् प्रजाः सुख इति **शिनिः** राजा ॥

॥ २३७ ॥ प्लुषिशुषिकुषिभ्यस्सिक् ॥ २. १. २३७ ॥

एभ्यः सिक्प्रत्ययो भवति । **प्लुक्षिः** दहनः ॥ **शुक्षिः** यवासकः ॥ **कुक्षिः** कोष्ठैकदेश ॥

॥ २३८ ॥ अशेर्नित् ॥ २. १. २३८ ॥

अश्नोते सिक्प्रत्ययो निद्भवति । **अक्षि** चक्षुः ॥

॥ २३९ ॥ गोपादिष्वनेरसिः ॥ २. १. २३९ ॥

अनेर्गोपादिषूपपदेषु असिप्रत्ययो भवति । **गोपानसिः** सौधाग्रभागच्छदिः ॥ चित्तानसि जलचरः ॥ एकानसिः उज्जयिनी ॥ वाराणसिः काशी ॥

॥ २४० ॥ वृपृसाभ्यो नुट् च ॥ २. १. २४० ॥

एभ्यः सिप्रत्ययो भवति नुट्चास्यागम । **वर्णुसिः** माता ॥ **पर्णुसिः** जलचरः ॥ **सानुसिः** शाखा ॥

॥ २४१ ॥ व्रियो हिक् ॥ २. १. २४१ ॥

वृणातेः हिक्प्रत्ययो भवति । **व्रीहिः** धान्यविशेषः ॥

॥ २४२ ॥ अवितृस्तृतन्द्रितन्त्रिभ्य ईः ॥ २. १. २४२ ॥

अव्यादिभ्य ईप्रत्ययो भवति । अवीः प्रकाशः ॥ तरीः अग्नि ॥ स्तरीः धूम ॥ तन्द्रीः मोहनिद्रा ॥ तन्त्रीः वीणादिगुण ॥

॥ २४३ ॥ वाते प्रमः कित् ॥ २. १. २४३ ॥

प्रपूर्वान्मातेः वातशब्द उपपदे ईप्रत्यय किद्भवति । वातप्रमीः वातमृग· ॥

॥ २४४ ॥ यापो द्वे च ॥ २. १. २४४ ॥

यापाभ्यामीप्रत्यय किद्भवति, द्विर्वचनं चानयो भवति । ययीः अश्व. ॥ पपीः सूर्य. ॥

॥ २४५ ॥ लक्षेर्मुट् च ॥ २. १. २४५ ॥

लक्षेरीप्रत्यय मुट्चास्यागमो भवति । लक्ष्मीः श्री ॥

॥ २४६ ॥ तुवः कित् ॥ २. १. २४६ ॥

"तु" इति सौत्रो धातु· वृद्धौ बले च वर्तते । तत. कित्प्रत्ययो भवति । तुक् अपत्यम् ॥

॥ २४७ ॥ स्रुवश्चिक् ॥ २. १. २४७ ॥

स्रुवतेश्चिक्प्रत्ययो भवति । स्रुक् जुहूपभृदादि ॥

॥ २४८ ॥ तनेरनश्च वः ॥ २. १. २४८ ॥

तनेश्चिक्प्रत्यय· नशब्दस्य वकारादेशो भवति । त्वक् शरीरादि-वेष्टनम् ॥

॥ २४९ ॥ पारेरजिः ॥ २. १. २४९ ॥

पारेरजिप्रत्ययो भवति । पारक् प्राकारः ॥

॥ २५० ॥ भिषेः कित् ॥ २. १. २५० ॥

भिषेरजिप्रत्ययो भवति । भिषक् चिकित्सकः ॥

॥ २५१ ॥ **पणेरिज्यादेश्च वः** ॥ २. १. २५१ ॥

पणेरिजिप्रत्ययः आदेश्च वकारादेशो भवति । **वणिक्** वैदेशकः ॥

॥ २५२ ॥ **वशेः कित्** ॥ २. १. २५२ ॥

वशेरिजिप्रत्यय किद्भवति । **उशिक्** कान्त ॥

॥ २५३ ॥ **भृञ उच्च** ॥ २. १. २५३ ॥

भृञ इजिप्रत्यय कित् उकारश्चान्तादेशो भवति । **भुरिक्** अक्षराधिकपादछन्द· ॥

॥ २५४ ॥ **लङ्घेरटिर्नलोपश्च** ॥ २. १. २५४ ॥

लङ्घेरटिप्रत्ययो नलोपश्च भवति । **लघट्** लघु· शकटम् ॥

॥ २५५ ॥ **सर्तेरडिः** ॥ २. १. २५५ ॥

सर्तेरडिप्रत्ययो भवति । **सरट्** उष्ट्रजाति· ॥

॥ २५६ ॥ **ईडेरबिडिर्ह्रस्वश्च** ॥ २. १. २५६ ॥

ईडेरबिडिप्रत्ययो ह्रस्वश्च भवति । **इडबिट्** विश्रवा ॥

॥ २५७ ॥ **भातेर्डवतुः** ॥ २. १. २५७ ॥

भातेर्डवतुप्रत्ययो भवति । तत्र **भवान्** पूज्य ॥

॥ २५८ ॥ **बृंहिमहिपृषिभ्योऽतिः शतृवच्च** ॥ २. १. २५८ ॥

एभ्यो धातुभ्य अतिप्रत्ययः शतृवद्भवति । तेनैषां गुणाभावो गित्कार्यादीनि भवन्ति । **बृहत्** अलघु । बृहती महती ॥ गुरु· **महती** ॥ **पृषत्** जलबिन्दु· । पृषती ॥

॥ २५९ ॥ **गमेर्डित् द्वे च** ॥ २. १. २५९ ॥

गमेरतिप्रत्यय· शतृवत् द्विर्वचनं च भवति । **जगत्** विश्वम् । जगती पृथ्वी ॥

॥ २६० ॥ संश्चत्तृपद्वेहदित्यादयः ॥ २. १. २६० ॥

एतेऽतिप्रत्ययान्ता निपात्यन्ते । सश्चिनोतीति **संश्चत्** कुहरम् ॥ तृपतीति **तृपत्** चन्द्रमा ॥ विहन्ति गर्भमिति **वेहत्** अप्रसवा गौः । आदि-ग्रहणात् देहद्वियत्पुरीतदादयो भवन्ति ॥

॥ २६१ ॥ हृसृरुहियुषिभ्य इतिः ॥ २. १. २६१ ॥

एभ्य इतिप्रत्ययो भवति । **हरित्** वर्ण ॥ **सरित्** नदी ॥ **रोहित्** मृगजाति ॥ **योषित्** स्त्री ॥

॥ २६२ ॥ ताडेर्णिलुक् च ॥ २. १. २६२ ॥

ताडेरितिप्रत्ययो णिलुक् च भवति । **तडित्** विद्युत् ॥

॥ २६३ ॥ उदके श्वेर्डितिः ॥ २. १. २६३ ॥

श्वयतेरुदके उपपदे डितिप्रत्ययो भवति । **उदश्वित्** तक्रम् । संज्ञायामुदकस्योदभाव. ॥

॥ २६४ ॥ मृङ उतिः ॥ २. १. २६४ ॥

मृङ उतिप्रत्ययो भवति । **मरुतः** देवा ॥

॥ २६५ ॥ ग्रो मुट् च वा ॥ २. १. २६५ ॥

गिरते उतिप्रत्ययो मुट् चास्य वागमो भवति । **गरुत्** बर्हि ॥ **गर्मुत्** तृणम् ॥

॥ २६६ ॥ शके ऋतिः ॥ २. १. २६६ ॥

शकेः ऋतिप्रत्ययो भवति । **शकृत्** पुरीषम् ॥

॥ २६७ ॥ यजेः कश्च ॥ २. १. २६७ ॥

यजे. ऋतिप्रत्यय· कश्चान्तादेशो भवति । **यकृत्** दहरपटम् ॥

॥ २६८ ॥ पातेः कृथिः ॥ २. १. २६८ ॥

पातेः कृथिप्रत्ययो भवति । पातीति **पृथिः** प्रपूर्नाम क्षत्रिय ॥

॥ २६९ ॥ युष्यसिभ्यां मदिक् ॥ २. १. २६९ ॥

आभ्या मदिक्प्रत्ययो भवति । युष्मद् अस्मद् इति सर्वनाम्ना प्रत्यक्परमात्मानावभिधीयेते ॥

॥ २७० ॥ त्यजितनियमिभ्यो डतिः ॥ २. १. २७० ॥

त्यजादिभ्यः डतिप्रत्ययो भवति ॥ त्यद् तद् यद् । [त्यद् तद् इति सर्वना]मभ्या पूर्वप्रकान्त परामृश्यते । यदित्यनेन तु सर्वनाम्नैव कार्ये क्रियमाणमुद्दिश्यते ॥

॥ २७१ ॥ एतेस्तदिः ॥ २. १. २७१ ॥

एतेस्तदिप्रत्ययो भवति । एतत् । [अनेन] प्रकृतमपरोक्ष पुरस्स्थित-मुपदिश्यते ॥

॥ २७२ ॥ शृदृभसिभ्योऽदिः ॥ २. १. २७२ ॥

एभ्योऽदिप्रत्ययो भवति । शरत् कालविशेष ॥ दरत् नाम जनपदः ॥ भसत् जघनम् ॥

॥ २७३ ॥ पुरः सुट् च ॥ २. १. २७३ ॥

पिपर्तेरदिप्रत्यय. सुट्चास्यागमो भवति। पर्षत् सभा ॥

॥ २७४ ॥ दृणातेर्ह्रस्वश्च ॥ २. १. २७४ ॥

दृणातेरदिप्रत्ययो भवति ससुट्कश्च । दृषत् शिला ॥

॥ २७५ ॥ द्वि[युवृषितक्षिराजिधन्विपचिद्यु]प्रतिदिवभ्यः कनिन् ॥ २. १. २७५ ॥

युप्रभृतिभ्य कनिन्प्रत्ययो भवति । [योषा ॥] वृषा इन्द्र. ॥ तक्षा वर्धकि ॥ राजा पार्थिवः ॥ धन्वा निर्जलो देशः ॥ पञ्च सङ्ख्या ॥ द्युवा अर्हगता [?] प्रतिदिवा व्योम ॥

॥ २७६ ॥ सप्यशूभ्यां तुट् च ॥ २. १. २७६ ॥

"सपि." सौत्रो धातुः । "अशू व्याप्तौ" इत्येताभ्यां कनिन्-प्रत्यय', तु चास्यागमो भवति । सप्त सङ्ख्या ॥ अष्ट सङ्ख्या ॥

॥ २७७ ॥ नुदाशिभ्यां गुणश्च ॥ २. १. २७७ ॥

नुदाशिभ्यां कनिन्प्रत्ययो गुणश्च नोनेर्भवति । नव सङ्ख्या ॥ दश सङ्ख्या ॥

॥ २७८ ॥ श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्मूर्धन्मज्जन्नर्यमन्-
विश्वप्सन्परिज्यन्मातरिश्वन्मघवन्ग्रावन्नहन्-
महन्नथर्वन्निति ॥ २. १. २७८ ॥

एते कनिन्प्रत्ययान्ता निपात्यन्ते । श्वयतीति श्वा सारमेयः ॥ उक्षतीति उक्षा वृषः ॥ पुषिप्लीहोः दीर्घत्वम् । पूषा सूर्यः ॥ प्लीहा शरीरान्तरावयवः ॥ क्लिदेर्गुणः, क्लेदा चन्द्रः ॥ मज्जतीति मज्जा अस्थिसारः ॥ मूर्छतीति मूर्धा शिरः ॥ अरीणामयनं अर्यमा सूर्यः ॥ विश्वं प्साति विश्वप्सा कालः ॥ परि जयतीति परिज्या सूर्यः ॥ मातरि अन्तरिक्षे श्वयतीति मातरिश्वा वायुः ॥ मङ्खतीति मघवा इन्द्रः ॥ ग्रसत इति ग्रावा पर्वतः ॥ अहन्त इति अहन् दिवसः ॥ मह करोतीति महान् महत्त्वम् ॥ न थर्वतीति अथर्वा ऋषिः । इतिकरणादन्येऽपि स्नेहादयो भवन्ति ॥

॥२७९॥ स्नामदिपद्यर्ति[पर्वि]शकिभ्यो वनिप् ॥ २. १. २७९ ॥

स्नाप्रभृतिभ्यो वनिप्प्रत्ययो भवति । स्नावा स्नायुः ॥ मद्वा हसः ॥ पद्वा पादः ॥ अर्वा अश्वः ॥ पर्व ग्रन्थिः ॥ शक्वा वर्धकिः । शक्वरी छन्दः । शाकर वृषः ॥

॥ २८० ॥ शीङ्क्रुशिरुहिजिक्षिहृसृवृभ्यः
क्वनिप् ॥ २. १. २८० ॥

शीडादिभ्यः क्वनिप्प्रत्ययो भवति । शीवा अजगरः ॥ क्रुश्वा सृगालः ॥ रुह्वा वृक्षः ॥ जित्वा धर्मः । जित्वरी वाराणसी ॥ क्षित्वा मृत्युः ॥ हृत्वा रुद्रः ॥ सृत्वा कालः ॥ वृत्वा आकाशम् ॥

॥ २८१ ॥ सृजेः कश्च ॥ २. १. २८१ ॥

सृजेः क्वनिप्प्रत्यय, कश्चान्तादेशो भवति । सृक्वणी आस्योपान्तौ ॥

॥ २८२ ॥ ध्याप्योः संप्रसारणं च ॥ २. १. २८२ ॥

"ध्यै" "प्यै" इत्येतयो क्वनिप्प्रत्यय प्रसारणं च भवति । धीवा मनीषी ॥ पीवा पीन ॥

॥ २८३ ॥ अतेर्धश्च ॥ २. १. २८३ ॥

अते क्वनिप्प्रत्ययो धश्चान्तादेशो भवति । अध्वा मार्ग ॥

॥ २८४ ॥ मनिन् ॥ २. १. २८४ ॥

सर्वधातुभ्यो बहुल मनिन्प्रत्ययो भवति । कर्म व्यापार ॥ चर्म अजिनम् ॥ मर्म शरीरदेश ॥ वर्म सन्नाह ॥ शर्म सुखम् इत्यादि ॥

॥ २८५ ॥ व्योमन्रोमन्लोमन्क्लोमन्हेमन्वेमन्लामन्-ललामन्नात्मन्यक्ष्मन्पक्ष्मन्नूष्मन्वर्ष्मन्सीमन्ब्रह्मन्निति ॥ २. १. २८५ ॥

व्योमादयो मनिन्प्रत्ययान्ता निपात्यन्ते । व्ययतीति व्योम आकाशम् ॥ रोहतीति रोम तनूरुहम् ॥ तस्यैव लत्वेन लोम तदेव ॥ क्लाम्यतीति क्लोम शरीरान्तरवयव. ॥ जहाति जिहीते वा तदिति हेम हिरण्यम् ॥ वयन्त्यनेनेति वेम तन्तुवायोपकरणम् ॥ लान्ति ललाम भूषणम् ॥ अततीति आत्मा क्षेत्रज्ञ. ॥ पातयतीति पाप्मा अधर्म ॥ यस्यत्यनेनेति यक्ष्मा रोगः ॥ पच्यते तदिति पक्ष्मा अक्ष्यादिरोम ॥ उषतीति ऊष्मा अनाविर्भूतरूप तेजः ॥ वर्धतेऽसौ वर्ष्म शरीरम् ॥ स्यसतीति सीमा आघाट ॥ बृहतीति ब्रह्म आत्मतत्त्वम् । इति करणात् रुक्मतोक्मशुष्मादयो भवन्ति ॥

॥ २८६ ॥ गमेरिनिः ॥ २. १. २८६ ॥

गमेरिनिप्रत्ययो भवति । गमिष्यतीति गमी पथिकादि ॥

॥ २८७ ॥ आङि च णित् ॥ २. १. २८७ ॥

गमे केवलात् आङि चोपपदे इनिप्रत्ययो णिद्भवति। गामी प्रस्थितादिः ॥ आगामी प्रोषितादि ॥

॥ २८८ ॥ भुवश्च ॥ २. १. २८८ ॥

भुवश्च इनिप्रत्ययो णिद्भवति। भावी कर्मविपाकादिः ॥

॥ २८९ ॥ प्रे स्थश्च ॥ २. १. २८९ ॥

तिष्ठते धातोः प्र उपपदे इनिप्रत्ययो भवति। प्रस्थादिः पथिकादिः ॥

॥ २९० ॥ यातेः प्रतौ च ॥ २. १. २९० ॥

याते. धातोः चकारात् प्रेचोपपदे इनिप्रत्ययो णिद्भवति। प्रतियायी प्रयायी ॥

॥ २९१ ॥ बुधेश्च ॥ २. १. २९१ ॥

बुधश्च प्रतौ प्रे चोपपदे इनिप्रत्ययो भवति। प्रतिबोधी प्रबोधी बोद्धादि ॥

॥ २९२ ॥ परमे स्थः कित् ॥ २. १. २९२ ॥

तिष्ठतेः परमे उमपदे इनिप्रत्यय किद्भवति। परमेष्ठी ब्रह्मा ॥

॥ २९३ ॥ मन्थाः ॥ २. १. २९३ ॥

मथ्नातेरिनिप्रत्ययो भवति, किद्वत्। मन्थाः मन्थानौ। क्षुब्धा ॥

॥ २९४ ॥ पतेः थश्च ॥ २. १. २९४ ॥

पतेरिनिप्रत्यय थश्चान्तादेशो भवति। पन्थाः पन्थानौ। मार्ग. ॥

॥ २९५ ॥ अर्तेर्भुक्षिनक् ॥ २. १. २९५ ॥

अर्तेर्धातोः भुक्षिनक्प्रत्ययो भवति। ऋभुक्षाः ऋभुक्षाणौ। इन्द्रः॥

॥ २९६ ॥ हृजनिभ्यामिमनिच् ॥ २. १. २९६ ॥

आभ्यामिमनिच्प्रत्ययो भवति । **हरिमा** पाप्मविशेषः ॥ **जनिमा** धर्मविशेष. ॥

॥ २९७ ॥ भृवृस्तुसूभ्य ईमनिच् ॥ २. १. २९७ ॥

एभ्य ईमनिच्प्रत्ययो भवति । **भरीमा** क्षमी ॥ **वरीमा** तपस्वी ॥ **स्तरीमा** प्रावार ॥ **सवीमा** प्रसूति ॥

॥ २९८ ॥ आपः क्विन् ह्रस्वश्च ॥ २. १. २९८ ॥

आप्नोते क्विन्प्रत्ययो ह्रस्वश्च भवति । **आपः** पानीयम् ॥

॥ २९९ ॥ ककुप्त्रिष्टुबनुष्टुभः ॥ २. १. २९९ ॥

ककुभादयः क्विन्प्रत्ययान्ता निपात्यन्ते । क वायुं ब्रह्म वा स्तभ्नातीति **ककुभः** दिश ॥ त्रीन् लोकान् स्तभ्नातीति **त्रिष्टुप्** । .. [अश्नुते] पर्याप्नोतीति **अनुष्टुप्** छन्द ॥

॥ ३०० ॥ इणो दमिक् ॥ २. १. ३०० ॥

एते. दमिक्प्रत्ययो भवति । **इदम्** । अनेन सर्वनाम्ना प्रत्यक्षमपदिश्यते ॥

॥ ३०१ ॥ कौतेर्डिमिः ॥ २. १. ३०१ ॥

कौते डिमिप्रत्ययो भवति । **किम्** । अनेन सर्वनाम्ना विज्ञातो वस्तुविशेषः प्रर्यनुयुज्यते ॥

॥ ३०२ ॥ अवतेर्मिः ॥ २. १. ३०२ ॥

अवतेः मिप्रत्ययो भवति । **ओम्** ब्रह्म ॥

॥ ३०३ ॥ गॄपॄदुर्वीधुर्वीभ्यः क्विप् ॥ २. १. ३०३ ॥

गिरत्यादिभ्यः क्विप्प्रत्ययो भवति । **गीः** वाक् ॥ **पूः** नारी [पुरी] ॥ **दूः** देहान्तरवयव ॥ **धूः** शकटम् ॥

॥ ३०४ ॥ वाद्वारौ ॥ २. १. ३०४ ॥

वार् द्वार् इत्येतौ शब्दौ क्विन्तौ निपात्येते । वृणोतीति वाः पनीयम् । वृण्वन्ति · [मार्गमिति] द्वाः ॥

॥ ३०५ ॥ चनेरुरन् ॥ २. १. ३०५ ॥

चनेरुरन्प्रत्ययो भवति । चन्शुरः सङ्ख्या ॥

॥ ३०६ ॥ दिवेर्डिविः ॥ २. १. ३०६ ॥

दिवे डिविप्रत्ययो भवति । द्यौः स्वर्ग ॥

॥ ३०७ ॥ विशः क्विप् ॥ २. १. ३०७ ॥

विश क्विप्प्रत्ययो भवति । विट् वैश्य ॥

॥ ३०८ ॥ विपाशेश्च ॥ २. १. ३०८ ॥

विपाशेश्च क्विप्प्रत्ययो भवति । विपाट् नदी ॥

॥ ३०९ ॥ सहेः षप् च ॥ २. १. ३०९ ॥

सहे. क्विप्प्रत्ययो भवति, ष चास्यागमो भवति । षट् सङ्ख्या ॥

॥ ३१० ॥ सजुषाशिषौ ॥ २. १. ३१० ॥

सजुष् आशिष् इत्येतौ निपात्येते । सह जुषन्तेऽस्यामिति सजूः संप्रीतिः ॥ आ [शास्यत इति] आशीः इष्टार्थप्रार्थनम् ॥

॥ ३११ ॥ अर्चिरुचिशुचिहुसृपिछदिछर्दिभ्य इसिः

॥ २. १. ३११ ॥

एभ्य इसिप्रत्ययो भवति । अर्चिः दीप्तिः ॥ रोचिः तेज. ॥ शोचिः तदेव ॥ हविः पुरोडाशादि ॥ सर्पिः घृतम् ॥ छदिः आवरणम् ॥ छर्दिः वमनम् ॥

॥ ३१२ ॥ बृंहेर्नलोपश्च ॥ २. १. ३१२ ॥

बृहेरिसिप्रत्ययो नलोपश्च भवति । बर्हिः शिखी ॥

॥ ३१३ ॥ द्युतेर्निदादेश्च जः ॥ २. १. ३१३ ॥

द्युतेरिसिप्रत्ययो निदादेश्च जकारादेशो भवति । ज्योतिः प्रकाश ॥

॥ ३१४ ॥ सहो घ च ॥ २. १. ३१४ ॥

सहेरिसिप्रत्यय घश्चान्तादेशो भवति । सिधिः सुखम् ॥

॥ ३१५ ॥ जनेरुसिः ॥ २. १. ३१५ ॥

जनेरुसिप्रत्ययो भवति । जनुः जन्म ॥

॥ ३१६ ॥ अर्तिपॄवपियजिधनिभ्यो नित् ॥ २. १. ३१६ ॥

अर्त्यादिभ्य उसिप्रत्ययो निद्भवति । अरुः क्षतम् ॥ परुः पर्व ॥ वपुः शरीरम् ॥ यजुः अच्छन्दा श्रुति. ॥ धनुः चापम् ॥

॥ ३१७ ॥ इणो णित् ॥ २. १. ३१७ ॥

इण उसिप्रत्ययो णिद्भवति । आयुः जीवितम् ॥

॥ ३१८ ॥ चक्षेरसिक् च ॥ २. १. ३१८ ॥

चक्षेरसिक्प्रत्ययः, चकारादुसिश्च भवति । सचक्षा ऋत्विक् ॥ नृचक्षा राक्षसः ॥ चक्षः ख्यातिः । चक्षु नयनम् ॥

॥ ३१९ ॥ पातेर्डुंसुन् ॥ २. १. ३१९ ॥

पातेर्डुंसुन्प्रत्ययो भवति । पुमान् पुरुषः । उकार उगित्कार्यार्थं ॥

॥ ३२० ॥ यमिदमिभ्यां डोस् ॥ २. १. ३२० ॥

आभ्या डोस्प्रत्ययो भवति । योः विषयसुखम् ॥ दोः बाहु ॥

॥ ३२१ ॥ असुन् ॥ २. १. ३२१ ॥

सर्वधातुभ्यो बहुलमसुन्प्रत्ययो भवति । सरतीति सर तटाकम् ॥ मह्यतीति मह तेजः ॥ एव मनुते इति मन चेत इत्यादि ॥

॥ ३२२ ॥ पिबतेरिच्च ॥ २. १. ३२२ ॥

पिबतेरसुन्प्रत्ययः इकारश्चान्तादेशो भवति । पीयत इति पयः पानीयम् ॥

॥ ३२३ ॥ यजेः श च ॥ २. १. ३२३ ॥

यजेरसुन्प्रत्यय. शकारश्चान्तादेशो भवति । यशः कीर्ति ॥

॥ ३२४ ॥ उषिरञ्जिशॄभूभ्यः कित् ॥ २. १. ३२४ ॥

उष्यादिभ्योऽसुन्प्रत्यय किद्भवति । उषः सन्ध्या ॥ रजः आत्मगुण· ॥ शिरः उत्तमाङ्गम् ॥ भुवः अन्तरिक्षम् ॥

॥ ३२५ ॥ वस्यहिभ्यां णित् ॥ २. १. ३२५ ॥

आभ्यामसुन्प्रत्ययो णिद्भवति । वासः वस्त्रम् ॥ आगः व्यलीकम् ॥

॥ ३२६ ॥ उषेर्जश्च ॥ २. १. ३२६ ॥

उषेरसुन्प्रत्यय जकारश्चान्तादेशो भवति । ओजः बलम् ॥

॥ ३२७ ॥ वहेः सुट् च ॥ २. १. ३२७ ॥

वहे. असुन्प्रत्यय· सुट्चास्यागमो भवति । वक्षः भुजान्तरम् ॥

॥ ३२८ ॥ स्रुरीभ्यां तुट् च ॥ २. १. ३२८ ॥

आभ्यामसुन्प्रत्ययः, तुट्चास्य भवति । स्रोतः निर्झर· ॥ रेतः शुक्रम् ॥

॥ ३२९ ॥ इणो नुट् च ॥ २. १. ३२९ ॥

एतेरसुन् नुट्चास्य भवति ॥ एतीति एनः पापम् ॥

॥ ३३० ॥ शीङः फट् च ॥ २. १. ३३० ॥

शीङोऽसुन्प्रत्यय· फट्चास्यागमो भवति । शेफः शिश्नम् ॥

॥ ३३१ ॥ छदिरहो नुट् ह्रस्वश्च ॥ २. १. ३३१ ॥

आभ्यामसुन्प्रत्ययः नुट् ह्रस्वश्च भवति । छन्दः गायत्र्यादि ॥ **रंहः** वेगः ॥

॥ ३३२ ॥ **अमेर्भुक् च** ॥ २. १. ३३२ ॥

अमेरसुन्प्रत्ययः भुक् चास्यागमो भवति । **अम्भः** पानीयम् ॥

॥ ३३३ ॥ **अर्तेरुच्च** ॥ २. १. ३३३ ॥

अर्तेरसुन्प्रत्ययः उकारश्चान्तादेशो भवति । **उरः** बाहुमध्यम् ॥

॥ ३३४ ॥ **व्याधौ शुट् च** ॥ २. १. ३३४ ॥

अर्तेर्व्याधावभिधेयेऽसुन्प्रत्ययः शुट् चास्यागमो भवति। **अर्शांसि** गुदादि-किलासम् [कीलम्] ॥

॥ ३३५ ॥ **उदके नुट् च** ॥ २. १. ३३५ ॥

अर्तेरुदकेऽर्थेऽसुन्प्रत्ययः नुट् चास्यागमो भवति। इयर्तीति **अर्णः** जलम् ॥

॥ ३३६ ॥ **पातेस्थुट् च** ॥ २. १. ३३६ ॥

पातेरुदकेऽर्थेऽसुन्प्रत्यय· थुट् चास्यागमो भवति । **पाथः** उदकम् ॥

॥ ३३७ ॥ **बले जुट् च** ॥ २. १. ३३७ ॥

पातेर्बलेऽर्थेऽसुन्प्रत्ययः जुट् चास्यागमो भवति । पातीति **पाद्** बलि· ॥

॥ ३३८ ॥ **यातेर्दुक् च** ॥ २. १. ३३८ ॥

यातेरसुन्प्रत्ययो दुक् चास्यागमो भवति । **यादांसि** जलजन्तव. ॥

॥ ३३९ ॥ **नभेश्चित्** ॥ २. १. ३३९ ॥

नभेरसुन्प्रत्ययः चिद्भवति । **नभः** आकाशम् ॥

॥ ३४० ॥ **इन्धेर्नलोपश्च** ॥ २. १. ३४० ॥

इन्धेरसुन्प्रत्ययः नलोपश्च भवति । **एधः** इन्धनम् ॥

॥ ३४१ ॥ **आपो ह्रस्वो नुट् च वा** ॥ २ १. ३४१ ॥

आप्नोतेरसुन्प्रत्ययो ह्रस्वश्च भवति, नुट् चास्य वा । अपः सत्कर्म ॥ [अप्नः] तदेव ॥

॥ ३४२ ॥ **अदेर्नुं धश्च वा** ॥ २. १. ३४२ ॥

अदेरसुन्प्रत्ययः नुमागमो धकारश्चान्तादेशो वा भवति । **अन्धः** अन्नम् ॥ **अदः** । अनेन सर्वनाम्ना प्रत्यक्षमपि प्रकृष्टमप्रत्यक्षं बुद्धिस्थमपदिश्यते ॥

॥ ३४३ ॥ **इण्विधिभ्यामसिः** ॥ २. १. ३४३ ॥

आभ्यामसिप्रत्ययो भवति । **अयः** लोहः ॥ "विध" इति विधानार्थः सौत्रो धातुः । **वेधाः** प्रजापतिः ॥

॥ ३४४ ॥ **पुरोरेतःपयस्सु दधः कित्** ॥ २. १. ३४४ ॥

दधातेः पुरःप्रभृतिषूपपदेषु असिः किद्भवति । **पुरोधाः** पुरोहितः ॥ **रेतोधाः** जनकः ॥ **पयोधाः** पर्जन्यः ॥

॥ ३४५ ॥ **रेपस्रेक्णसूधस्विहायसोकस्सुमनस्पुरूरवस्पुरुदंसोनेहसङ्गिरोऽप्सरसः** ॥ २. १. ३४५ ॥

रेपःप्रभृतयः शब्दा असिप्रत्ययान्ता निपात्यन्ते । रेपतीति **रेपः** पापम् ॥ रिणक्तीति **रेक्णः** धनम् ॥ ऊब्धन्त इति **ऊधः** आपीनम् ॥ विजहातीति **विहायः** आकाशम् ॥ उचन्त्यस्मिन्निति **ओकः** सदनम् ॥ सुष्ठु मानयन्तीति **सुमनसः** पुष्पाणि ॥ पुरु रौति **पुरूरवाः** ऐलः ॥ पुरु दसतीति **पुरुदंसाः** इन्द्रः ॥ न ईहते **अनेहाः** कालः ॥ अङ्गतीति **अङ्गिराः** ऋषिः ॥ अद्भ्यः सरन्ति **अप्सराः** देवगणिका ॥

॥ ३४६ ॥ **वशेः कनसिः** ॥ २. १. ३४६ ॥

वशेः कनसिप्रत्ययो भवति । **उशना** शुक्रः ॥

॥ ३४७ ॥ **दमेरुनसिः** ॥ २. १. ३४७ ॥

दमेरुनसिप्रत्ययो भवति । **दमुनाः** अग्निः । केचित् दीर्घं पठन्ति । **दमूनाः** ॥

॥ ३४८ ॥ **चदेरमसिः** ॥ २. १. ३४८ ॥

चदिधातोरमसिप्रत्ययो भवति । **चन्द्रमाः** निशाकरः ॥

॥ ३४९ ॥ **अनसि वहेः क्विप् डश्चानसः** ॥ २. १. ३४९ ॥

अनस्युपपदे वहेः क्विप्प्रत्ययः डश्चानसोऽन्तादेशो भवति । अनो वहति **अनड्वान्** सौरभेयः ॥

इति श्रीदण्डनाथनारायणभट्टविरचितायां सरस्वतीकण्ठाभरणस्य वृत्तौ हृदयहारिण्यां द्वितीयस्याध्यायस्य प्रथमः पादः ॥



॥ श्री ॥

॥ अथ द्वितीयः पादः ॥

॥ ३५० ॥ जीवेरातृकन् वृद्धिश्च ॥ २. २. १ ॥

जीवयतेरातृकन्प्रत्ययो वृद्धिश्च भवति । जैवातृकः वैद्य ॥

॥ ३५१ ॥ इण्भीकापाशल्यतिमर्चिनिहाङ्भ्यः कन् ॥ २. २. २ ॥

इणादिभ्य कन्प्रत्ययो भवति । एकः सख्याविशेष. ॥ भेकः दर्दुरः ॥ काकः वायस. ॥ पाकः बाल ॥ शल्क वल्कलम् ॥ अत्कः वायु ॥ मर्कः असुरः ॥ निहाका गोधा ॥

॥ ३५२ ॥ युशुघुविधूञां दीर्घश्च ॥ २. २. ३ ॥

युप्रभृतिभ्यः कन्प्रत्ययो दीर्घश्चैषा गुणापवादी भवति । यूका क्षुद्रजन्तुः ॥ शूका हृल्लेख ॥ घूकः कौशिक ॥ वीका पक्षिजाति ॥ धूका पताका ॥

॥ ३५३ ॥ कुतुस्तुयिकृदाधारार्चित्रलिकलिभ्यः कः ॥ २. २. ४ ॥

एभ्यः कप्रत्ययो भवति । कोकः चक्रवाकः ॥ तोकम् अपत्यम् ॥ स्तोकम् अल्पम् ॥ ऊकः कुन्दम ॥ कर्तः कल्कम् ॥ दाकः यत्नः ॥ धाकः ओदन ॥ राकः पौर्णमासी ॥ अर्कः सूर्य ॥ वल्कं त्वक् ॥ कल्कः कषायः ॥

॥ ३५४ ॥ कृसृवृविपुषिमुषिमूङ्शुभूभ्यः कित् ॥ २. २. ५ ॥

कृप्रभृतिभ्य॰ कप्रत्यय किद्भवति। कृकं शिरोग्रीवम् ॥ सृका आयुधविशेष॰ ॥ वृकः श्वापदविशेष॰ ॥ विकः करिपोत. ॥ पुष्कः कासारम् ॥ मुष्कः अण्डम् ॥ मूकः अवाक् ॥ शुकः पक्षी ॥ भूकः कालः ॥

॥ ३५५ ॥ निष्कतुरुष्कोदर्कालर्कशुल्कश्वफल्ककिञ्जल्कोल्कछेककेकादयः ॥ २. २. ६ ॥

निष्कादय॰ कप्रत्ययान्ता निपात्यन्ते। नासार्धर्च [?] निष्कं सुवर्णादि ॥ तुरेरुषक्। तुरुष्कः म्लेच्छ ॥ उद्यरिति निच्च। उदर्कः क्रियाफलम् ॥ अलेररक् च। अलर्कः उन्मत्तक श्वा ॥ शलेरुच्चोपधायाः। शुल्कं रक्षानिर्वेश॰ ॥ शुनि फाले ह्रस्वश्च। श्वफल्कः अन्धकविशेषे ॥ किमिञ्जो रश्च लः। किञ्जल्कः पुष्परजः ॥ ज्वलेर्जलोपो व॰ सम्प्रसारण च। उल्का औत्पत्तिकं ज्योति ॥ छत्रकायत्योरेत्व च। छेकः मनीषी ॥ केका मयूरवाक्। आदिग्रहणात् ऋकास्पृकावृकादयो भवन्ति ॥

॥ ३५६ ॥ कृसृभृवृस्तुकुक्षुचरिचटिचणितम्यमिदेविकनिमनिपचिमचिमशिक्षारिकुरिवृतिवल्लिमल्लिसल्ल्यलिभ्यो वुन् ॥ २. २. ७ ॥

कृसृतिभ्यो वुन्प्रत्ययो भवति। करकः भृङ्गारकः। करका वर्षपाषाणः ॥ सरकः मद्यविशेषः। सरका मधुपानवार ॥ भरकः गोण्यादि ॥ वरकः वाजसनेय [शाखा] ॥ स्तबकः पुष्पगुच्छ ॥ कवकं अभक्ष्यद्रव्यविशेष. ॥ क्षवकः राजसर्षपम् ॥ चरकः मुनि ॥ चटकः पक्षी ॥ चणकः मुनिः ॥ तमकः व्याधि॰ ॥ अमका शैलम् ॥ देवका अप्सरा। देविका नदी ॥ कनक सुवर्णम् ॥ मेनका अप्सरा ॥ पेचकः हस्तिजघनभाग. ॥ मेचकः वर्ण॰। "मनिपचिवशा नाष्टि" इत्येकार॰ ॥ मशकः क्षुद्रजन्तु॰ ॥ क्षारकः बालमुकुलम् ॥ कोरकं प्रौढमुकुलम् ॥ वर्तका वर्तिका वा शकुनः ॥ वल्लकी वीणा ॥ मल्लक शराव. ॥ सल्लकी वृक्षः ॥ अलका पुरी। अलकः केशविन्यास॰ ॥

॥ ३५७ ॥ कौ रुरुण्टिरण्टिभ्यः ॥ २. २. ८ ॥

रुप्रभृतिभ्य कावुपपदे वुन्प्रत्ययो भवति । कुरवकः वृक्ष· ॥ कुरुण्टकः पर्णगुच्छ· ॥ कुरण्टकः स एव ॥

॥ ३५८ ॥ कटेर्नुं च वा ॥ २. २. ९ ॥

कटेर्वुन्प्रत्ययो नुमागमश्च वा भवति । कटकं वलयम् ॥

॥ ३५९ ॥ उदिरुचितिलिपुलिपिटिक्षिपिध्रुसूभ्यः कित् ॥ २. २. १० ॥

उदादिभ्य· वुन्प्रत्ययः किद्भवति । उदकं वारि ॥ रुचकः आभरणविशेष. ॥ तिलकः वृक्ष ॥ पु· कः रोमाञ्च. ॥ पिट.: क्षरस्फोटक. ॥ क्षिपकः आयुधम् ॥ ध्रुवकः आवपनविशेष । ध्रुवका सैव ॥ [गुवका] ॥

॥ ३६० ॥ कीचकार्भकधमकवधकजहकैरकैडकाश्मकादयः ॥ २. २. ११ ॥

कीचकादयो वुन्प्रत्ययान्ता निपात्यन्ते । कचेरिश्चोपधाया· । कीचकः वेणुविशेषः ॥ अर्थेर्भुक् च । अर्भकः बालः ॥ ध्मो धम च । धमकः कर्मारः ॥ हनो वध च । वधकः हन्ता ॥ हो द्वे च । जहकः काल ॥ इरेः गुणः । एरका उदकतृणजाति ॥ ईडेश्च गुण. । एडक अविजातिः ॥ अशेर्मुट् च । अश्मकाः जनपद । आदिग्रहणात् उपकलमकचर्मकादय ॥

॥ ३६१ ॥ खजिबलिपतिभ्य आकः ॥ २. २. १२ ॥

खज्यादिभ्य आकप्रत्ययो भवति । खजाकः मन्था ॥ बलाका पक्षिविशेष. ॥ पाक.तवैजयन्ती ॥

॥ ३६२ ॥ शलिपटिमनिभ्यो नित् ॥ २. २. १३ ॥

एभ्य आकप्रत्ययो निद्भवति । शलाका एषणी ॥ पटाका वैजयन्ती ॥ मनाकः मुनिः ॥

॥ ३६३ ॥ पिनाकापण्याकश्यामाकपुलाकवार्ताकवृन्ताकज्योन्ताकादयः ॥ २. २. १४ ॥

पिनाकादय आकप्रत्ययान्ता निपात्यन्ते। पिनष्टीति **पिनाकः** ऐश धनुः ॥ पणेरत इण्युच्च। **पिण्याकः** तिलादिखलः ॥ श्यैङो मुट् च। **श्यामाकः** मुन्यन्नम् ॥ पुलेर्गुणाभावश्च। **पुलाकः** अर्धस्विन्नविधाविशेषः ॥ वृतेर्वृद्धिः। **वार्ताकी** शाकविशेष। तत्फलं वार्ताकम् ॥ नुश्च वृन्ताकी। उच्च बृहती [?]। तत्फल **वृन्ताकम्** ॥ ज्यवन्तेऽस्मिन् स्वेदा इति **ज्योन्ताकः** स्वेदसद्मविशेष.। आदिग्रहणात् गुवाकस्योनाकपराकादयः ॥

॥ ३६४ ॥ अलिकलिदलिपुलिवृश्चिस्फटिपिकृषिभ्यः किकन् ॥ २. २. १५ ॥

अल्यादिभ्य किकन्प्रत्ययो भवति। **अलिक** ललाटम् ॥ **कलिका** कोरकम्। उत्कलिका ऊर्मि.॥ **दलिक** दारु ॥ **पुलिकः** मणिः ॥ **वृश्चिकः** विषकी ॥ **स्फटिकं** मणिः ॥ **पिकः** कोकिलः ॥ **कृषिकः** पामरः ॥

॥ ३६५ ॥ मुषेर्दीर्घश्च ॥ २. २. १६ ॥

मुषे. किकन्प्रत्ययो दीर्घश्च भवति। **मूषिकः** आखु ॥

॥ ३६६ ॥ स्यमेर्यण इक् च ॥ २. २. १७ ॥

स्यमे किकन्प्रत्ययो यण इक् दीर्घश्च। **सीमिका** उपचि ·· विराः ॥

॥ ३६७ ॥ पिपीलिकैतिककुशिकहृदिकमक्षिकादयः ॥ २. २. १८ ॥

पिपीलिकादय किकन्प्रत्ययान्ता निपात्यन्ते। पिले. द्वे च। **पिपीलिका** मध्यक्षामा कीटजातिः ॥ एते सुट् च। **एतिकः** मुनिः ॥ कुशेः श च। **कुशिकः** मुनि.॥ हृञो दुक् च। **हृदिकः** यादवः ॥ मषे. सुक् च। **मक्षिका** क्षुद्रजन्तु.। आदिग्रहणात् छविकाचुरिकाचूलिकादयो भवन्ति ॥

॥ ३६८ ॥ ऋच्यलि....[इषिशलि]दूषिकषिहृषिदृशिमृडिवलिस्यम्यनिभ्यः कीकन् ॥ २. २. १९ ॥

ऋच्यादिभ्यः कीकन्प्रत्ययो भवति । **ऋचीकः** ऋषि. ॥ **अलीकं** असत्यम् । व्यलीक अपराध ॥ इषीका तृणम् ॥ शलाका ॥ **दूषिका** अक्षिमलम् ॥ **कषीका** कदलिका ॥ हृषीकम् इन्द्रियम् ॥ **दृशीक** मनोज्ञम् ॥ **मृडीकं** सुखकृत् ॥ **वलीकं** वेश्मस्तारु [?] ॥ **स्यमीकं** जलम् ॥ **अनीकं** सेनाङ्गम् ॥

॥ ३६९ ॥ मृद्वीकातिन्तिडीकबाह्लीकवल्मीककल्मलीककिङ्किणीकपुण्डरीकचञ्चरीकसमीकप्रतीकपूतीकफर्फरीकादयः ॥ २. २. २० ॥

मृद्वीकादयः कीकन्प्रत्ययान्ता निपात्यन्ते । मिदेर्वुक् च । **मृद्वीका** द्राक्षा ॥ तिमेस्तिडक् च । **तिन्तिडीका** वृक्षाम्लम् ॥ वहेर्वृद्धिश्च । **बाह्लीकः** राजा ॥ वलेर्मुक् च । **वल्मीकं** नाकु ॥ कलेर्मलक् च । **कल्मलीक** ज्वाल ॥ किणे कमिण । **किङ्किणीका** घण्टिका ॥ पुणेर्डरन् । **पुण्डरीकं** पद्मम् ॥ चञ्चेररक् च । **चञ्चरीकः** भ्रमर ॥ रायन्त्यस्मिन्निति **समीकं** सङ्ग्राम ॥ प्राति शरीरमिति **प्रतीकः** अवयव. । सुप्रतीको नाम दिग्गज ॥ पुवस्तुट् च । **पूतीकं** नाम तृणजाति ॥ पिपर्तेर्गुणे द्वित्वम्, पकारयोगश्च, रुट् चाभ्यासस्य । **फर्फरीकं** पल्लवम् । आदिग्रहणात् मर्मरीकजर्जरीक ·· · [ादयो] भवन्ति ॥

॥ ३७० ॥ समिकसेरुकन् ॥ २. २. २१ ॥

कसेः सम्युपपदे उकन्प्रत्ययो भवति । **संकुसुकः** परापवादशील. ॥

॥ ३७१ ॥ कमितिम्योर्दुक् च ॥ २. २. २२ ॥

आभ्यामुकन्प्रत्यय., दुक् चागमो भवति । **कन्दुकं** क्रीडनकम् ॥ **तिन्दुकः** वृक्षविशेषः ॥

॥ ३७२ ॥ अशिकशोर्नुं च ॥ २. २. २३ ॥

आभ्यामुकन्प्रत्ययो नुं चागमो भवति । **अंशुकं** वस्त्रम् ॥ **कञ्चुकं** कूर्पासः ॥

॥ ३७३ ॥ कुहेः क्नित् ॥ २. २. २४ ॥

कुहेरुक्नन्प्रत्यय किद्भवति । कुहकम् आश्चर्यम् ॥

॥ ३७४ ॥ क्रमे. क्रम् च वा ॥ २. २. २५ ॥

क्रमेरुकन्प्रत्यय. क्रमादेशश्च भवति । क्रमुकः पूग । क्रमुकं बन्धनम् ॥

॥ ३७५ ॥ चुलुकोल्मुकचिबुकचूचुकजम्बुकगवेधुकामधुकभावुकपृथुकादयः ॥ २. २. २६ ॥

चुलुकादय उकन्प्रत्ययान्ता निपात्यन्ते । चुलुम्पतीति **चुलुकम्** करकोशम् ॥ ज्वलतीति **उल्मुकः** अलातम् ॥ चिनोतीति **चिबुकम्** आस्याधोभाग ॥ चरतेरत ऊचुश्च । **चूचुकं** स्तनचारुभाग. ॥ जमेर्बुक् च । **जम्बुकः** सृगाल ॥ गविपीनीये इन्वे (?) **गवेधुका** नाम तृणजातिः ॥ मचेर्धश्च । **मधुकं** यष्टिमधु ॥ भातेर्वुक् च । **भावुकः** भगिनीपति. ॥ प्रथे प्रसारण च । **पृथुकः** बालः । आदिग्रहणात् मण्डूकलड्डुकवालुकादयो भवन्ति ॥

॥ ३७६ ॥ मृकणिजलिवलिबन्धिभल्लिभ्य ऊकः ॥ २. २. २७ ॥

मृप्रभृतिभ्य ऊकप्रत्ययो भवति । **मरूकः** निर्दर्शनेहा ॥ **कणूकः** धान्यस्तोक ॥ **जलूका** जलजन्तु ॥ **वलूकः** उत्पलमूलम् ॥ **बन्धूकः** बन्धुजीव ॥ **भल्लूकः** अच्छभल्ल ॥

॥ ३७७ ॥ शलिमण्डिभ्यां णित् ॥ २. २. २८ ॥

आभ्यामूकप्रत्ययो णिद्भवति । **शालूकं** कन्दविशेष ॥ **मण्डूकः** दर्दुरः ॥

॥ ३७८ ॥ मधूकोलूकोरुबूकशम्बूकवरूकादयः ॥ २. २. २९ ॥

मधूकादय ऊकप्रत्ययान्ता निपात्यन्ते । मदयतीति **मधूकः** वृक्षजाति ॥ अलेरुच्चोपधायाः । **उलूकः** पक्षी ॥ उरु पाति गुरु　क　[**उरबूकः**]

एरण्डकः ॥ शबेर्मुं च । शम्बूकः क्षुद्रशङ्खः ॥ वर्धत इति वरूकः तृणजातिः । आदिग्रहणात् वधूलूकादयो भवन्ति ॥

॥ ३७९ ॥ कोङ्को रो लश्च वा ॥ २. २. ३० ॥

किरतेरङ्कप्रत्ययो रेफश्च लकारादेशो वा भवति । करङ्कः समुद्र ॥ कलङ्कः लाञ्छनम् ॥

॥ ३८० ॥ रालापाकाभ्यः कित् ॥ २. २. ३१ ॥

रादिभ्योऽङ्कप्रत्यय किद्भवति । रङ्कः अबलीयान् ॥ लङ्का नाम पुरी ॥ पङ्कः कर्दम ॥ कङ्कः पक्षी ॥

॥ ३८१ ॥ कलेरविङ्कः ॥ २. २. ३२ ॥

कलेरविङ्कप्रत्ययो भवति । कलविङ्कः गृहवाटकः ॥

॥ ३८२ ॥ क्रमेरेलकः ॥ २. २. ३३ ॥

क्रमेरेलकप्रत्ययो भवति । क्रमेलकः करभः ॥

॥ ३८३ ॥ लूभीशीङ्शिङ्घिभ्य आनकः ॥ २. २. ३४ ॥

लुनात्यादिभ्यः आनकप्रत्ययो भवति । लवानकः नाम देशः ॥ भयानकः भयङ्कर ॥ शयानकः अजगर । शिङ्घानकः श्लेष्म ॥

॥ ३८४ ॥ अनेर्डित् ॥ २. २. ३५ ॥

अनेरानकप्रत्ययः डिद्भवति । आनकः पटह ॥

॥ ३८५ ॥ कनेरीनकः ॥ २. २. ३६ ॥

कनेरीनकप्रत्ययो भवति । कनीनका कनीनिका वा अक्षितारका ॥

॥ ३८६ ॥ कृतिभिदिलतिपुतिभ्यः क्तिकन् ॥ २. २. ३७ ॥

एभ्यः क्तिकन्प्रत्ययो भवति । कृत्तिका नक्षत्रम् ॥ भित्तिका कुड्यम् ॥ "लतिपुती" सौत्रधातू । लत्तिका गोधा ॥ पुत्तिका मधुमक्षिका ॥

॥ ३८७ ॥ इष्यसिभ्यां क्तकन् ॥ २. २. ३८ ॥

आभ्यां क्तकन्प्रत्ययो भवति। इष्टका मृद्विकारः ॥ **अष्टका** श्राद्धकाल ॥

॥ ३८८ ॥ भियो द्वे च ॥ २. २. ३९ ॥

भिय क्तकन्प्रत्ययो द्विर्वचन च भवति। **बिभीतकः** अक्ष. ॥

॥ ३८९ ॥ हृरुहिपिण्डिभ्य ईतकः ॥ २. २. ४० ॥

हृप्रभृतिभ्य ईतकप्रत्ययो भवति। **हरीतकी** पथ्या ॥ **रोहितकी** नाम वृक्ष ॥ **पिण्डीतकः** करहाटक ॥

॥ ३९० ॥ कुषेः कित् ॥ २. २. ४१ ॥

कुषेरीतकप्रत्ययः किद्भवति। **कुषीतकः** नाम मुनिः ॥

॥ ३९१ ॥ चण्डिभल्लिभ्यामातकः ॥ २. २. ४२ ॥

आभ्यामातकप्रत्ययो भवति। **चण्डातकं** नर्तक्या निवासः ॥ **भल्लातकः** वृक्षविशेष ॥

॥ ३९२ ॥ श्लेष्मातकाम्रातकामिलातकपिष्टातकादयः ॥ २. २. ४३ ॥

एते शब्दा आतकप्रत्ययान्ता निपात्यन्ते। श्लिष्यतीति **श्लेष्मातकः** कफेलुक् ॥ अमेर्वृद्धिश्च। **आम्रातकः** वृक्षविशेष ॥ न म्लायतीति **अमिलातकं** वर्णपुष्पम् ॥ पिष्यत इति **पिष्टातकः** पर्णचूर्णम्। आदिग्रहणात् केतकाश्मन्तककोशातक्यादयो भवन्ति ॥

॥ ३९३ ॥ शमिमनिभ्यां खः ॥ २. २. ४४ ॥

आभ्यां खप्रत्ययो भवति। **शङ्खः** कम्बु ॥ **मङ्खः** मागध ॥

॥ ३९४ ॥ मुहेः खर्मूर्च ॥ २. २. ४५ ॥

मुहेः खप्रत्ययः, मूर्चादाशो भवति। **मूर्खः** अविद्वान् ॥

॥ ३९५ ॥ इषेः किद् लोपश्च ॥ २. २. ४६ ॥

इषेः खप्रत्ययः कित् अन्त्यस्य लोपो भवति । इखा स्थाली ॥

॥ ३९६ ॥ महेरुच्चास्य वा ॥ २. २. ४७ ॥

महे खप्रत्ययः किदन्तस्य लोपोऽकारस्य चोकारादेशो भवति । मुखं आननम् ॥ मखः यज्ञः ॥

॥ ३९७ ॥ श्यतेरिच्चास्य वा ॥ २. २. ४८ ॥

श्यते खप्रत्ययः इकारश्चान्तादेशो वा भवति । शिखा चूडा । विशिखा आपणः । विशिख बाण । शाखा विटप । विशाखा नक्षत्रम् । विशाखः स्कन्द ॥

॥ ३९८ ॥ निय ऊनक् च ॥ २. २. ४९ ॥

नयते खप्रत्ययः ऊनक् चागमो भवति । न्यूङ्खः षडोङ्कार ॥

॥ ३९९ ॥ पुवो नुं ह्रस्वश्च ॥ २. २. ५० ॥

पुवः खप्रत्ययः नु ह्रस्वश्च भवति । पुङ्खः बाण ··· भागः ॥

॥ ४०० ॥ अश्नोतेर्डित् ॥ २. २. ५१ ॥

अश्नोते. खप्रत्ययो डिद्भवति । अश्नुत इति खम् आकाशम् । नास्य खमस्तीति नखम् । शोभनानि खान्यस्मिन् सुखम् । दुष्टानि खान्यस्मिन् दुःखम् ॥

॥ ४०१ ॥ मयतेरूट् च ॥ २. २. ५२ ॥

मयतेः खप्रत्ययः ऊट्चागमो भवति । मयूखः रश्मिः ॥

॥ ४०२ ॥ गृभृस्वृभ्यो गः ॥ २. २. ५३ ॥

गृप्रभृतिभ्यो गप्रत्ययो भवति । गर्गः मुनि । भर्गः रुद्रः ॥ स्वर्गः नाकः ॥

॥ ४०३ ॥ मुदिखडिछापूभ्यः कित् ॥ २. २. ५४ ॥

मुदिप्रभृतिभ्यः गप्रत्ययः किद्भवति । मुद्गः धान्यविशेषः ॥ खड्गः कृपाणः ॥ छागः अजः ॥ पूगः सङ्घ ॥

॥ ४०४ ॥ गम्यद्भ्यां गन् ॥ २. २. ५५ ॥

आभ्या गन्प्रत्ययो भवति । गङ्गा देवनदी ॥ अद्गः समुद्र ॥

॥ ४०५ ॥ भृशूभ्यां किनुण् च ॥ २. २. ५६ ॥

आभ्या गन्प्रत्ययः किनुण् चागमो भवति । भृङ्गः भ्रमरः ॥ “शु गतौ” शुङ्गः ॥

॥ ४०६ ॥ शृपीङ्भ्यां ह्रस्वश्च ॥ २. २. ५७ ॥

शृपीङ्भ्यां गन्प्रत्ययः, किनुण् चागमो ह्रस्वश्च भवति । शृङ्ग विषाणन् ॥ पिङ्गम्.... ॥

॥ ४०७ ॥ तडेरागच् ॥ २. २. ५८ ॥

तडेरागच्प्रत्ययो भवति । तडागः सरः ॥

॥ ४०८ ॥ पतितमितृलूभ्योऽङ्गच् ॥ २. २. ५९ ॥

पत्यादिभ्योऽङ्गच्प्रत्ययो भवति । पतङ्गः पक्षी ॥ त ङ्गः हर्म्यनिर्व्यूह ॥ तरङ्गः ॥ लवङ्गः वृक्षजाति ॥

॥ ४०९ ॥ सृवृनीभ्यो णित् ॥ २. २. ६० ॥

एभ्योऽङ्गच्प्रत्ययो णिद्भवति । सारङ्गः मृग ॥ वारङ्गः काण्डशल्यम् ॥ नारङ्गः वृक्षजातिः ॥

॥ ४१० ॥ कुरुवृषिमृदिपिशिभ्यः कित् ॥ २. २. ६१ ॥

कुर्वादिभ्योऽङ्गच्प्रत्ययो · किद्भवति । कुरङ्गः हरिण ॥ वृषङ्गः वृक्षजातिः ॥ मृदङ्गः मुरज ॥ पिशङ्गः वर्णः ॥

॥ ४११ ॥ मनस्तुट् च ॥ २. २. ६२ ॥

मनोऽङ्गच्प्रत्यय कित् तुट्चागमो भवति । मतङ्गः मुनिः ॥

॥ ४१२ ॥ कलिस्फुलिभ्यामिङ्गक् ॥ २. २. ६३ ॥

अभ्यामिङ्गक्प्रत्ययो भवति। कलिङ्गः राजा ॥ स्फुलिङ्गः स्फुलिङ्गा च ज्योति कणः ॥

॥ ४१३ ॥ भृञो भुल् च ॥ २. २. ६४ ॥

बिभर्तेरङ्गच्प्रत्ययो भवति, भुल् चादेश । भुलिङ्गं शकुनि ॥

॥ ४१४ ॥ माङि तुलेरुङ्गच् ॥ २ २. ६५ ॥

तुलयते माडि उपपदे उङ्गच्प्रत्ययो भवति। मातुलुङ्गः बीजपूरक ॥

॥ ४१५ ॥ कमितमिशमिभ्यो डित् ॥ २. २. ६६ ॥

कम्यादिभ्य उङ्गच्प्रत्ययो डिद्भवति। कुङ्गः नाम जनपद ॥ तुङ्गं महावर्ष्मा ॥ शुङ्गः मुनि । शुङ्गा विनता। शुङ्गा कन्दर्प ॥

॥ ४१६ ॥ सर्तेरुच्च ॥ २. २. ६७ ॥

सर्तेरुङ्गच्प्रत्यय उकारश्चान्तादेशो भवति। सुरुङ्गः गूढमार्ग ॥

॥ ४१७ ॥ जनेर्घः ॥ २. २. ६८ ॥

जनेर्घप्रत्ययो भवति। जङ्घा शरीरावयव ॥

॥ ४१८ ॥ दृणातेः कित् ॥ २. २. ६९ ॥

दृणातेः घप्रत्यय. किद्भवति। दीर्घः आयत ॥

॥ ४१९ ॥ सर्तेरघच्च ॥ २. २. ७० ॥

सर्तेरघच्प्रत्ययो भवति। सरघा मधुमक्षिका ॥

॥ ४२० ॥ कुवश्चट् दीर्घश्च ॥ २. २. ७१ ॥

कौतेश्चट्प्रत्ययो दीर्घश्च भवति। कूच् कीलाटकूची ॥

॥ ४२१ ॥ सिवेष्टेरू च ॥ २. २. ७२ ॥

सीव्यतेः चट्प्रत्यय, आदेश्चोकारादेशो भवति। सूचः स्तिभिः। सूची ॥

॥ ४२२ ॥ **कृञश्च** ॥ २. २. ७३ ॥

कृञश्च चट्प्रत्ययः टेरू च भवति । कूर्चं श्मश्रु । कूर्चमिव कूर्चक कूर्चिकेति ॥

॥ ४२३ ॥ **उचेश्चक्** ॥ २. २. ७४ ॥

उचेश्चक्प्रत्ययो भवति । उच्चः प्रांशुः ॥

॥ ४२४ ॥ **कवेरचच्** ॥ २. २. ७५ ॥

कवेरचच्प्रत्ययो भवति । कवचं सन्नाहः ॥

॥ ४२५ ॥ **क्रमेः क च** ॥ २. २. ७६ ॥

क्रमेरचच्प्रत्ययः कश्चान्तादेशो भवति । क्रकचं करपालम् ॥

॥ ४२६ ॥ **मृङ इचच्** ॥ २. २. ७७ ॥

मृङ इचच्प्रत्ययः । मरिचम् उष्णम् ॥

॥ ४२७ ॥ **नमेर्डिचच्** ॥ २. २. ७८ ॥

नमेः डिचच्प्रत्ययः । नीचः निम्नः ॥

॥ ४२८ ॥ **लषेरुचन् कश्च** ॥ २. २. ७९ ॥

लषेरुचन्प्रत्ययः कश्चान्तादेशो भवति । लकुचः वृक्षजातिः ॥

॥ ४२९ ॥ **गुडेरूचक्** ॥ २. २. ८० ॥

गुडेरूचक्प्रत्ययो भवति । गुडूची छिन्नरुहा ॥

॥ ४३० ॥ **चिम्योर्डोचच्** ॥ २. २. ८१ ॥

चिम्योर्डोचच्प्रत्ययो भवति । चोचः वृक्षविशेषः ॥ मोचा कदली ॥

॥ ४३१ ॥ **अञ्चच्** ॥ २. २. ८२ ॥

चिम्योरञ्चच्प्रत्ययो भवति । चञ्चा तृणमयः पुरुषः ॥ **मञ्चः** पर्यङ्क ॥

॥ ४३२ ॥ गुगम्यदितुदिमुदिभ्यश्छक् ॥ २. २. ८३ ॥

गुप्रभृतिभ्य छक्प्रत्ययो भवति । गुच्छः स्तवक ॥ गच्छः क्षुद्रवृक्ष ॥ अच्छं निर्मलम् ॥ तुच्छः स्तोकः ॥ मच्छ. मत्स्यः ॥

॥ ४३३ ॥ पूङ्पीङोर्ह्रस्वश्च ॥ २. २. ८४ ॥

आभ्या छक्प्रत्ययः ह्रस्वश्च भवति । पुच्छं वालधि ॥ पिच्छ बर्हिः । पिच्छा पिच्छिलतम् ॥

॥ ४३४ ॥ कच्छगुलुच्छपिलिपिच्छादयः ॥ २. २. ८५ ॥

कच्छादय· छक्प्रत्ययान्ता निपात्यन्ते । कपेः छ च । कच्छः देश-विशेष. ॥ गुदेरुदौग्लश्च । गुलुच्छः स्तबक ॥ . . पिलिपिच्छः रक्षोविशेष । आदिग्रहणात् पिच्छादयो भवन्ति ॥

॥ ४३५ ॥ वियो जक् ॥ २. २. ८६ ॥

वीते· जक्प्रत्ययो भवति । बीजं उत्पत्तिहेतु ॥

॥ ४३६ ॥ पुवो नुक् ह्रस्वश्च ॥ २. २. ८७ ॥

पवतेः पुनातेर्वा जक्प्रत्ययो नुमागमो ह्रस्वश्च भवति । पुञ्जः राशि. ॥

॥ ४३७ ॥ कुवोर्बुक् च वा ॥ २. २. ८८ ॥

कुवते. कौतेर्वा जक्प्रत्ययो बुगागमो नुमागमश्च वा भवति । कुब्जः वक्रानताङ्गः ॥ कुञ्जः पर्वतैकदेश· । निकुञ्ज· गहनम् ॥

॥ ४३८ ॥ कुलेरिजक् ॥ २. २. ८९ ॥

कुलेरिजक्प्रत्ययो भवति । कुलिञ्जः मान ॥

॥ ४३९ ॥ कृञोऽञ्जच् ॥ २. २. ९० ॥

करोतेरञ्जच्प्रत्ययो भवति । करञ्जः वृक्षजाति. ॥

॥ ४४० ॥ मुर्वेरजग्लोपश्च ॥ २. २. ९१ ॥

मुर्वेरजक्प्रत्ययः अन्त्यलोपश्च । मुरजः मृदङ्ग ॥

॥ ४४१ ॥ कुटजोटजबल्बजादयः ॥ २. २. ९२ ॥

कुटजादयः शब्दा अजक्प्रत्ययान्ता निपात्यन्ते । कुटेराद्युदात्तत्वं च । **कुटजा** वृक्षजाति ॥ **उटजः** मुनिकुटीरम् ॥ बलेर्बुक् च वा । ससुवसोवान्यपुञ्ज [?] । **बल्बजः** मुञ्जविशेषः । आदिग्रहणात् भूर्जभरुजभेषजादयो भवन्ति ॥

॥ ४४२ ॥ झमेर्झः ॥ २. २. ९३ ॥

झमेर्झप्रत्ययो भवति । झञ्झा सशीकरो मेघजातम् ॥

॥ ४४३ ॥ लुषेष्टः ॥ २. २. ९४ ॥

लुषेष्टप्रत्ययो भवति । लोष्टं मृत्पिण्डः ॥

॥ ४४४ ॥ जुकिजनिपणिभ्यो दीर्घश्च ॥ २. २. ९५ ॥

जुप्रभृतिभ्यष्टप्रत्ययो भवति, दीर्घश्चैषां गुणापवादो भवति । **जूटा** मौलि ॥ **कीटः** क्षुद्रजन्तु ॥ **जाण्टः** पक्षिविशेषः॥ ....[**पाण्टः**]...... .॥

॥ ४४५ ॥ घण्टाजटासटादयः ॥ २. २. ९६ ॥

घण्टादयः शब्दाष्टप्रत्ययान्ता निपात्यन्ते । घणयतीति **घण्टा** वाद्यविशेष ॥ जनसनोर्लोपश्च । **जटा** ग्रथितः केशसङ्घात ॥ **सटा** अग्रथित । आदिग्रहणात् छटादयो भवन्ति । घाटाघटादीनामडा वक्ष्यति ॥

॥ ४४६ ॥ कृसृभृपृकृषशकिकङ्किकर्किमर्क्यविभ्योऽटच् ॥ २. २. ९७ ॥

कृप्रभृतिभ्योऽटच्प्रत्ययो भवति । **करटः** काकः ॥ **सरटः** कृकलासः ॥ **भरटः** प्लवविशेष ॥ **पग्टः** क्षुद्रधान्यम् ॥ **कर्षटः** क्षुद्रपत्तनम् ॥ **शकटम्** अन ॥ **कङ्कटः** सन्नाहः । कङ्कटम् सीमा ॥ **कर्कटः** कपिलः । कर्कटी त्रपुसी ॥ **मर्कटः** कपिः ॥ **अवटः** प्रपातः ॥

॥ ४४७ ॥ कीकटकपटकर्पटादयः ॥ २. २. ९८ ॥

कीकटादय. शब्दा अटच्प्रत्ययान्ता निपात्यन्ते। ककेरक ईत्वम्। **कीकटः** कृपण· ॥ कम्पेर्नलोपश्च। **पटकः** माया ॥ कपेः प्रत्ययान्तोदात्तत्वं च। **कर्पटः** वस्त्रम्। आदिग्रहणात् पर्पटादयो भवन्ति ॥

॥ ४४८ ॥ किरतेराटग्लश्च वा ॥ २. २. ९९ ॥

किरतेराटक्प्रत्ययो लकारश्चान्तादेशो वा भवति। **किराटः** वणिक् ॥ **किलाटः** भक्ष्यविशेषः ॥

॥ ४४९ ॥ शृङ्गाटकपाटललाटविराटप्रपुनाटादयः ॥ २. २. १०० ॥

शृङ्गाटादयः शब्दा आट् गक् च प्रत्ययान्ता निपात्यन्ते। श्रयतेः सम्प्रसारणं नुट् च। **शृङ्गाटः** जलविशेष· ॥ कवे पश्च। **कपाटः** अररम् ॥ लाटे· द्वित्व च। **ललाटम्** आलिकम् ॥ वृड इत्वं च। **विराटः** राजा ॥ प्रपुणो नश्च। **प्रपुनाटः** एडगज.। आदिग्रहणात् राटादयो भवन्ति ॥

॥ ४५० ॥ चरेरिटच् भश्च ॥ २. २. १०१ ॥

चिरिणोतेरिटच्प्रत्ययो भकारश्चान्तादेशो भवति। **चिर्भिटिः** बालक्रीडा ॥

॥ ४५१ ॥ डिण्टन् ॥ २. २. १०२ ॥

चिरिणोतेः डिण्टन्प्रत्ययो भवति। **चिरिण्टी** अप्राप्तवयाः स्त्री ॥

॥ ४५२ ॥ कृतृकृपिभ्यः कीटन् ॥ २. २. १०३ ॥

कृप्रभृतिभ्य· कीटन्प्रत्ययो भवति। **किरीटं** कपर्दः ॥ **तिरीटः** वेष्टनम् ॥ **कृपीटं** हिरण्यम् ॥

॥ ४५३ ॥ खञ्जेररीटः ॥ २. २. १०४ ॥

खञ्जेररीटप्रत्ययो भवति। **खञ्जरीटः**..... ॥

॥ ४५४ ॥ वृणोतेरूटच् ॥ २. २. १०५ ॥

वृणोतेरुटच्प्रत्ययो भवति। **वरूटः** अन्त्यजाति. ॥

॥ ४५५ ॥ **नकुटमकुटकुक्कुटादयः** ॥ २. २. १०६ ॥

नकुटादयः शब्दा उटच्प्रत्ययान्ता निपात्यन्ते । नृत्यतीति **नकुटः** बन्दी ॥ मुचेरगुणत्वं च । **मुकुटः** किरीटम् ॥ कौतेर्डि कुकुट् च । **कुक्कुटः** कृकवाकुः । आदिग्रहणात् स्थपुटादयो भवन्ति ॥

॥ ४५६ ॥ **वन्धेः कूटन्** ॥ २. २. १०७ ॥

वन्धेः कूटन्प्रत्ययो भवति । **वधूटी** प्रथमवया स्त्री ॥

॥ ४५७ ॥ **दुरि द्रोः दुर् च** ॥ २. २. १०८ ॥

दुर्युपपदे द्रणाते कूटन्प्रत्ययो दुर् चादेशो भवति । **दुर्दुरूटः** दुर्मुखः ॥

॥ ४५८ ॥ **चपेरेटच्** ॥ २. २. १०९ ॥

चपेरेटच्प्रत्ययो भवति । **चपेटः** चपेटा वा हस्ततलहतिः ॥

॥ ४५९ ॥ **ग्रो णित्** ॥ २. २. ११० ॥

गिरतेरेटच्प्रत्ययो णिद्भवति । **गारेटः** मुनिः ॥

॥ ४६० ॥ **करोतेरोटच्** ॥ २. २. १११ ॥

करोतेरोटच्प्रत्ययो भवति । **करोटं** भाजनविशेष ॥

॥ ४६१ ॥ **बकोटाक्षोटकर्कोटादयः** ॥ २. २. ११२ ॥

बकोटादय. शब्दा ओटच्प्रत्ययान्ता निपात्यन्ते । वचे कश्च । **बकोटः** बकः ॥ अश्यत इत्यर्थे टः । **अक्षोटः** फलवृक्ष ॥ कृञ कुट् च । **कर्कोटः** नाग. । आदिग्रहणात् शाकोटादयो भवन्ति ।

॥ ४६२ ॥ **पीङ्कुणिकणिभ्यष्ठक्** ॥ २. २. ११३ ॥

पीङ्प्रभृतिभ्यष्ठक्प्रत्ययो भवति । **पीठम्** आसनम् ॥ **कुण्ठः** अतीक्ष्ण ॥ **कण्ठः** कन्धर ॥

॥ ४६३ ॥ **जॄकमिरमिभ्योऽठच्** ॥ २. २. ११४ ॥

जॄप्रभृतिभ्योऽठच्प्रत्ययो भवति । **जरठः** कठोरः ॥ **कमठः** कच्छपः ॥ **रमठः** देश. ॥

॥ ४६४ ॥ **अमन्ताड्डः** ॥ २. २. ११५ ॥

अमन्ताड्डप्रत्ययो भवति । **षण्ड** वनम् ॥ **भण्ड** बन्दी ॥ **खण्डः** शकलम् ॥ **दण्डः** प्रहरणम् ॥ **रण्डा** विधवा ॥ **सण्ड** उत्सृष्टपशु. ॥

॥ ४६५ ॥ **कृसृभृवृतॄभ्योऽण्डः** ॥ २. २. ११६ ॥

कृप्रभृतिभ्यः अण्डन्प्रत्ययो भवति । **करण्डं** समुद्र. ॥ **सरण्डः** इषीका ॥ **भरण्डः** पक्षी ॥ **वरण्डः** कुटघ. ॥ **तरण्डः** प्लव ॥

॥ ४६६ ॥ **आण्डैरण्डविचण्डकाण्डभाण्डवतण्डपो-गण्डादयः** ॥ २. २. ११७ ॥

आण्डादयः शब्दा अण्डन्प्रत्ययान्ता निपात्यन्ते । अचेर्लोपो दीर्घश्च । **आण्डः** मुष्कः ॥ इरेर्गुणश्च । **एरण्डः** पञ्चाङ्गुलम् ॥ विचेरगुणत्वं च । **विचण्डः** लघुलगुडः ॥ काभाभ्यामनिच्च । **काण्डं** शर. ॥ **भाण्डं** पण्यम् ॥ वनस्त च । **वतण्डः** मुनि. ॥ पुवो गुक् च । **पोगण्डः** बालः । आदिग्रहणात् कूश्माण्डशायण्डशयण्डादयः ॥

॥ ४६७ ॥ **लगिगॄभ्य उडच्** ॥ २. २. ११८ ॥

आभ्यामुडच्प्रत्ययो भवति । **लगुडः** यष्टिः ॥ **गरुडः** पक्षिराट् ॥

॥ ४६८ ॥ **व्याडनीडक्रोडकहोडादयः** ॥ २. २. ११९ ॥

व्याडादयः शब्दाः उडच्प्रत्ययान्ता निपात्यन्ते । व्यड्नीभ्यामुलोपश्च । **व्याडः** दु.शीलः ॥ **नीडं** कुलायः ॥ किरेरटच् । **क्रोडः** किरि ॥ कषेर्हश्च । **कहोडः** मुनिः । आदिग्रहणात् कुहुडलहोडादयो भवन्ति ॥

॥ ४६९ ॥ **शमिषणिकुणिभ्यो ढः** ॥ २. २. १२० ॥

एभ्यो ढप्रत्ययो भवति । **शण्ढः** नपुसक ॥ **षण्ढः** स एव ॥ **कुण्ढः** धूर्तः ॥

॥ ४७० ॥ नञि सहेः षश्चादेः ॥ २. २. १२१ ॥

नञ्युपपदे सहेर्डप्रत्ययः, आदेश्च षकारादेशो भवति । **अषाढा** नक्षत्रम् ॥

॥ ४७१ ॥ इनुर्विशाद्रुवेणिभ्यो णः ॥ २. २. १२२ ॥

[इना] दिभ्यो णप्रत्ययो भवति । **एणः** हरिणः ॥ **ऊर्णा** अविलोम ॥ **शाणः** परिमाणम् ॥ **द्रोणी** नौः ॥ **वेण्णा** । कृष्णवेण्णा नदी ॥

॥ ४७२ ॥ वीणास्थूणाहूणभ्रूणक्षूणतूण-
तृणघृणादयः ॥ २. २. १२३ ॥

वीणादय शब्दा णप्रत्ययान्ता निपात्यन्ते । वेतेर्गुणाभावश्च । **वीणा** वल्लकी ॥ तिष्ठतेरू च । **स्थूणा** धारिणी ॥ ह्व सम्प्रसारणं च । **हूणः** म्लेच्छजातिः ॥ भृञः ऊट् च । **भ्रूणः** गर्भः ॥ क्षुतुवोर्दीर्घश्च । **क्षूणः** अपराध ॥ **तूणः** इषुधिः ॥ त्रो ह्रस्वश्च । **तृणं** सस्यादि ॥ घरतेर्गुणाभावश्च ॥ **घृणा** कृपा । आदिग्रहणात् मसृणघुसृणादयो भवन्ति ॥

॥ ४७३ ॥ अङ्गितङ्गिकङ्किमङ्किकृपिवृषि-
भ्योऽणक् ॥ २. २. १२४ ॥

अङ्ग्यादिभ्योऽणक्प्रत्ययो भवति । **अङ्गणम्** अजिरम् ॥ **तङ्गणा** जनपदः ॥ **कङ्कणः** प्रतिसरः ॥ **मङ्कणः** मुनिः ॥ **कृपणः** कीनाशः ॥ **वृषणः** मुष्कः ॥

॥ ४७४ ॥ धृषेर्धिष च ॥ २. २. १२५ ॥

धृषेरणक्प्रत्ययः धिषादेशो भवति । **धिषणा** बुद्धिः ॥

॥ ४७५ ॥ कृकणकुङ्कणतृवणोल्बणोरणवङ्क्षण-
विचक्षणादयः ॥ २. २. १२६ ॥

कृकणादय अणक्प्रत्ययान्ता निपात्यन्ते । कृञ. कट् च ॥ **कृकणः** मुनि. ॥ कुकेर्णश्च । **कुङ्कणः** जनपद ॥ तृपेर्वश्च । **तृवणः** देश ॥ वलेर्वड-ल्बुक् च । उलणः स्फार ॥ अर्तेः कुरुच्च । उरणः मेष ॥ वञ्चे सुक् लोपश्च । **वङ्क्षणः** ऊरुमूलसन्धि ॥ विपूर्वाच्चक्षिङ. ख्याञभाव । **विचक्षणः** विदग्ध. ॥ आदिग्रहणात् ज्योतिरिङ्गणतुरणभुरणादयो भवन्ति ॥

॥ ४७६ ॥ कृपिविषिभ्यामाणक् ॥ २. २. १२७ ॥

आभ्यामाणक्प्रत्ययो भवति । **कृपाणः** खड्गः ॥ **विषाणम्** शृङ्गम् ॥

॥ ४७७ ॥ पाषाणपर्याणकल्याणादयः ॥ २. २. १२८ ॥

पाषाणादय आणक्प्रत्ययान्ता निपात्यन्ते । पिषेरच्चोपधाया । **पाषाणः** ग्रावा ॥ पराविणो लोपश्च । **पर्याणम्** अश्वादीना पृष्ठच्छद. ॥ कलेर्युट् च । **कल्याणं** श्वोवसनीयम् । आदिग्रहणात् द्रेक्काणवोकणकिङ्कणादयो भवन्ति ॥

॥ ४७८ ॥ गादाभ्यामेष्णक् ॥ २. २. १२९ ॥

आभ्यामेष्णक्प्रत्ययो भवति । **रात्रिगेष्णः** रङ्गोपजावी ॥ सुगेष्णा किन्नरी ॥ **चारुदेष्णः** सात्यभामेय । सुदेष्णा विराटपत्नी ॥

॥ ४७९ ॥ हसिवसीणजॄगमृवादम्यमिलूपूधू-र्विभ्यस्तन् ॥ २. २. १३० ॥

हसादिभ्यस्तन्प्रत्ययो भवति । **हस्तः** पाणि ॥ **बस्तः** छागः ॥ **एतः** वर्ण. ॥ **जर्तः** राजा ॥ **गर्तः** अवट ॥ **मर्तः** मनुष्यः ॥ **बातः** वायुः । **दन्तः** दशन. ॥ **अन्तः** ॥ **लोतः** मेष ॥ **पोतः** नौ. ॥ **धूर्तः** कितवः ॥

॥ ४८० ॥ तनिमूङ्भूहिभ्यः कित् ॥ २. २. १३१ ॥

एभ्यस्तन्प्रत्ययः किद्भवति । **ततं** विस्तीर्णम् ॥ **मूतं** धान्यादि पुटम् ॥ **भूतं** ग्रह ॥ भूत पृथिव्यादि ॥ **हितम्** उपकारि ॥

॥ ४८१ ॥ हुच्छेर्मुट् च ॥ २. २. १३२ ॥

हुर्च्छेस्तन्प्रत्ययः मुट् चास्यागमो भवति । मुहूर्तः कालविशेषः ॥

॥ ४८२ ॥ घृसिलूसूदूचितिभ्यः क्तः ॥ २. २. १३३ ॥

घृप्रभृतिभ्य· क्तप्रत्ययो भवति । घृत सर्पि· ॥ सितं वर्ण. ॥ लूता क्षुद्रजन्तुः ॥ सूतः सारथि· ॥ दूतः वचोहर ॥ चित्तं मन· ॥

॥ ४८३ ॥ तातव्रातालातसुतपुतपित्तनिमित्तमुस्त-पुस्ततूस्तविस्तवितस्तादयः ॥ २. २. १३४ ॥

तातादयः शब्दा. क्तप्रत्ययान्ता निपात्यन्ते । तनिव्रजोरा ‥ ‥ [त्वम्] तातः पिता ॥ व्रातः समूह· ॥ लातेर्नञि अलातम् उल्मुकम् ॥ सुङ्पुवोः ह्रस्वश्च । सुतः पुत्र ॥ पुतः स्फिक् ॥ पिन्दस्तुट् च । पित्तं मायु ॥ नौ मिङस्तद्वत् । निमित्तं हेतु ॥ मुषिपुषो स च । मुस्ता कन्दविशेष ॥ पुस्तं लेप्यम् ॥ तुसेर्दीर्घश्च । तूस्ता निर्वस्तुदेशा. ॥ विशेः स च । विस्तं मानम् ॥ वौ तसेर्णिच्च । वितस्ता नाम नदी । आदिग्रहणात् अयुत-नियुतसूरतादयः ॥

॥ ४८४ ॥ भृदृशिवलियजादिभ्योऽतच् ॥ २. २. १३५ ॥

भृप्रभृतिभ्योऽतच्प्रत्ययो भवति । भरतः राजा ॥ दर्शतः द्रष्टा ॥ वलतः कुसूलम् ॥ यजतः यज्वा । आदिग्रहणात् कङ्कतविकङ्कतादयो भवन्ति ॥

॥ ४८५ ॥ पृषिरञ्जिसिकिभ्यः कित् ॥ २. २. १३६ ॥

एभ्योऽतच्प्रत्यय किद्भवति । पृषतः मृग· ॥ रजतं तारम् ॥ सिकता वालुका ॥

॥ ४८६ ॥ कृविलिभ्यामातच् ॥ २. २. १३७ ॥

अभ्यामातच्प्रत्यय· किद्भवति ॥ किरातः शबरः ॥ विलातः बालः ॥

॥ ४८७ ॥ जृविशिवहिवसिभूजिरेवसाधिभासिगडिमडि-नन्दिभ्योऽन्तच् ॥ २. २. १३८ ॥

जॄप्रभृतिभ्योऽन्तच्प्रत्ययो भवति । **जरन्तः** महिष. ॥ **वेशन्तः** पल्वलम् ॥ **वहन्तः** रथः ॥ **वसन्तः** ऋतु ॥ **भवन्तः** काल ॥ **जयन्तः** इन्द्रपुत्रः ॥ **रेवन्तः** सूर्यपुत्र ॥ **साधयन्तः** भिक्षु ॥ **भासयन्त** सूर्यः ॥ **गण्डयन्तः** मेघ ॥ **मण्डयन्तः** प्रसाधकः ॥ **नन्दयन्तः** सुखकृत् ॥

॥ ४८८ ॥ हिदुषोर्मुक्षुकौ च ॥ २. २. १३९ ॥

आभ्यामन्तच्प्रत्ययः यथासङ्ख्यं चानयोर्मुक् षुक् चागमो भवति ॥ **हेमन्तः** ऋतुः । **दुष्षन्त.** राजा ॥

॥ ४८९ ॥ रुहिजीविभ्यां षित् ॥ २. २. १४० ॥

आभ्यामन्तच्प्रत्यय षिद्भवति । **रोहन्तः** तरु । रोहन्ती ओषधि. ॥ **जीवन्तः** मषी । जीवन्ती शाक ॥

॥ ४९० ॥ पलिरुहिश्वाहृभ्य इतन् ॥ २. २. १४१ ॥

पलिप्रभृतिभ्य इतन्प्रत्ययो भवति । **पलितं** श्वेतकेश. ॥ **रोहितः** वर्णः । लत्वेन लोहित । लोहितम् असृक् ॥ **श्वेतः** वर्ण ॥ **हरितः** वर्णः ॥

॥ ४९१ ॥ नञ्यापेः ॥ २. २. १४२ ॥

नञ्युपपदे आपेर्धातो इतन्प्रत्ययो भवति । **नापितः** कारुविशेष. ॥

॥ ४९२ ॥ उचिकुसिपिशिपृषिभ्यः कित् ॥ २. २. १४३ ॥

उच्यादिभ्यः इतन्प्रत्यय. किद्भवति । **उचितम्** अनुरूपम् ॥ **कुसितः** मुनिः ॥ **पिशितं** मासम् ॥ **पृषितं** वारिबिन्दु ॥

॥ ४९३ ॥ हृञ ईतन् ॥ २. २. १४४ ॥

हृञः ईतन्प्रत्ययो भवति । **हरीतः** पक्षी ॥

॥ ४९४ ॥ अदि भुवो डुतच् ॥ २. २. १४५ ॥

भुव अद्युपपदे डुतच्प्रत्ययो भवति । **अद्भुतम्** आश्चर्यम् ॥

॥ ४९५ ॥ शकेरुन्तः ॥ २. २. १४६ ॥

शकेरुन्तप्रत्ययो भवति । शकुन्तः पक्षी ॥

॥ ४९६ ॥ कषेर्डित् ॥ २. २. १४७ ॥

कषेरुन्तप्रत्ययो डिद्भवति । कुन्तः आयुधम् ॥

॥ ४९७ ॥ कुलिमयिभ्यामूतक् ॥ २. २. १४८ ॥

आभ्यामूतक्प्रत्ययो भवति । कुलूतः जनपदः ॥ मयूता वसतिः ॥

॥ ४९८ ॥ कम्पेरोतो नलोपश्च ॥ २. २. १४९ ॥

कम्पेरोतप्रत्ययो नलोपश्च भवति । कपोतः पक्षी ॥

॥ ४९९ ॥ आङि स्फायेर्डित् ॥ २. २. १५० ॥

स्फायेराङ्युपपदे ओतप्रत्ययो डित् भवति । आस्फोता नामौषधिः ॥

॥ ५०० ॥ नीरमिकुषकाषिभ्यः क्थन् ॥ २. २. १५१ ॥

नीप्रभृतिभ्यः क्थन्प्रत्ययो भवति । सुनीथः नीतिमान् ॥ रथः स्यन्दनम् ॥ कुष्ठं व्याधिः ॥ काष्ठ दारु ॥

॥ ५०१ ॥ अवे भृञः ॥ २. २. १५२ ॥

बिभर्तेरवे उपपदे क्थन्प्रत्ययो भवति । अवभृथः यज्ञावसानम् ॥

॥ ५०२ ॥ उषिकुषिकमिगार्तिभ्यस्थन् ॥ २. २. १५३ ॥

उष्यादिभ्यस्थन्प्रत्ययो भवति । ओष्ठः अधरः ॥ कोष्ठ कुसूलम् ॥ कन्था आवरणम् ॥ गाथा श्लोकः ॥ अर्थः अभिधेयादि ॥

॥ ५०३ ॥ सर्तेर्णित् ॥ २. २. १५४ ॥

सर्तेस्थन्प्रत्ययो णिद्भवति । सार्थः समूहः ॥

॥ ५०४ ॥ पातॄतुदिवचिरिचिसिचि-
विषिभ्यस्थक् ॥ २. २. १५५ ॥

पिबत्यादिभ्यस्थक्प्रत्ययो भवति । **पीथः** पानम् ॥ **तीर्थः** जलावतारः ॥ **तुत्थं** द्रव्यविशेषः ॥ **उक्थम्** सामविशेषः ॥ **रिक्थम्** द्रव्यम् ॥ **सिक्थं** पुलाका ॥ **विष्ठा** पुरीषम् ॥

॥ ५०५ ॥ संनिन्युद्गोष्विणर्तिशीङ्गापाभ्यः ॥ २. २. १५६ ॥

समादिषूपपदेषु इणादिभ्यस्थक्प्रत्ययो भवति । **समिथः** सङ्गमः ॥ **निर्ऋथः** निकायः ॥ **निशीथः** अर्धरात्रः ॥ **उद्गीथः** प्रथमोच्चारणम् ॥ **गोपीथः** जलद्रोणी ॥

॥ ५०६ ॥ गूथयूथप्रोथपृष्ठादयः ॥ २. २. १५७ ॥

गूथादय शब्दास्थक्प्रत्ययान्ता निपात्यन्ते । गुपो दीर्घश्च । **गूथम्** पुरीषम् ॥ **यूथं** समूहः ॥ प्रवते उश्च । **प्रोथः** अश्वादिमुखाग्रभाग ॥ स्पृशे सलोपश्च । **पृष्ठं** शरीरावयवः । आदिग्रहणात् दथावगाथादयो भवन्ति ॥

॥ ५०७ ॥ शीङ्शपिशमिगमिवन्दिबन्धिजीविप्राण्यु-पसृष्टवसिभ्योऽथः ॥ २. २. १५८ ॥

शीङादिभ्योऽथप्रत्ययो भवति । **शयथः** वराहः ॥ **शपथः** प्रत्ययकारणम् ॥ **शमथः** समाधिः ॥ **गमथः** पन्थाः ॥ **वन्दथः** स्तोता ॥ **बन्धथः** कोकिलः ॥ **जीवथः** वायुः ॥ **प्राणथः** बलवान् ॥ **आवसथम्** गृहम् ॥ **उपवसथं** सुत्याहात्पूर्वमहः ॥

॥ ५०८ ॥ भृञश्चित् ॥ २. २. १५९ ॥

भृञोऽथप्रत्ययश्चिद्भवति । **भरथः** लोकपालः ॥

॥ ५०९ ॥ विदः कित् ॥ २. २. १६० ॥

विदोऽथप्रत्ययो भवति । **विदथः** यज्ञः ॥

॥ ५१० ॥ रुवो वा ॥ २. २. १६१ ॥

रुवोऽथप्रत्ययः किद्भवति । **रवथः** शब्दकारः ॥ **रुवथः** शिशुः ॥

॥ ५११ ॥ जॄवृभ्यामूथन् ॥ २. २. १६२ ॥

आभ्यामूथन्प्रत्ययो भवति । जरूथः कलुषम् ॥ वरूथः सेनाङ्गम् ॥

॥ ५१२ ॥ शपेर्दन् ॥ २. २. १६३ ॥

शपेर्दन्प्रत्ययो भवति । शब्दः ध्वनिः ॥

॥ ५१३ ॥ आपो ह्रस्वश्च ॥ २. २. १६४ ॥

आपेर्दन्प्रत्ययो ह्रस्वश्च भवति । अब्दः वर्ष ॥

॥ ५१४ ॥ गुवः कित् ॥ २. २. १६५ ॥

गुवो दन्प्रत्यय किद्भवति । गुदः अपानम् ॥

॥ ५१५ ॥ वृतुसुकुभ्यो नुं च ॥ २. २. १६६ ॥

वृप्रभृतिभ्यो दन्प्रत्यय कित् नु च भवति । वृन्दम् समूहः ॥ तुन्दम् उदकम् ॥ सुन्दः दानव ॥ कुन्दं पुष्पजाति ॥

॥ ५१६ ॥ ककिमकिभ्यामन्दन् ॥ २. २. १६७ ॥

आभ्यामन्दन्प्रत्ययो भवति । ककन्दः रा [राजा] ॥ मकन्दः राजा ॥

॥ ५१७ ॥ अलिपुलिकलिभ्यः किन्दन् ॥ २. २. १६८ ॥

एभ्यः किन्दन्प्रत्ययो भवति । अलिन्दः प्रघाणः ॥ पुलिन्दः शबरः ॥ कलिन्दः पर्वतः ॥

॥ ५१८ ॥ मुचेर्डुकुन्दकुकुन्दौ ॥ २. २. १६९ ॥

मुचेः डुकुन्दककुन्दौ प्रत्ययौ भवतः । मुकुन्दः विष्णुः ॥ मुचुकुन्दः राजा ॥

॥ ५१९ ॥ यमेरुन्दन् ॥ २. २. १७० ॥

यमेरुन्दन्प्रत्ययो भवति । यमुन्दः क्षत्रियविशेष ॥

॥ ५२० ॥ कक्केरुदन् णिच्च वा ॥ २. २. १७१ ॥

कक्केरुदन्प्रत्यय. णित्त्वं चास्य वा भवति । कक्कुदं स्कन्धः ॥ काकुदं तालु ॥

॥ ५२१ ॥ अर्तिबुदोर्बुक् च ॥ २. २. १७२ ॥

आभ्यामुदन्प्रत्यय बुक्चागमो भवति । अर्बुदः पर्वतः ॥ बुद्बुदः जलस्फोटः ॥

॥ ५२२ ॥ स्कन्द्यमिभ्यां धः ॥ २. २. १७३ ॥

आभ्या धप्रत्ययो भवति । स्कन्धः बाहुमूर्धा ॥ अन्धः दृष्टिविकल ॥

॥ ५२३ ॥ कुवोऽन्धच् ॥ २. २. १७४ ॥

कवतेरन्धच्प्रत्ययोभवति । कबन्ध :छिन्नमूर्धा देह ॥

॥ ५२४ ॥ नौ स्यतेरधक् ॥ २. २. १७५ ॥

नावुपपदे स्यतेरधक्प्रत्ययो भवति । निषधः जनपद ॥

॥ ५२५ ॥ मङ्गेर्नलोपश्च ॥ २. २. १७६ ॥

मङ्गेरधक्प्रत्ययो भवति नलोपश्च । मगधः जनपद ॥

॥ ५२६ ॥ इषेरुधक् ॥ २. २. १७७ ॥

इषेरुधक्प्रत्ययो भवति । इषुधः याच्ञा ॥

॥ ५२७ ॥ धापॄवस्यज्यतिसिविभ्यो नः ॥ २. २. १७८ ॥

एभ्यो नप्रत्ययो भवति । धाना भक्ष्यविशेष ॥ पर्णम् पलाशम् ॥ वस्नं वासमूल्यम् ॥ वेनः राजा ॥ अज्ञः वायुः ॥ स्योनं सुखम् ॥

॥ ५२८ ॥ उषिशुषिकृषोणजिमीङ्बुधिभ्यः

कित् ॥ २. २. १७९ ॥

उष्यादिभ्यो नप्रत्यय. किद्भवति । उष्णः घर्मः ॥ शुष्णः दानवः ।

कृष्णः वर्णः ॥ **इनः** स्वामी ॥ **जिनः** बुद्धः ॥ **मीनः** मत्स्यः ॥ **बुध्नं** मूलम् ॥

॥ ५२९ ॥ **ब्रधेरं च** ॥ २. २. १८० ॥

ब्रधेर्नप्रत्ययः अं चागमो भवति । **ब्रध्नः** सूर्यः ॥

॥ ५३० ॥ **सुवो दीर्घश्च** ॥ २. २. १८१ ॥

सुवो नप्रत्ययः दीर्घश्च भवति । **सूना** वधस्थानम् ॥

॥ ५३१ ॥ **कृवृतॄस्यनिभ्यो नित्** ॥ २. २. १८२ ॥

कृप्रभृतिभ्यो नप्रत्ययो भवति । **कर्णं** श्रवणम् ॥ **वर्णः** शुक्लादि ॥ **तर्णः** वत्सः ॥ **सेना** चमूः ॥ **अन्नम्** अन्धः ॥

॥ ५३२ ॥ **रमेस्त च** ॥ २. २. १८३ ॥

रमेर्नप्रत्ययः, तश्चान्तादेशो भवति । **रत्न** मुक्तादि ॥

॥ ५३३ ॥ **रास्नासास्नासुम्नद्युम्ननिम्नशिश्नकृत्स्नाक्ष्णश्लक्ष्णाभीक्ष्णतीक्ष्णस्तेनफेनश्येनच्यौत्नादयः** ॥ २. २. १८४ ॥

रास्नादयः शब्दाः नप्रत्ययान्ता निपात्यन्ते । रासाभ्यां सुट् च । **रास्ना** ओषधिः ॥ **सास्ना** गवां गलचर्म ॥ सुद्युभ्यां मुमागमो डिच्च । **सुम्नम्** सुखम् ॥ **द्युम्नं** द्रविणम् ॥ **निम्नं** नतम् ॥ शीङः शुग्ह्रस्वश्च । **शिश्नः** शेफः ॥ कृतेः सक् च । **कृत्स्नम्** सकलम् ॥ अशेः सुट् च । **अक्ष्णः** खण्डः ॥ श्लिषेश्चोपधायाः । **श्लक्ष्णम्** अकर्कशम् ॥ अभावीषेः किच्च । **अभीक्ष्णम्** अजस्रम् ॥ तिजेः सुट् दीर्घश्च । **तीक्ष्णं** शिताग्रम् ॥ स्त्यायेस्तीनः । **स्तेनः** चोरः ॥ स्फायेः फि च । **फेनः** डिण्डीरः ॥ श्यायोऽति च । **श्येनः** पक्षी ॥ च्युन्दे क्युत् वृद्धिश्च । **च्यौत्नी** कांस्यादिपात्री । आदिग्रहणात् दूनदुरोणरोण्वादयो भवन्ति ॥

॥ ५३४ ॥ **श्रुयुरुवृज्यसिरसिरुचिरुहिभ्यो युच्** ॥ २. २. १८५ ॥

श्रुप्रभृतिभ्यो युच्प्रत्ययो भवति । **श्रवणं** कर्णः ॥ **यवनाः** जनपदः ।

रवणः करभः ॥ **वरणः** वृक्षः ॥ **जयनम्** ऊर्णापटः ॥ **असनं** बीजकम् ॥ **रसना** जिह्वा ॥ **रोचना** गोपित्तम् ॥ **रोहणः** गिरिः ॥

॥ ५३५ ॥ **अशो रश च** ॥ २. २. १८६ ॥

अश्नोतेर्युच्प्रत्ययः रश चादेशो भवति । **रशना** मेखला ॥

॥ ५३६ ॥ **उन्देर्नलोपश्च** ॥ २. २. १८७ ॥

उन्देर्युच्प्रत्यय नलोपश्च भवति । **ओदनं** भुक्तम् ॥

॥ ५३७ ॥ **रञ्जेर्युन्** ॥ २. २. १८८ ॥

रञ्जेर्युन्प्रत्ययो नलोपश्च भवति । **रजनी** हरिद्रा ॥ **महारजनं** कुसुम्भम् ॥

॥ ५३८ ॥ **भुवः किद्वा** ॥ २. २. १८९ ॥

भुवो युन्प्रत्ययः किद्वा भवति । **भवनं** गृहम् ॥ **भुवन** जगत् ॥

॥ ५३९ ॥ **कॄपॄव्रजिनिधाञ्भ्यः क्युः** ॥ २. २. १९० ॥

कॄप्रभृतिभ्यो क्युप्रत्ययो भवति । **किरणः** रश्मिः ॥ **पुरणं** समग्रयिता ॥ **वृजनः** विवेक्ता ॥ **निधनम्** अवसानम् ॥

॥ ५४० ॥ **हनो जघ च** ॥ २. २. १९१ ॥

हन्तेः क्युप्रत्ययो जघ चादेशो भवति । **जघनं** श्रोणिः ॥

॥ ५४१ ॥ **मन्मनगहनगृञ्जनादयः** ॥ २. २. १९२ ॥

मन्मनादयः क्युप्रत्ययान्ता निपात्यन्ते । मनेर्मट् च । **मन्मनः**. . .... वाग्विकलताविशेषः । गाहो ह्रस्वश्च । **गहनं** कृच्छ्रावगाहनीयम् ॥ गृजेर्नुं च । **गृञ्जनम्** अभक्ष्यद्रव्यविशेषः । आदिग्रहणात् काञ्चनाननकाननादयो भवन्ति ॥

॥ ५४२ ॥ **हृञविभ्यामिनच्** ॥ २. २. १९३ ॥

आभ्यामिनच्प्रत्ययो भवति । **हरिणः** मृगः ॥ **अविनं** जलम् ॥

॥ ५४३ ॥ **वृजिनाजिनकठिनादयः** ॥ २. २. १९४ ॥

वृजिनादयः शब्दाः इनच्प्रत्ययान्ता निपात्यन्ते । वृजेरगुणत्वं च । **वृजिनं** पापम् ॥ अजेर्विभावाभावश्च । **अजिनं** चर्म ॥ कण्ठेर्नलोपश्च । **कठिनं** अकोमलम् । आदिग्रहणात् ग्रहणादयो भवन्ति ॥

॥ ५४४ ॥ द्रुदक्षिभ्यामिनन् ॥ २. २. १९५ ॥

आभ्यामिननप्रत्ययो भवति । **द्रविणं** द्रव्यम् ॥ **दक्षिणः** अनुकूलः । दक्षिणा दिक् ॥

॥ ५४५ ॥ विपिनेरिणतुहिनमहिनादयः ॥ २. २. १९६ ॥

विपिनादयः शब्दाः इननप्रत्ययान्ता निपात्यन्ते । वपेरिच्चोपधायाः । **विपिनं** वनम् ॥ ईरे ह्रस्वश्च । **इरिणम्** ऊषरः ॥ तुहे गुणाभावश्च । **तुहिनं** हिमम् ॥ महेर्मध्योदात्तत्वं च । **महिनः** माहात्म्यवान् । आदिग्रहणात् रोहिणादयो भवन्ति ॥

॥ ५४६ ॥ खलेरीनच् ॥ २. २. १९७ ॥

खलेरीनच्प्रत्ययो भवति । **खलीन** कविकम् ॥

॥ ५४७ ॥ पठेर्णित् ॥ २. २. १९८ ॥

पठेरीनच्प्रत्ययः णित् भवति । **पाठीनः** मत्स्यः ॥

॥ ५४८ ॥ अर्त्यजिकृवृतॄधृदारियमिभ्य उनन् ॥ २. २. १९९ ॥

अर्त्यादिभ्य उननप्रत्ययो भवति । **अरुणः** सूर्यसारथिः ॥ **वयुनम्** विज्ञानम् ॥ **करुणः** रसः । करुणा दया ॥ **वरुणः** प्रचेताः ॥ **तरुणः** युवा ॥ **धरुणः** धर्ता ॥ **दारुणः** उग्रः ॥ **यमुना** नदी ॥

॥ ५४९ ॥ लषेः श च ॥ २. २. २०० ॥

लषेरुननप्रत्ययः, शकारश्चान्तादेशो भवति । **लशुनम्** रसोनम् ॥

॥ ५५० ॥ पिशिमिथिभ्यां कित् ॥ २. २. २०१ ॥

आभ्यामुननप्रत्ययः किद्भवति । **पिशुनः** खलः ॥ **मिथुनम्** द्वन्द्वम् ॥

॥ ५५१ ॥ फलेर्गुक् च । २. २. २०२ ॥

फलेरुनन्प्रत्ययो गुक् चागमो भवति । फल्गुनी नक्षत्रम् ॥

॥ ५५२ ॥ अजेस्तृणे चित् ॥ २. २. २०३ ॥

अजेरुनन्प्रत्ययः तृणे चित्, अन्यत्र निद्भवति । अर्जुनम् तृणम् । अर्जुनः पार्थः ॥

॥ ५५३ ॥ शकेरुनः ॥ २. २. २०४ ॥

शकेरुनप्रत्ययो भवती । शकुनः पक्षी ॥

॥ ५५४ ॥ वीपतिभ्यां तनन् ॥ २. २. २०५ ॥

आभ्या तनन्प्रत्ययो भवति । वेतनं भृतिः ॥ पत्तनं नगरम् ॥

॥ ५५५ ॥ पृपूभ्यां कित् ॥ २. २. २०६ ॥

आभ्यां तनन्प्रत्यय किद्भवति । पृतना सेना ॥ पूतना राक्षसी ॥

॥ ५५६ ॥ अलितलिशीङ्सृपाभ्यः पः ॥ २. २. २०७ ॥

अल्यादिभ्यः पप्रत्ययो भवति । अल्पं स्तोकम् ॥ तल्पम् शयनीयम् ॥ शेपः पुच्छम् ॥ सर्पः ॥ पाप कल्माषम् ॥

॥ ५५७ ॥ कृश्टकुसुस्तुयुरूणां पन्नू च ॥ २. २. २०८ ॥

कृप्रभृतिभ्यः पन्प्रत्ययः, ऊकारश्चैषामन्तादेशो भवति । कूर्प भ्रूमध्यम् ॥ शूर्प परिवपनम् ॥ कूपः प्रहिः ॥ सूपः व्यञ्जनम् ॥ स्तूपः निचयम् ॥ यूपः यज्ञाङ्गम् ॥ रूपं चक्षुर्विषयः ॥

॥ ५५८ ॥ बाष्पशष्पनिवेष्पशिल्पक्षुपनीपचम्पाशम्पादयः ॥ २. २. २०९ ॥

बाष्पादयः शब्दाः पन्प्रत्ययान्ता निपात्यन्ते । पातेः षट् च । बाष्पम् अश्रु ॥ शदेः षश्च । शष्पम् बालतृणम् ॥ नौ विशेः षश्च । निवेष्पं । अपां गर्भः ॥ शीलः शिल् च । शिल्पम् विज्ञानम् ॥ क्षुनीपोर्गुणाभावश्च । क्षुपः

गुल्मम् ॥ नीपः वृक्षविशेषः ॥ चमशिमोर्णिश्च । चम्पा नगरी ॥ शम्पा विद्युत् । आदिग्रहणात् पम्पापेपादयो भवन्ति ॥

॥ ५५९ ॥ उषिकुषिकुटिदलिकुलिखजिभ्यः कपन् ॥ २. २. २१० ॥

उषिप्रभृतिभ्यः कपन्प्रत्ययो भवति । उषपः सूर्य ॥ कुषपः विन्ध्यः ॥ कुटपः प्रस्थचतुर्भागः ॥ दलपः विदलम् ॥ कुलपः शाखपर्णम् ॥ खजपः घृतमन्थ ॥

॥ ५६० ॥ सर्तेरपष्षुक् च ॥ २. २. २११ ॥

सर्तेर्धातोरपप्रत्यय षुक् चास्यागमो भवति । सर्षपम् सिद्धार्थम् ॥

॥ ५६१ ॥ विटपविष्टपोलपकुणपकुतपचातपशिंशपादयः ॥ २. २. २१२ ॥

विटपादय शब्दाः अपप्रत्ययान्ता निपात्यन्ते । विटेर्गुणाभावश्च । विटपः शाखा ॥ विशेस्तुट् च । विष्टप जगत् ॥ वलेरुल च । उलपम् तृणविशेषः ॥ कुणेरगुणत्वम् । कुणपः मृतकम् ॥ कौतेस्तुट् च । कुतपः शाटलोमकम्बलम् ॥ चायतेस्तुक् । चातपः मुनि ॥ शासे. शोऽत इट् च । शिंशपा वृक्षविशेष । आदिग्रहणात् खरपादयो भवन्ति ॥

॥ ५६२ ॥ विशेरिपक् ॥ २. २. २१३ ॥

विशेरिपक्प्रत्ययो भवति । विशिप वेश्म ॥

॥ ५६३ ॥ दलेरीपः दिल् च ॥ २. २. २१४ ॥

दलेरीपप्रत्यय दिलादेशश्च भवति । दिलीपः राजा ॥

॥ ५६४ ॥ आडेरुपगुच्चोपधायाः ॥ २. २. २१५ ॥

आडेरुपक्प्रत्ययः उपधायाश्चोकारादेशो भवति । उडुपं प्लवः ॥

॥ ५६५ ॥ अशेरूपच् पश्च ॥ २. २. २१६ ॥

अशेरूपच्प्रत्ययः पकारश्चान्तादेशो भवति । अपूपः भक्ष्यान्नविशेषः ॥

॥ ५६६ ॥ **गुरेः फग्लश्च** ॥ २. २. २१७ ॥

गुरेः फक्प्रत्ययः लश्चान्तादेशो भवति । **गुल्फं** जङ्घास्थिसन्धिः ॥

॥ ५६७ ॥ **शिफाशफकफादयः** ॥ २. २. २१८ ॥

शिफादयः शब्दाः फक्प्रत्ययान्ता निपात्यन्ते । श्यतेरित्व च । **शिफा** वृक्षजटा ॥ ह्रस्वश्च । **शफं** खुरः ॥ कायतेश्च । **कफम्** श्लेष्म । आदिग्रहणात् इफानफासुनफादयो भवन्ति ॥

॥ ५६८ ॥ **नितमिशमिभ्यां बः** ॥ २. २. २१९ ॥

निपूर्वात्तमेः शमेश्च बप्रत्ययो भवति । **नितम्बः** श्रोणिः ॥ **शम्बः** वज्रम् ॥

॥ ५६९ ॥ **अमेर्णिद्वा** ॥ २. २. २२० ॥

अमेर्बप्रत्ययो णिद्वा भवति । **अम्बा** माता ॥ **अम्बः** अपह्नवः ॥

॥ ५७० ॥ **अलशलोरत उच्च** ॥ २. २. २२१ ॥

आभ्या बप्रत्ययः अकारस्य चोकारादेशो भवति । **उलबम्** गर्भवेष्टनम् ॥ **शुलबम्** ताम्रम् ॥

॥ ५७१ ॥ **निम्बबिम्बडिम्बहिडिम्बस्तम्बसाम्बादयः** ॥ २. २. २२२ ॥

निम्बादयः शब्दाः बप्रत्ययान्ता निपात्यन्ते । नियो ह्रस्वश्च । **निम्बः** वृक्षविशेषः ॥ बन्धेर्धलोप इदतः । **बिम्बं** प्रतिच्छन्दकम् ॥ डीङो नुं ह्रस्व हिट् च वा । **डिम्बः** व्यसनम् ॥ **हिडिम्बः** राक्षसः ॥ स्तम्बेः लोपश्च । **स्तम्बः** गोटः ॥ स्यतेर्नुं च । **साम्बः** जाम्बवतेय । आदिग्रहणात् कशाम्बादयो भवन्ति ॥

॥ ५७२ ॥ **कृकदिकडिभ्योऽम्बच्** ॥ २. २. २२३ ॥

कृकदिकडिभ्योऽम्बच्प्रत्ययो भवति । **करम्बः** दध्योदनः ॥ **कदम्बः** पक्वान्नविशेषः ॥ **कडम्बः** जातिविशेषः ॥

॥ ५७३ ॥ कदेर्णित् पक्षिणि ॥ २. २. २२४ ॥

कदेरम्बच्प्रत्ययः पक्षिविषये णिदन्यत्राणिद्भवति । **कादम्बः** हंसः ॥ **कदम्बः** वृक्षः ॥

॥ ५७४ ॥ निकुरिकुटिभ्यामुम्बक् ॥ २. २. २२५ ॥

आभ्यामुम्बक्प्रत्ययो भवति । **निकुरुम्बं** समूहः ॥ **कुटुम्बम्** दारादयः ॥

॥ ५७५ ॥ दृदलिभ्यां भः ॥ २. २. २२६ ॥

आभ्यां भप्रत्ययो भवति । **दर्भः** कुशः ॥ **दल्भः** ऋषिः ॥

॥ ५७६ ॥ गिरो भन् ॥ २. २. २२७ ॥

गिरतेर्भन्प्रत्ययो भवति । **गर्भः** प्रसवः ॥

॥ ५७७ ॥ इणः कित् ॥ २. २. २२८ ॥

इणो भन्प्रत्ययः किद्भवति । **इभः** हस्ती ॥

॥ ५७८ ॥ कृशॄवलिवल्लिरासिगर्दिभ्योऽभच् ॥ २. २. २२९ ॥

कॄप्रभृतिभ्योऽभच्प्रत्ययो भवति । **करभः** उष्ट्रः ॥ **शरभः** श्वापदविशेषः ॥ **वलभिः** वेश्माग्रभूमिकः ॥ **वल्लभः** अभीष्टः ॥ **रासभः** खरः ॥ **गर्दभः** स एव ॥

॥ ५७९ ॥ सनेर्डित् ॥ २. २. २३० ॥

सनेरभच्प्रत्ययो डित् भवति । **सभा** परिषत् ॥

॥ ५८० ॥ ऋषिवृषिभ्यां कित् ॥ २. २. २३१ ॥

आभ्यामभच्प्रत्ययः किद्भवति । **ऋषभः** पुङ्गवः ॥ **वृषभः** स एव ॥

॥ ५८१ ॥ कृञोऽम्भच् ॥ २. २. २३२ ॥

करोतेरम्भच्प्रत्ययो भवति । **करम्भाः** दधिसक्तवः ॥

॥ ५८२ ॥ सेरिभज्रट् च ॥ २. २. २३३ ॥

सिनोतेरिभच्प्रत्यय रट्चास्य भवति । सेरिभः महिष. ॥

॥ ५८३ ॥ टिकेष्टस्तुट् च ॥ २. २. २३४ ॥

टिकेरिभच्प्रत्ययः टकारश्चान्तादेशः तुट्चागमो भवति । टिट्टिभः पक्षी ॥

॥ ५८४ ॥ ककेरुभः ॥ २. २. २३५ ॥

ककेरुभप्रत्ययो भवति । ककुभः अर्जुन. ॥

॥ ५८५ ॥ कुकेः कुक् च ॥ २. २. २३६ ॥

कुकेरुभप्रत्ययो भवति, कुक्चागमश्च । कुक्कुभः पक्षिविशेषः ॥

॥ ५८६ ॥ दमेर्दो डुण्डुक् च ॥ २. २. २३७ ॥

दमेरुभप्रत्यय· दकारस्य डुकारादेशः डुगागमो भवति । डुण्डुभः निर्विषाहिः ॥

॥ ५८७ ॥ क उम्भक् ॥ २. २. २३८ ॥

कायतेरुम्भक्प्रत्ययो भवति । कुम्भः घटः ॥

॥ ५८८ ॥ कसेरुच्चातः ॥ २. २. २३९ ॥

कसेरुम्भक्प्रत्ययः, अकारस्य चोकारादेशो भवति । कुसुभः महारजतम् ॥

॥ ५८९ ॥ अर्तीरिस्तुसुहुधृक्षियक्षिव्याभायापदिशॄनीभ्यो मन् ॥ २. २. २४० ॥

अर्त्यादिभ्यो मन्प्रत्ययो भवति । अर्म अक्षिरोग ॥ ईर्म व्रणः ॥ स्तोमः समूहः ॥ सोमः चन्द्रमा· ॥ होमः आहुति. ॥ धर्मः सत्कर्म ॥ क्षेमः कल्याणम् ॥ यक्ष्म व्याधिः ॥ व्यामः वक्षोभुजायति· ॥ भामः क्रोधः ॥ यामः प्रहर. ॥ पद्म कमलम् ॥ शर्म नदः ॥ नेमः अर्धम् ॥

॥ ५९० ॥ ग्रसेरा च ॥ २. २. २४१ ॥

ग्रसेर्मन्प्रत्ययः आकारश्चान्तादेशो भवति । ग्रामः समूहादि ॥

॥ ५९१ ॥ स्यविसिविशुषिक्षुभ्यः कित् ॥ २. २. २४२ ॥

सिनोत्यादिभ्यो मनूप्रत्यय. किद्भवति । सीम सर्वनाम ॥ ऊमः जनः ॥ स्यूमः सूत्रतन्तु· ॥ शुष्म· बलम् ॥ क्षुमा अतसी ॥

॥ ५९२ ॥ गुलिविलिभिलिसिधीन्धिधूञ्श्याहिरुभ्यो मक् ॥ २. २. २४३ ॥

गुलिप्रभृतिभ्यो मक्प्रत्ययो भवति । गुल्मः सेनाङ्गम् ॥ विल्मः प्रकाश. ॥ भिल्मम् भास्वरम् ॥ सिध्मम् खग्रोध. ॥ इध्मम् इन्धनम् ॥ धूमः अग्निकेतुः ॥ श्यामः वर्ण· ॥ हिमं तुहिनम् ॥ रुमा लवणाकरः ॥

॥ ५९३ ॥ तिजियुजिरुचाम् कु च ॥ २. २. २४४ ॥

तिजिप्रभृतिभ्यो मक्प्रत्ययोऽन्तस्य कवर्गादेशो भवति । तिग्मम् तीक्ष्णम् ॥ युग्मम् युगलम् ॥ रुक्मम् सुवर्णम् ॥

॥ ५९४ ॥ अवतेर्ह्रस्वश्च ॥ २. २. २४५ ॥

अवतेर्मक्प्रत्ययः, ऊठो ह्रस्वश्च भवति । उमा गौरी ॥

॥ ५९५ ॥ भियः षुग्वा ॥ २. २. २४६ ॥

भियो मक्प्रत्ययः षुगागमश्च वा भवति । बिभ्यत्यस्मादिति भीष्मः भयानक· ॥ भीमः स एव ॥

॥ ५९६ ॥ ग्रीष्मघर्मकूर्मसूर्मसुह्मजाल्मादयः ॥ २. २. २४७ ॥

ग्रीष्मादयः शब्दा· मक्प्रत्ययान्ता निपात्यन्ते । ग्रसेरीच्चातः षत्वं च । ग्रीष्मः ऋतु ॥ घातेर्गुणश्च । घर्मः निदाघ ॥ करोतेरुः दीर्घश्च । कूर्मः कच्छपः ॥ सूरेर्णिश्च । सूर्मः चुल्ली ॥ सहेरत उच्च । सुह्माः जनपदः ॥ जहातेर्जिह्म । जिह्मः जड ॥ जलेर्डिच्च । जाल्मः असमीक्ष्यकारी । आदिग्रहणात् अह्माह्मसूक्ष्मादयो भवन्ति ॥

॥ ५९७ ॥ प्रथिचरिकलिकर्दिपृसृभ्योऽमच् ॥ २. २. २४८ ॥

प्रथ्यादिभ्योऽमच्प्रत्ययो भवति । **प्रथमः चरमः** पश्चिमः ॥ **कलमः** शाली ॥ **कर्दमः** पङ्कः ॥ **परमः** उत्कृष्टः ॥ **सरमा** देवशुनी ॥

॥ ५९८ ॥ अवेर्धश्च वा ॥ २. २. २४९ ॥

अवेरमच्प्रत्ययो धकारश्चान्तादेशो वा भवति । **अधमः** हीनः ॥ **अवमः** स एव ॥

॥ ५९९ ॥ दाणो डिमच् ॥ २. २. २५० ॥

दाणो डिमच्प्रत्ययो भवति । **दाडिमः** दाडिमी वा वृक्षविशेषः ॥

॥ ६०० ॥ डिमेः कित् ॥ २. २. २५१ ॥

डिमेः डिमच्प्रत्ययः किद्भवति । **डिण्डिमः** वाद्यविशेषः ॥

॥ ६०१ ॥ कुथेरुमक् ॥ २. २. २५२ ॥

कुथेरुमक्प्रत्ययो भवति । **कुथुमं** मृगाजिनम् ॥

॥ ६०२ ॥ कसेरुच्चातः ॥ २. २. २५३ ॥

कसेरुमक्प्रत्यय , अकारस्य चोकारादेशो भवति । **कुसुमम्** पुष्पम् ॥

॥ ६०३ ॥ कुदकुकोर्नुं च ॥ २. २. २५४ ॥

आभ्यामुमक्प्रत्ययः नुं चागमो भवति । **कुन्दुमः** निचयः ॥ **कुङ्कुमम्** घुसृणम् ॥

॥ ६०४ ॥ गुधेरूमः ॥ २. २. २५५ ॥

गुधेरूमप्रत्ययो भवति । **गोधूमः** धान्यविशेषः ॥

इति श्रीदण्डनाथनारायणभट्टविरचितायां सरस्वतीकण्ठाभरणस्य
वृत्तौ सहृदयहारिण्या द्वितीयस्याध्यायस्य
द्वितीयः पादः ॥



ॐ

॥ तृतीयः पादः ॥

॥ ६०५ ॥ माच्छासाशलिकलिवलिससिसविकनिमनि-बन्धिभ्यो यः ॥ २. ३. १ ॥

एभ्यो यप्रत्ययो भवति । माया च्छद्म ॥ च्छाया कान्तिः ॥ सायं दिनावसानम् ॥ शल्यम् अन्तर्गत लोहादि ॥ कल्यः नीरोगः ॥ वल्यः कटकुसूलम् ॥ सस्यं क्षेत्रस्थं गोधूमादि ॥ सव्यं वामम् ॥ कन्या कुमारी ॥ मन्या धमनी ॥ वन्ध्या अप्रसूता ॥

॥ ६०६ ॥ सञ्जेर्धश्च ॥ २. ३. २ ॥

सञ्जे यप्रत्ययः धश्चान्तादेशो भवति । सन्ध्या उषा ॥

॥ ६०७ ॥ जनिजापुणिकृतिभ्यः क्यप् ॥ २. ३. ३ ॥

एभ्यः क्यप्प्रत्ययो भवति । जन्यं सङ्ग्रामः ॥ जाया पत्नी ॥ पुण्यं सत्कर्म ॥ कृत्या दुर्गा ॥

॥ ६०८ ॥ मध्यविन्ध्यशिक्यान्यपर्जन्यवदान्याघ्न्याहर्म्य-धिष्ण्यवस्त्यागस्त्यपुलस्त्यापत्यसत्यकुड्यकुल्या-हल्यादयः ॥ २. ३. ४ ॥

मध्यादयः शब्दाः क्यप्प्रत्ययान्ता निपात्यन्ते । मथेर्धश्च । मध्यं गर्भः ॥ विधेर्नुं च । विन्ध्यं गिरिः ॥ श्यतेरिकुट् च । शिक्यं लम्बमानविकार्या-धाधारः ॥ अनेर्निच्च । अन्यः सर्वनाम ॥ प्रो जट् च । पर्जन्यः मेघः ॥ वदेरानुट् च । वदान्यः त्यागी ॥ नञि हनेर्लोपश्चोपधायाः । अघ्न्या गौः ॥ हञो मुट् च । हर्म्यम् सौधम् ॥ धृषेर्नुं धिष च । धिष्ण्यम् भवनम् ॥ वसेरादि-त्व नुट् च ॥ वस्त्यं गृहम् ॥ स्तम्बेरगपुलयोर्डिच्च । अगस्त्यः ॥ पुलस्त्यः

मुनि ॥ नञि पतेः करणे । अपत्यं पुत्रादि ॥ अस्तेः सट् च । सत्य अमृषा ॥ कुले कित् डश्च वा ॥ कुड्यम् भित्ति ॥ कुल्या सरणी ॥ हलेर्नञि अहल्या गौतमपत्नी । आदिग्रहणात् लभ्यद्रुह्यसह्यादयो भवन्ति ॥

॥ ६०९ ॥ तनिमलिवलिभ्योऽयन् ॥ २. ३. ५ ॥

तन्यादिभ्योऽयन्प्रत्ययो भवति । **तनयः** पुत्र ॥ **मलयः** पर्वतः ॥ **वलयः** कटकम् ॥

॥ ६१० ॥ हृञो दुक् किच्च ॥ २. ३. ६ ॥

हरतेरयन्प्रत्ययः, कित् दुगागमो भवति । हृदयं मन ॥

॥ ६११ ॥ किसलयगयगवयमुकयकेकयादयः ॥ २. ३. ७ ॥

किसलयादय शब्दा अयन्प्रत्ययान्ता निपात्यन्ते । कसेरलडिच्चेपधाया । **किसलयं** प्रवालम् ॥ गमेर्डिच्च । **गयः** प्राण । गया तीर्थम् ॥ गवोऽन्तोदात्तत्वं च । **गवयः** गवाकृति पशुविशेष ॥ मुते. कत्वं गुणाभावश्च । **मुकयः** मृगजाति ॥ कितः कश्च । **केकयः** क्षत्रिय । आदिग्रहणात् सङ्कणादयो [?] भवन्ति ॥

॥ ६१२ ॥ कषिकुलिलुलिकलिभ्य आयक् ॥ २. ३. ८ ॥

कष्यादिभ्य आयक्प्रत्ययो भवति ॥ **कषायः** कल्कादि ॥ **कुलायः** नीडम् ॥ **लुलायः** महिषः ॥ **कलायः** त्रिपुटम् ॥

॥ ६१३ ॥ श्रुदक्षिस्पृहिभ्य आय्यः ॥ २. ३. ९ ॥

एभ्यः आय्यप्रत्ययो भवति । **श्रवाय्यः** श्रोता ॥ **दक्षाय्यः** दक्षिता ॥ **स्पृहयाय्यः** स्पृहयालुः ॥

॥ ६१४ ॥ दध्नि सुञो डित् ॥ २. ३. १० ॥

सुनोतेर्दध्युपपदे आय्यप्रत्ययः डिद्भवति । **दधिषाय्यम्** ॥

॥ ६१५ ॥ कौतेरियः ॥ २. ३. ११ ॥

कौतेरियप्रत्ययो भवति । **कवियं** खलीनम् ॥

॥ ६१६ ॥ कृञः कित् ॥ २. ३. १२ ॥

करोतेरियप्रत्यय किद्भवति । क्रियः मेषः ॥

॥ ६१७ ॥ मृजेर्ज्ञालीयर् ॥ २. ३. १३ ॥

मृजेर्ज्ञालीयर्प्रत्ययो भवति । मार्ज्ञालीयः धैष्ण्योऽग्निः ॥

॥ ६१८ ॥ वियस्तुट् च ॥ २. ३. १४ ॥

वेनेर्ज्ञालीयर्प्रत्यय तुट् चागमो भवति । वैताल्लीयम् छन्दोजातिः ॥

॥ ६१९ ॥ मदेः स्यन् ॥ २. ३. १५ ॥

मदेः स्यन्प्रत्ययो भवति । मत्स्यः मीन ॥

॥ ६२० ॥ रुचिभुजिभ्यामिक् च ॥ २. ३. १६ ॥

आभ्या स्यन्प्रत्यय इक् चागमो भवति । रुचिष्यः वल्लभ ॥ भुजिष्यः दास । इको विधानसामर्थ्याद्गुणो न भवति ॥

॥ ६२१ ॥ वचेरथ्यक् तश्च ॥ २. ३. १७ ॥

वचेरथ्यक्प्रत्यय तकारश्चान्तादेशो भवति । उतथ्यः मुनि. ॥

॥ ६२२ ॥ वृङ एन्यः ॥ २. ३. १८ ॥

वृङः एन्यप्रत्ययो भवति । वरेण्यः श्रेयान् ॥

॥ ६२३ ॥ अर्तेरन्यत् ॥ २. ३. १९ ॥

अर्तेरन्यत्प्रत्ययो भवति । अरण्य वनम् ॥

॥ ६२४ ॥ हृञ इच्च ॥ २. ३. २० ॥

हृञोऽन्यत्प्रत्यय इकारश्चान्तादेशो भवति । हिरण्यं सुवर्णादिद्रव्यम् ॥

॥ ६२५ ॥ स्फायितञ्चिवञ्चिशकिक्षिपिक्षिक्षुदिसृपितृपिवन्द्युन्दिश्वितिवृत्यजिनीपदिमदिमुदिरुदिछिदिभन्दिमन्दिचन्दिदसिदहिहसिघसिदभिवसिशुचिशुभिभ्यो रक् ॥ २. ३. २१ ॥

स्फाय्यादिभ्यो रक्प्रत्ययो भवति । स्फाग्म् उल्बणम् ॥ तक्रम् उदश्वित् ॥ वक्रं कुटिलम् ॥ शक्रः इन्द्र ॥ रिप्रम् कुत्सितम् ॥ क्षिप्रं शीघ्रम् ॥ क्षुद्रम् अणीय ॥ सृप्रा नदी ॥ तृप्र मेघान्तधर्म ॥ वन्द्रः समूहः ॥ समुद्रः जलधि ॥ श्वित्र कुष्ठबिन्दुः ॥ वृत्रः असुर ॥ वीरः विक्रान्त ॥ नीर जलम् ॥ पद्रः ग्राम ॥ मद्रः क्षत्त्रिय ॥ मुद्रा चिह्नकरणम् ॥ रुद्रः शम्भु ॥ छिद्रम् विवरम् ॥ भद्र कल्याणम् ॥ मन्द्रं गम्भीरम् ॥ चन्द्रः शशी ॥ दस्रौ अश्विनौ ॥ दह्रः अग्नि ॥ हस्र हर्षुल ॥ घस्रः दिवसः ॥ दभ्रः अल्प ॥ उस्रः रश्मि ॥ शुक्रं रेत ॥ शुभ्रम् अवदातम् ॥

॥ ६२६ ॥ चकिरम्योरुच्चोपधायाः ॥ २. ३. २२ ॥

आभ्या रक्प्रत्यय उपधायाश्चोकारादेशो भवति ॥ चुक्रं [पेय] रसविशेष ॥ रुम्र सुन्दरम् ॥

॥ ६२७ ॥ वौ कसेः ॥ २. ३. २३ ॥

कसेर्वावुपपदे रक्प्रत्यय उपधायाश्चो व भवति । विकुस्र चन्द्रमा ॥

॥ ६२८ ॥ शदेरू च ॥ २. ३. २४ ॥

शदे रक्प्रत्यय उपधाया ऊ च भवति । शूद्रः चतुर्थो वर्ण ॥

॥ ६२९ ॥ स्थश्च ॥ २. ३. २५ ॥

तिष्ठते रक्प्रत्यय ऊ चान्तादेशो भवति । स्थूरा कुष्ठिका ॥

॥ ६३० ॥ तम्यम्यर्दिजीनां दीर्घश्च ॥ २. ३. २६ ॥

तम्यादिभ्यो रक्प्रत्ययो भवति । एषा दीर्घश्च । ताम्रः वर्णः ॥ आम्रः वृक्ष ॥ आर्द्रम् सरसम् ॥ जीरम् अजाजी रलेन जीलं चर्मपुटम् [?] ॥

॥ ६३१ ॥ दुरीणो लोपश्च ॥ २. ३. २७ ॥

इणो दुर्युपपदे रक्प्रत्ययो लोपश्च वा भवति । दूरं विप्रकृष्टम् ॥

॥ ६३२ ॥ कृतेः कूच्छौ च ॥ २. ३. २८ ॥

करोते रक्प्रत्यय कूच्छौ चादेशौ भवत । क्रूर निष्ठुरम् ॥ कृच्छ्रम् कष्टम् ॥

॥ ६३३ ॥ वृधिरुधिवपीन्दिवज्यगिभीणूभ्यो रन् ॥ २. ३. २९ ॥

वृध्यादिभ्यो रन्प्रत्ययो भवति । वर्ध्र चर्म ॥ रोध्रः वृक्षविशेष । वप्रः केदार ॥ इन्द्रः देवराट् ॥ वज्र कुलिशम् ॥ अग्रं प्राग्भाग ॥ भेरः भीरु ॥ एरः एरकम् ॥

॥ ६३४ ॥ अन्ध्ररन्ध्रसिलिन्ध्रोड्रपुण्ड्रतीव्रनीव्र-
शीघ्रोग्रगौरेराभद्रसान्द्रगुन्द्रादयः ॥ २. ३. ३० ॥

अन्ध्रादय शब्दा. रन्प्रत्ययान्ता निपात्यन्ते । अहेर्धश्च । अन्ध्रः क्षत्त्रियजाति ॥ रधेर्नुं च । रन्ध्रं च्छिद्रम् ॥ इन्धे सिलिट् च । सिलिन्ध्रम् उद्भिद्विशेष ॥ उणेर्डश्च । ओड्र क्षत्रजाति ॥ पुणेर्डश्च । पुण्ड्रः क्षत्रजाति ॥ तितेर्वो दीर्घश्च । तीव्रः तीक्ष्ण ॥ नियो वुक् च । नीव्र गृहच्छदिरुपान्त ॥ श्येड. प्रसारण घश्च । शीघ्र त्वरितम् ॥ उषेर्ग किच्च । उग्रः रौद्र ॥ गुवो वृद्धिश्च । गौरः अवदात ॥ इण. किच्च । इरा माननीय पानविशेष ॥ भन्देर्नलोपश्च । भद्रं कल्याणम् ॥ सदेर्नुं वृद्धिश्च । सान्द्रं घनम् ॥ गुदेर्नुं च । गुन्द्रः जलतृणविशेषः । आदिग्रहणात् श्वभ्रादयो भवन्ति ॥

॥ ६३५ ॥ सुसूधागृधिभ्यः क्रन् ॥ २. ३. ३१ ॥

सुप्रभृतिभ्य. क्रन्प्रत्ययो भवति । सुराः देवा. । सुरा मदिरा ॥ सूरः सूर्य. ॥ धीरः अनाकुल ॥ गृध्रः काकः ॥

॥ ६३६ ॥ शुसिचिमिभ्यो दीर्घश्च ॥ २. ३. ३२ ॥

शुप्रभृतिभ्य क्रन्प्रत्यय दीर्घश्चैषां भवति । शूरः विक्रान्तः ॥ सीरम् हलः ॥ चीर जीर्णवास ॥ मीरा सीमान्तः ॥

॥ ६३७ ॥ वाविन्धेः ॥ २. ३. ३३ ॥

इन्धेर्वावुपपदे कन्प्रत्ययो भवति । विन्ध्र निर्मलम् ॥

॥ ६३८ ॥ ऋच्छेररः ॥ २. ३. ३४ ॥

ऋच्छेररप्रत्ययो भवति । ऋच्छरः स्वरावान् ॥

॥ ६३९ ॥ कृगृघृजृझृदृबृभृमृभ्यः सधात्वादिष्टित् ॥ २. ३. ३५ ॥

कृप्रभृतिभ्योऽरप्रत्ययः, धात्वादिभूतै कादिभि सह टिद्भवति । एतेन क्रियादिभ्य कर घर इत्यादय प्रत्यया भवन्ति इत्युक्तं भवति । कर्करः क्षुद्राश्मा । कर्करी वर्धनिका ॥ गर्गरः राजर्षि । गर्गरी महाकुम्भ ॥ घर्घरः सघोषोऽव्यक्तवाक् । घर्घरी किङ्किणीका ॥ जर्जरः अदृढ । जर्जरी स्त्री ॥ झर्झरः वाद्यविशेष । झर्झरी झल्लरिका ॥ दर्दरः वाद्यविशेष । दर्दरी सभ्यल्लुनी ॥ बर्बरः म्लेच्छजाति । बर्बरी केश्यविशेष ॥ भर्भरः च्छद्मवान् । भर्भरी स्त्री ॥ मर्मरः शुष्कपत्रप्रकर । बहुलाधिकारात् मर्मरायां दूर्वाया इत्यादौ टित्वेऽपि ङीप् न भवति ।

॥ ६४० ॥ मुदेर्गुक् च ॥ २. ३. ३६ ॥

मुदेररप्रत्यय, टित् गुक् चागमो भवति । मुद्गरम् प्रहरणविशेष । मुद्गरी स्त्री ॥

॥ ६४१ गुरेर्जक् च ॥ २. ३. ३७ ॥

गुरेररप्रत्ययष्टित् जक् चागमो भवति । गुर्जरः सौराष्ट्रादि. । गुर्जरी स्त्री ॥

॥ ६४२ ॥ सुन्दिकन्दिमन्दिमन्थिमञ्जिगञ्जिपिञ्जभ्रिमिचमिचटिवठिमठिदेविवानिकारयर्तिकुटिकबिशिबिदरि- वदिबदिभ्यो नित् ॥ २. ३. ३८ ॥

सुन्द्यादिभ्योऽरप्रत्ययो निद्भवति । सुन्दरः मनोज्ञ ॥ कन्दरः गिरिगर्त. ॥ मन्दर शैलः ॥ मन्थरः मन्द ॥ मञ्जरी अम्रादिशिखा । गौरादित्वान्ङीष् ॥ पञ्जरः शुकाद्यवरोधसद्म ॥ पिञ्जरः पिशङ्ग. ॥

भ्रमरः षट्पद ॥ चमरः अरण्यपशु ॥ चटरः मधुकन्धरा ॥ वठरः मूर्ख ॥ मठरः मुनि ॥ देवरः पत्यनुज ॥ वासरः दिवस ॥ कासरः महिष. ॥ अररं कवाटम् ॥ कोटर च्छिद्रम् । बहुलवचनाद्गुण ॥ कबरः वर्णः । कबरी वेणी ॥ शबरः पुलिन्दः ॥ दवरः गुण ॥ कदरः वृक्षविशेषः ॥ बदरी फलवृक्ष ॥

॥ ६४३ ॥ जठरपिठरकुररककरमकरशिखरशेखरोदरडहरकुहरकूर्परकर्परशफरडमरडामरपामरसागरतोमराजगरादयः ॥ २. ३. ३९ ॥

जठरादय शब्दा अरप्रत्ययान्ता निपात्यन्ते । जनेष्ठश्च । जठरम् कोष्ठम् ॥ पिठिकुरोरगुणत्व च । पिठर भाण्डम् ॥ कुररः पक्षिविशेष ॥ क्रमेः कश्च । ककरः गौरतित्तिरि ॥ मकेर्नलोपश्च । मकरः ग्राह ॥ शाखेरिदेतौ चोपधाया । शिखरम् अग्रभाग ॥ शेखरः आपीड ॥ उन्देर्नलोपश्च । उदरं जठरम् ॥ वहेरादेर्डश्च । डहर हृत्कमलम् ॥ कहेरगुणत्व च । कुहर गभीरगर्त ॥ कृपेरुपधाया उच्च वा । कूर्परः कफोणी ॥ कर्परं दटालम् ॥ शेफ पश्च । शफरः क्षुद्रमत्स्य ॥ दमेर्णिद्वा आदेश्च ड । डमरः भयानक ॥ डामरः स एव ॥ पातेर्मुट् च । पामरः ग्रामीण ॥ सहेर्गश्च ॥ सगरः राजा ॥ तञ्जेर्नलोपश्च ॥ तगरः वृक्षविशेष ॥ तुवो मुट् च । तोमरम् आयुधम् ॥ अजेरगट् च । अजगरः सर्प । आदिग्रहणात् सागरादयो भवन्ति ॥

॥ ६४४ ॥ अग्यङ्गिमन्दिमदिकडिकासिभ्य आरन् ॥ २. ३. ४० ॥

अगिप्रभृतिभ्य आरन्प्रत्ययो भवति । अगारं वेश्म ॥ अङ्गारः अग्न्युच्छिष्टम् ॥ मन्दारः वृक्षविशेष. ॥ मदारः वराहः ॥ कडारः पिङ्गलः ॥ कासारः पल्वलम् ॥

॥ ६४५ ॥ किञ्जिमृजिभ्यां चित् ॥ २. ३. ४१ ॥

आभ्यामारन्प्रत्ययः चिद्भवति । कञ्जारः कुशूल ॥ मार्जारः बिडालः ॥

॥ ६४६ ॥ कृञो मुट् च ॥ २. ३. ४२ ॥

करोतेरारन्प्रत्यय चित् मुट् चागमो भवति । कर्मारः लोहकारः ॥

॥ ६४७ ॥ तुषिकुठिभ्यां किच्च ॥ २. ३. ४३ ॥

आभ्यामारप्रत्ययश्चित् किच्च भवति । तुषारः हिमम् ॥ कुठारः परशु. ॥

॥ ६४८ ॥ कमेरत उच्च ॥ २. ३. ४४ ॥

कमेरारन्प्रत्यय. कित्, कम्यकारस्य चोकारादेशो भवति । कुमारः पोगण्ड ॥

॥ ६४९ ॥ शृङ्गारभृङ्गारकल्हारकान्तारकेदारकोविदार-कर्बुदारकाञ्चनारादयः ॥ २. ३. ४५ ॥

शृङ्गारादय शब्दाः आरन्प्रत्ययान्ता निपात्यन्ते । श्रिञ. सम्प्रसारणं गुग्नुमौ च । शृङ्गारः रसविशेष ॥ भृञो गुणत्वं गुग्नुमौ च । भृङ्गारः कटक ॥ कलेर्हुट् च । कल्हारम् उत्पलविशेष. ॥ कमेस्तट् दीर्घश्च । कान्तारम् अरण्यम् ॥ कदेरे चोपधाया । केदारं वप्रम् ॥ कनेः कोविद-कर्बुदकाञ्चनाश्च । कोविदारः वृक्षविशेष. ॥ कर्बुदारः तद्भेद ॥ काञ्चनारः तद्भेद. स एव । आदिग्रहणात् ईनारमसारादयो भवन्ति ॥

॥ ६५० ॥ इषिरुचिरुधितिमिमिहिमदिमन्दिचन्दिखदि-बधिभ्यः किरच् ॥ २. ३. ४६ ॥

इष्यादिभ्य. किरच्प्रत्ययो भवति । इषिरा क्षिप्रम् ॥ रुचिरं मनोहरम् ॥ रुधिरं लोहितम् ॥ तिमिरम् अन्धकारः ॥ मिहिरः सूर्यः ॥ मदिरा सुरा ॥ मन्दिरं वेश्म ॥ चन्दिरं चन्द्रिकावत् ॥ खदिरः वृक्षविशेष ॥ बधिरः श्रोत्रविकल. ॥

॥ ६५१ ॥ स्थिरस्फिराजिरशिशिरशिथिरस्थविरकविराशिर-शिबिरसरिरादयः ॥ २. ३. ४७ ॥

स्थिरादयः शब्दाः किरच्प्रत्ययान्ता निपात्यन्ते। स्थो निच्च। **स्थिरः** अचलः॥ स्फायो डित्। **स्फिरः** स्फारः॥ अजेर्वीभावाभावः। **अजिरं** अङ्गणम्॥ शशेरिच्चातः। **शिशिरं** शीतलम्॥ श्लथे शिथि च। **शिथिरं** श्लथम्। लत्वेन शिथिलम्॥ स्थो वुक् ह्रस्वश्च। **स्थविरः** वृद्धः॥ कौतेर्गुणश्च। **कविरः** अक्षिण कोणः॥ अशेर्नुच्च। **अंशिरः** सूर्यः॥ शिङो वुक् ह्रस्वश्च। **शिविरं** राजसन्निवेशः॥ सर्तेर्गुणः। **सरिरं** जलम्। लत्वेन सलिलम्। आदिग्रहणात् च्छिदिरभिदिरादयो भवन्ति॥

॥ ६५२॥ कृशॄशोडीमञ्जिकुटिपटिपूङ्भ्य ईरच्॥ २. ३. ४८॥

एभ्य ईरच्प्रत्ययो भवति॥ **करीरः** वृक्षः॥ **शरीरं** वपुः॥ **शोडीरः** गर्ववान्॥ **मञ्जीरः** नूपुरः॥ **कोटीरं** मुकुटम्। बहुलवचनाद्गुणः॥ **पटीरः** कार्मुकम्॥ **पवीरं** बीजावपनम्॥

॥ ६५३॥ वशिघसिकुरिकुलिभ्यः कित्॥ २. ३. ४९॥

वश्यादिभ्यः ईरच्प्रत्ययः किद्भवति। **उशीरं** वीरणमूलम्॥ **क्षीरं** दुग्धम्॥ **कुरीरं** मैथुनम्॥ **कुलीरः** कर्कटः॥

॥ ६५४॥ डिण्डीरवानीराभीरगभीरगम्भीरकुम्भीरकश्मीरकीरजम्बीरकिम्मीरादयः॥ २. ३. ५०॥

डिण्डीरादयः शब्दा ईरच्प्रत्ययान्ता निपात्यन्ते। डीङो डित्वमभ्यासस्य नुं च। **डिण्डीरः** फेनः॥ वनेर्वृद्धिश्च। **वानीरं** वेतसम्॥ आपो भश्च। **आभीरः** शूद्रजातिः॥ गमेर्भो नु च। **गभीरः** अक्षोभ्यः॥ **गम्भीरः** स एव॥ स्कुभेः सलोपश्च। **कुम्भीरः** जलचरः॥ कुशेर्मुट् च। **कश्मीराः** जनपदः॥ कायः कित्। **कीरः** शुकः॥ जनेर्बुक् च। **जम्बीरः** वृक्षविशेषः॥ किरः कित् मुक् च। **किम्मीरः** कर्बुरः। आदिग्रहणात् तूणीरतासीरकरवीरादयो भवन्ति॥

॥ ६५५॥ कुबिमदिवासिमसिचतिचङ्क्यकिभ्य उरच्॥ २. ३. ५१॥

एभ्यः उरच्प्रत्ययो भवति । कर्बुरः शबल ॥ मन्दुरा अश्वशाला ॥ वासुरः वायस ॥ मसुरा वेशस्त्री ॥ चतुरः विदग्ध ॥ चङ्कुरः रथ ॥ अङ्कुरः प्ररोह ॥

॥ ६५६ ॥ मुर्मुरमुकुरदर्दुरचिकुरकुक्कुरकुकुर-कुकुन्दुरोन्दुरनूपुरविथुरमद्गुरवागुरादयः ॥ २. ३. ५२ ॥

मुर्मुरादय शब्दा उरच्प्रत्ययान्ता निपात्यन्ते । मृङ् उक् मुक् च । मुर्मुरः कुकूलम् ॥ मुचे क किच्च । मुकुरः आदर्श मकुल च ॥ दृडो दुक् च । दर्दुरः मण्डूक ॥ चकेरिच्चोपधाया । चिकुरः अलक ॥ कुले कुक् च । कुक्कुरः श्वा । केचित् कुकुरेति पठन्ति । तत्र किरतेरुच कुक् च गुणाभावश्च । कुकुर यादव ॥ कौ कुन्देरुच्चात । कुकुन्दरौ नितम्बकूपकौ ॥ इन्देरुच्च । उन्दुरः कृषिक ॥ नुव पुक् दीर्घश्च । नूपुरः तुलाकोटि ॥ व्यथे प्रसारण च । विथुरः राक्षस ॥ मदिवात्यो गु क् च । मद्गुरः मत्स्यविशेष ॥ वागुरा मृगबन्धनी । आदिग्रहणात् विधुरनिष्ठुरादयो भवन्ति ॥

॥ ६५७ ॥ असेरुरन् ॥ २. ३. ५३ ॥

असेरुरन्प्रत्ययो भवति । असुरः दैत्यः ॥

॥ ६५८ ॥ शावशेराप्तौ ॥ २. ३. ५४ ॥

अश्नोतेः शावुपपदे आप्तौ गम्यमानायां उरन्प्रत्ययो भवति । श्वशुरः जायापत्यो. पिता ॥

॥ ६५९ ॥ मसेरूरन् ॥ ३. २. ५५ ॥

मसेरूरन्प्रत्ययो भवति । मसूरः धान्यविशेषः ॥

॥ ६६० ॥ कृञश्चुक् च ॥ ३. २. ५६ ॥

कृञ ऊरन्प्रत्यय चुक् चागमो भवति । कर्चूरः षडी ॥

॥ ६६१ ॥ खर्जिखडिकृपिवल्लिमयिमण्डिभ्य ऊरः ॥ ३. २. ५७ ॥

खर्ज्यादिभ्यः ऊरप्रत्ययो भवति । **खर्जूरः** वृक्षविशेषः ॥ **खड्डूरः** खुरलीस्थानम् ॥ **कर्पूरः** गन्धद्रव्यम् ॥ **वल्लूरः** मांसपेशी ॥ **मयूरः** शिखी ॥ **मण्डूरः** कल्कविशेषः ॥

॥ ६६२ ॥ तलिमलिशलिभ्यो णित् ॥ २. ३. ५८ ॥

तल्यादिभ्यः ऊरप्रत्ययो णित् भवति । **तालूरं** जलावर्तः ॥ **मालूरः** बिल्व ॥ **शालूरः** दर्दुरः ।

॥ ६६३ ॥ विडूरसिन्दूरपत्तूरधुस्तूरधुत्तूरादयः ॥ २. ३. ५९ ॥

एते शब्दा ऊरप्रत्ययान्ता निपात्यन्ते । **विडूरः** पर्वतविशेष ॥ स्यन्देः संप्रसारण च । **सिन्दूरं लीनपिष्टः** ॥ पतेस्तुट् च । **पत्तूरं** गन्धद्रव्यम् ॥ धुवः स्तुक् तुकौ च । **धुस्तूरः** उन्मत्तकः ॥ **धुत्तूरः** स एव । आदिग्रहणात् कस्तूरकरभूरादयो भवन्ति ॥

॥ ६६४ ॥ पतिकठिकुठिकुबिगविगुविदंशिभ्य एरक् ॥ २. ३. ६० ॥

पत्यादिभ्य एरक्प्रत्ययो भवति । **पतेरः** पक्षी ॥ **कठेरः** दुःखितः ॥ **कुठेरः** अञ्जुकः ॥ **कुबेरः** धनाधिपति ॥ **गवेरः** मेघ. ॥ **गुवेरः** राजा ॥ **दशेरः** जनपदः ॥

॥ ६६५ ॥ सतेरमूलेरमुदेरादयः ॥ २. ३. ६१ ॥

एते शब्दा एरक्प्रत्ययान्ता निपात्यन्ते । सदेस्त च । **सतेरः** वायुः ॥ मूलिगुदोर्णुच्च । **मूलेरं** पण्यम् ॥ **मुदेरः** मूर्खः । आदिग्रहणात् कवेरनालिकेर-शृङ्गिबेरादयो भवन्ति ॥

॥ ६६६ ॥ कठिचकिभ्यामोरः ॥ २. ३. ६२ ॥

आभ्यामोरप्रत्ययो भवति । **कठोरः** कठिन. ॥ **चकोरः** पक्षिविशेषः ॥

॥ ६६७ ॥ कशोरत इच्च ॥ २. ३. ६३ ॥

कशेरोरप्रत्ययः अकारस्य चेकारादेशो भवति । **किशोरः** बालः ॥

॥ ६६८ ॥ शॄवृकिभ्यः करन् ॥ २. ३. ६४ ॥

एभ्यः करन्प्रत्ययो भवति । **शर्करा** [वालुका] ॥ .[**वर्करः**] छागशिशुः ॥ **केकरः** वक्रदृष्टि ॥

॥ ६६९ ॥ सूपुषिभ्यां कित् ॥ २. ३. ६५ ॥

आभ्यां करन्प्रत्यय. किद्भवति । **सूकरः** वराहः ॥ **पुष्करम्** अन्तरिक्षादि ॥

॥ ६७० ॥ अनिकाभ्यां तरच् ॥ २. ३. ६६ ॥

आभ्यां तरच्प्रत्ययो भवति । **अन्तरं** मध्यम् ॥ **कातरः** भीरु. ॥

॥ ६७१ ॥ इणपूभ्यां कित् ॥ २. ३. ६७ ॥

आभ्यां तरच्प्रत्यय. किद्भवति । **इतरः** निर्दिष्टप्रतियोगी ॥ **पूतरः** जलजन्तु· ॥

॥ ६७२ ॥ क्यजिमामद्यशूभ्यः सरन् ॥ २. ३. ६८ ॥

किप्रभृतिभ्य सरन्प्रत्ययो भवति । **केसरः** वकुल ॥ **वेसरः** अश्वतर· ॥ **मासरः** आचामः ॥ **मत्सरः** कोपविशेष ॥ **अक्षरः** वर्णविशेष ॥

॥ ६७३ ॥ वसेश्च ॥ २. ३. ६९ ॥

वसेश्च सरन्प्रत्ययो भवति । **वत्सरः** हायनः ॥

॥ ६७४ ॥ सपूर्वाच्चित् ॥ २. ३. ७० ॥

सपूर्वाद्वसे सरन्प्रत्ययश्चिद्भवति । सवत्सरः ॥ परिवत्सरः ॥

॥ ६७५ ॥ इडावत्सरः ॥ २. ३. ७१ ॥

इद्वत्सरः ॥

॥ ६७६ ॥ ऋषितनिकृधूकिभ्यः कित् ॥ २. ३. ७२ ॥

ऋष्यादिभ्यः सरन्प्रत्ययः किद्भवति । **ऋक्षरः** कण्टकः ॥ **तसरः** कौशेयसूत्रम् ॥ **कृसरः** हविर्विशेषः ॥ **धूसरः** धान्यविशेषः ॥ **किसरः** गन्धद्रव्यम् ॥

॥ ६७७ ॥ कॄशॄगॄचतिकडिभ्यः ष्वरच् ॥ २. ३. ७३ ॥

एभ्यः ष्वरच्प्रत्ययो भवति । **कर्वरः** व्याघ्रः । कर्वरी स्त्री ॥ **शर्वरः** सायाह्नः । शर्वरी रात्रि ॥ **गर्वरः** अहङ्कारः । गर्वरी सन्ध्या ॥ **चत्वरं** चतुष्पथम् । चत्वरी वेदि. ॥ **कड्वरः** व्यालाश्वः । कड्वरी दधिविकार ॥

॥ ६७८ ॥ छित्वरछत्वरधीवरपीवरचीवरगह्वरोपह्वरसंयद्वरनिषद्वरोदुम्बरकूबरतूबरादयः ॥ २. ३. ७४ ॥

छित्वरादयः शब्दाः वरच्प्रत्ययान्ता निपात्यन्ते । छिदेस्तः किच्च । **छित्वरः** धूर्तः ॥ छादेर्णिलुक् तश्च । **छत्वरं** छदिः ॥ ध्यायो धी च । **धीवरः** कैवर्त ॥ प्याय पी च । **पीवरः** मांसलः ॥ चिञो दीर्घश्च । **चीवर** व्रतिवासः ॥ गुहेरिच्चोपधायाः । **गह्वर** गहनम् ॥ **उपह्वरः** वादिलोपश्च [?] । **उपह्वरं** समीपः ॥ समि यमो दश्च । **सयद्वरः** सयमी ॥ नौसदेर्निच्च । **निषद्वरं** आननम् । निषद्वरी प्रपा ॥ उन्दे किदुमट् च । **उदुम्बरः** वृक्षविशेष ॥ कुतुवो दीर्घश्च । **कूबरः** रथावयवः ॥ **तूवरः** कन्द्रः श्मश्रुः । आदिग्रहणात् अडम्बराटम्बरसम्बरादयो भवन्ति ॥

॥ ६७९ ॥ कलेरेबरः ॥ २. ३. ७५ ॥

कलेर्धातोरेबरप्रत्ययो भवति । **कलेबरं** शरीरम् ॥

॥ ६८० ॥ ष्ट्रन् ॥ २. ३. ७६ ॥

सर्वधातुभ्य. ष्ट्रन्प्रत्ययो भवति । छत्र छत्री वा घर्मवारणम् ॥ पात्रम् अर्जितगुणाधारो ब्राह्मणादिः ॥ स्नात्रं स्नानम् ॥ राजत इति राष्ट्रम् देश ॥

॥ ६८१ ॥ भ्रस्जिगमिनमिनशिहनिविष्यशां वृद्धिश्च ॥ २. ३. ७७ ॥

एभ्यः ष्ट्रन्प्रत्ययो वृद्धिश्चैषा भवति । **भ्राष्ट्रम्** अम्बरीषः ॥ **गान्त्र** नमनान्तः शिरः ॥ [**नान्त्रम्** शिरः ॥] **नाष्ट्रः** यातुधानः रक्षः ॥ [**हान्त्रम्** रक्षः ॥] **वैष्ट्र** विष्णुः ॥ **आष्ट्रम्** आकाशम् ॥

॥ ६८२ ॥ दिवेर्द्यौ च ॥ २. ३. ७८ ॥

दिवेः ष्ट्रन्प्रत्ययः द्यौ चादेशो भवति । द्यौत्रं त्रिदिवम् ॥

॥ ६८३॥ उषिखनिसूमूभ्यः कित् ॥ २. ३. ७९ ॥

एभ्यः ष्ट्रन्प्रत्ययः किद्भवति । उष्ट्रः करभः ॥ खात्रं ग्रामाधारभृत् [ग्रावाधारभित्?] सूत्रं तन्तुः ॥ मूत्र प्रस्रावः ॥

॥ ६८४ ॥ स्त्यायेर्डित् ॥ २. ३. ८० ॥

स्त्यायतेः ष्ट्रन्प्रत्ययो डिद्भवति । स्त्री योषित् ॥

॥ ६८५ ॥ हुयामाश्रुलुपिवसिभसिभ्यस्त्रन् ॥ २. ३. ८१ ॥

हुप्रभृतिभ्य त्रन्प्रत्ययो भवति । होत्रं होम ॥ यात्रा प्रस्थानम् ॥ मात्रा स्तोकः ॥ श्रोत्रं श्रवणम् ॥ लोप्त्रम् अपहृतद्रव्यम् ॥ वस्त्रं वासः ॥ भस्त्रा चर्ममयावपनम् ॥

॥ ६८६ ॥ गमेरा च ॥ २. ३. ८२ ॥

गमेस्त्रन्प्रत्ययः आकारश्चान्तादेशो भवति । गात्रं शरीरम् ॥

॥ ६८७ ॥ अमिचिमिदिशंसिभ्यः कित् ॥ २. ३. ८३ ॥

अमादिभ्यः त्रन्प्रत्ययः किद्भवति । अन्त्रं पुरीतत् ॥ चित्रम् आश्चर्यम् ॥ मित्रं सुहृत् । अमित्र· शत्रुः ॥ शस्त्रं स्तोत्रम् ॥

॥ ६८८ ॥ पूङो ह्रस्वश्च ॥ २. ३. ८४ ॥

पूङस्त्रन्प्रत्ययो ह्रस्वश्च भवति । पुनातीति पुत्रः सूनुः । [यत्] पुन्नाम्नो नरकात् त्रायत इति व्युत्पत्तिः तत् संज्ञाशब्दानामनेकधा व्याख्यान लक्षयति ॥

॥ ६८९ ॥ गुवृवीपचिवचियमिमनितनिसदिक्षदिक्षिभ्यो नित् ॥ २. ३. ८५ ॥

गुप्रभृतिभ्यः त्रन्प्रत्ययो निद्भवति । गोत्रम् अन्ववायः ॥ वरत्रं चर्म ॥ वेत्रं वीरुद्विशेष· ॥ पक्त्रम् अग्निः ॥ वक्त्रम् आस्यम् ॥ यन्त्रम् अरघट्टयादिः ॥ मन्त्रः इषेत्वादिः ॥ तन्त्रं प्रसारितास्तन्तव· ॥ सत्रं सद्म ॥ क्षत्रं जातिः ॥ क्षेत्रं भूतादि ॥

॥ ६९० ॥ अमियजिवधिपतिकलिनक्षिभ्योऽत्रन् ॥ २. ३. ८६ ॥

एभ्योऽत्रन्प्रत्ययो भवति । **अमत्रं** भाजनम् ॥ **यजत्रं** यजनम् ॥ **वधत्रम्** आयुधम् ॥ **पतत्रं** पक्ष· ॥ **कलत्रं** दारा ॥ **नक्षत्रं** तारा ॥

॥ ६९१ ॥ वृञश्चित् ॥ २. ३. ८७ ॥

वृञोऽत्रन्प्रत्ययो भवति चिच्च । **वरत्रा** रज्जुः ॥

॥ ६९२ ॥ अशिवहिकटिभ्य इत्रः ॥ २. ३. ८८ ॥

अश्यादिभ्य इत्रप्रत्ययो भवति । **अशित्रं** अन्ना ···वनम् [अन्नपानम्] ॥ **वहित्रं** वाहनम् ॥ **कटित्रं** लेख्यचर्म ॥

॥ ६९३ ॥ त्रादिभ्य उत्रः ॥ २. ३. ८९ ॥

त्रादिभ्य उत्रप्रत्ययो भवति । **तरुत्रं** प्लव ॥ **करुत्रम्** अभिप्रेतम् ॥

॥ ६९४ ॥ स्याशक्यमिभ्यो लः ॥ २. ३. ९० ॥

स्यादिभ्यो लप्रत्ययो भवति । **स्यालः** पत्नीभ्राता ॥ **शक्लः** मनोज्ञ-दर्शनम् ॥ **अम्लः** रसः ॥

॥ ६९५ ॥ शीङः क्लन् ॥ २. ३. ९१ ॥

शीङ· क्लन्प्रत्ययो भवति । **शीलं** स्वभावः ॥

॥ ६९६ ॥ भिल्लाच्छभल्लसौविदल्लादयः ॥ २. ३. ९२ ॥

भिल्लादय शब्दाः क्लन्प्रत्ययान्ता निपात्यन्ते। भिलेश्चिच्च । **भिल्लः** अन्त्यजातिः ॥ अच्छे भलेश्च । **अछभल्लः** ऋक्षः ॥ सुञि विदेरिलक् सौ च सुञः । **सौविदल्लः** कञ्चुकी ॥

॥ ६९७ ॥ मङ्गिमृदिमण्डिकुण्डिकन्दिभ्योऽलच् ॥ २. ३. ९३ ॥

मङ्ग्यादिभ्योऽलच्प्रत्ययो भवति । **मङ्गलं** भद्रम् ॥ **मर्दलः** मुरज. ॥ **मण्डलं** देशः ॥ **कुण्डलं** कर्णाभरणम् ॥ **कन्दलं** प्ररोहः ॥

॥ ६९८ ॥ लङ्गेर्दीर्घश्च ॥ २. ३. ९४ ॥

लङ्गेरलच्प्रत्ययो दीर्घश्च भवति । लाङ्गलम् ॥

॥ ६९९ ॥ ऋजनोर्गुक् च ॥ २. ३. ९५ ॥

आभ्यामलच्प्रत्ययो गुक् चागमो भवति ॥ अर्गला परिखा ॥ जङ्गलं निर्जलो देशः ॥

॥ ७०० ॥ कुकमियमिशमिशकिशबितृपिकुविशलिकलिपलिभ्यो ऽलक् ॥ २. ३. ९६ ॥

कुप्रभृतिभ्योऽलक्प्रत्ययो भवति । कुवली क्षुद्रबदरी ॥ **कमलम्** पद्मम् ॥ **यमलं** युगलम् ॥ **शमलम्** शकृत् ॥ **शकलं** खण्ड. ॥ **शबलः** कल्माष ॥ **तृपला** लता ॥ **कुवलः** प्रवालः ॥ **शललम्** शलल्यङ्गरुहम् ॥ **कललं** गर्भप्रथमावस्था ॥ **पललं** भृष्टतिलासतीचूर्णम् ॥

॥ ७०१ ॥ वृषिपटिदेविकेविवपिचपिभ्यश्चित् ॥ २. ३. ९७ ॥

वृष्यादिभ्योऽलक्प्रत्ययश्चिद्भवति । **वृषलः** शूद्र ॥ **पटलं** छदिः ॥ **देवलः** ऋषिः ॥ **केवलम्** एकम् ॥ **उपलः** पाषाणः ॥ **चपलः** अस्थिरः ॥

॥ ७०२ ॥ कुगुध्वञ्चिचञ्चिवहिदिहितृसृकुसिभ्यो लः ॥ २. ३. ९८ ॥

कुप्रभृतिभ्यो लप्रत्ययश्चिद्भवति ॥ **कवलः** ग्रासः ॥ **गवलः** महिषः ॥ **धवलः** श्वेतः ॥ **अञ्चलं** वस्त्रान्तः ॥ **चञ्चलः** अस्थिरः ॥ **वहलः** घन ॥ **देहली** द्वाराध. पट्ट. ॥ **तरलः** अधीरः ॥ **सरलः** अकुटिल. ॥ **कोसलाः** जनपदः ॥

॥ ७०३ ॥ मुरलोरलमुसलकुशलकोमलकोहलविरलकेरल-कुन्तलकपिञ्जलकज्जलेज्जलच्छगलभगलाहलकहलकाहलनाहला-नलयुगलपिप्पलादयः ॥ २. ३. ९९ ॥

मुरलादयः शब्दाः अलप्रत्ययान्ता निपात्यन्ते । मू`` व्योर्वलोपः किच्च । **मुरलाः** जनपद ॥ **उरलः** उत्कटः ॥ मुसेः किच्च । **मुसलः**

॥ ७०९ ॥ स्थालचात्वालकीलालकङ्कालहिन्तालवेताल-जम्बालादयः ॥ २. ३. १०५ ॥

स्थालादयः शब्दाः कालन्प्रत्ययान्ता निपात्यन्ते । स्थश्चिश्च । **स्थालम्** भाजनम् ॥ चतेर्वुक् वृद्धिश्च । **चात्वालः** यज्ञगर्तः ॥ कल ईत्वातः । **कीलालं** रक्तम् ॥ कचेर्नु कश्च । **कङ्कालं** कलेवरम् ॥ हिंसोस्त च । **हिन्तालः** वृक्षविशेषः ॥ वियस्तुक् गुणश्च । **वेतालः** रजनिचरविशेषः ॥ जम्बे लुक् च । **जम्बालः** कर्दमः । आदिग्रहणात् चक्रवालकरवालालवालादयो भवन्ति ॥

॥ ७१० ॥ पतिचण्डिभ्यामालञ् ॥ २. ३. १०६ ॥

आभ्यामालञ्प्रत्ययो भवति । **पातालं** रसातलम् ॥ **चण्डालः** जनङ्गमः ॥

॥ ७११ ॥ कुटिमहिमिथ्यनिभ्यः किलच् ॥ २. ३. १०७ ॥

एभ्यः किलच्प्रत्ययो भवति । **कुटिलं** वक्रम् ॥ **महिला** स्त्री ॥ **मिथिला** नगरी ॥ **अनिलः** वायुः ॥

॥ ७१२ ॥ भडिलभण्डिलशण्डिलस्थण्डिलकोकिल-कपिलविचकिलादयः ॥ २. ३. १०८ ॥

भडिलादयः शब्दाः किलच्प्रत्ययान्ता निपात्यन्ते । भण्डेर्नलोपश्च । **भडिलः** ऋषिः ॥ **भण्डिलः** ऋषिः ॥ शमेर्डक् च । **शण्डिलः** ऋषिः ॥ स्थले-र्नु च । **स्थण्डिलं** व्रतिशयनवेदिका ॥ कुकोर्गुणश्च । **कोकिलः** परभृतः ॥ कमेः पश्च । **कपिलः** मुनिः ॥ विचेरकट् च । **विचकिलः** मल्लिकाविशेषः । आदिग्रहणात् चण्डिलगोभिलनिकुम्भिलादयो भवन्ति ॥

॥ ७१३ ॥ हृषिवृतिचटितण्डिशकिशङ्क्युत्कण्ठिभ्य उलच् ॥ २. ३. १०९ ॥

एभ्यः उलच्प्रत्ययो भवति । **हर्षुलः** हर्षवान् ॥ **वर्तुलं** वृत्तम् ॥ **चटुलः**

चञ्चलः ॥ **तण्डुलः** निष्कषो व्रीह्यादिः ॥ **शकुलः** मत्स्यः ॥ **शङ्कुला** क्रीडनशङ्कुः ॥ **उत्कण्ठुलः** उत्कण्ठावान् ॥

॥ ७१४ ॥ निचुलवञ्जुलवकुलतुमुलपृथुलस्थूलविसंस्थुलादयः ॥ २. ३. ११० ॥

निचुलादयः शब्दाः उलच्प्रत्ययान्ता निपात्यन्ते । निजेश्चः किच्च । **निचुलः** वञ्जुलः ॥ वजेर्नु च । **वञ्जुलः** निचुलः ॥ वचेः क च । **वकुलः** केसरः ॥ तमेरुच्चातः । **तुमुलः** भयानकः ॥ प्रथेः प्रसारणं च । **पृथुलः** विस्तीर्णः ॥ स्थः किच्च । **स्थूलः** पटकुटीविशेषः । वौ ससेस्थुट् च । **विसंस्थुलः** व्यग्रः । आदिग्रहणात् लगुलवल्गुलादयो भवन्ति ॥

॥ ७१५ ॥ पिञ्ज ऊलच् ॥ २. ३. १११ ॥

पिञ्ज ऊलच्प्रत्ययो भवति । **पिञ्जूलः** हस्तिबन्धनपाशः ॥

॥ ७१६ ॥ कुसूलकुकूलदुकूलताम्बूलबल्लूललाङ्गूलशार्दूलादयः ॥ २. ३. ११२ ॥

कुसूलादयः शब्दा ऊलच्प्रत्ययान्ता निपात्यन्ते । कसेरत उच्च । **कुसूलं** कोष्ठम् ॥ कुदुवोः कुट् किच्च । **कुकूलः** करीषोऽग्निः ॥ **दुकूलं** क्षौमं वासः ॥ तमेर्बुक् दीर्घश्च । **ताम्बूलम्** पूगपर्णचूर्णसंयोगः ॥ बन्धेः लु बश्च [?] । **बल्लूलः** वृक्षविशेषः ॥ लङ्गेर्दीर्घश्च । **लाङ्गूलं** वालधिः ॥ शृणातेर्दुक् वृद्धिश्च । **शार्दूलः** व्याघ्रः । आदिग्रहणात् मार्कूलवञ्जूलकण्डूलादयो भवन्ति ॥

॥ ७१७ ॥ महेलच् ॥ २. ३. ११३ ॥

महेरेलच्प्रत्ययो भवति । **महेला** स्त्री ॥

॥ ७१८ ॥ कटिपटिभ्यामोलः ॥ २. ३. ११४ ॥

आभ्यामोलप्रत्ययो भवति । **कटोलः** ओषधिः ॥ **पटोला** ओषधिः ॥

॥ ७१९ ॥ कपोलकल्लोलकक्कोलमक्कोलादयः ॥ २. ३. ११५ ॥

कपोलादयः शब्दा ओलच्प्रत्ययान्ता निपात्यन्ते । कपेर्नलोपश्च ।

कपोलः वदनैकदेशः ॥ कल्लेश्च । **कल्लोलः** ऊर्मिः ॥ कचिमचोः कश्च । **कक्कोलः** लताविशेषः ॥ **मक्कोलः** सुधाविशेषः । आदिग्रहणात् गण्डोलादयो भवन्ति ॥

॥ ७२० ॥ **वलेः कलच्** ॥ २. ३. ११६ ॥

वले. कलच्प्रत्ययो भवति । **वल्कलम्** तरुत्वक् ॥

॥ ७२१ ॥ **मिञः खलच्चैच्च** ॥ २. ३. ११७ ॥

मिञः खलच्प्रत्यय चकारात् कलच्च । एकारश्चान्तादेशो भवति । **मेखला** गिरिनितम्ब· ॥ **मे .लः** नर्मदाप्रभवोऽद्रि· ॥

॥ ७२२ ॥ **श्रो नुं ह्रस्वश्च** ॥ २. ३. ११८ ॥

श्रृणोतेः खलच्प्रत्ययो नुं ह्रस्वश्च भवति । **शृङ्खला** लोहरज्जु. ॥

॥ ७२३ ॥ **शमिकमिभ्यां बलच्** ॥ २. ३. ११९ ॥

आभ्या बलच्प्रत्ययो भवति । **शम्बलम्** पाथेयम् ॥ **कम्बलः** प्रावारः ॥

॥ ७२४ ॥ **डुकुटिकशिशालिभ्यः क्मलच्** ॥ २. ३. १२० ॥

एभ्य· क्मलच्प्रत्ययो भवति । **डुमलम्** जलम् ॥ **कुट्मलम्** मुकुलम् ॥ **कश्मलम्** मलिनम् ॥ **शाल्मलः** वृक्षविशेष. ॥

॥ ७२५ ॥ **वतेः सलक्** ॥ २. ३. १२१ ॥

वते. सलक्प्रत्ययो भवति । **वत्सलः** गोमान् ॥

॥ ७२६ ॥ **शीङो वलञ्वलनौ** ॥ २. ३. १२२ ॥

शीङो वलञ्वलनौ प्रत्ययौ भवतः । **शैवालं** अवका ॥ **शैवलं** तदेव ॥

॥ ७२७ ॥ **तुल्वलेल्वलपल्वलादयः** ॥ २. ३. १२३ ॥

तुल्वलादयः शब्दाः वलञ्प्रत्ययान्ता निपात्यन्ते । तुलीलिपलीनां

णिलुक् च । **तुल्वलः** ऋषिः ॥ **इल्वलः** असुरः । **इल्वलाः** तिस्रः मृगशिरस्ताराः ॥ **पल्वलम्** जलाशयः । आदिग्रहणात् शाद्वलादयो भवन्ति ॥

॥ ७२८ ॥ शृसृहसिभ्यो वः ॥ २. ३. १२४ ॥

एभ्यो वप्रत्ययो भवति । **शर्वः** शिवः ॥ **सर्व** स एव । **ह्रस्वः** लघु ॥

॥ ७२९ ॥ उर्देर्धश्च ॥ २. ३. १२५ ॥

"उर्द माने" इत्यस्माद्धातोः वप्रत्ययो धकारश्चान्तादेशो भवति । **ऊर्ध्वा** ऊर्ध्ववर्ष्म ॥

॥ ७३० ॥ गन्धेररक् च ॥ २. ३. १२६ ॥

गन्धेर्वप्रत्ययोऽरक् चागमो भवति । **गन्धर्वः** देवविशेषः ॥

॥ ७३१ ॥ इण्शीङ्श्याशालापदिभ्यो नित् ॥ २. ३. १२७ ॥

एभ्यो वप्रत्ययो निद्भवति । **एवः** केवलः ॥ **शेवः** सुखकृत् ॥ **श्यावः** कपिशः ॥ **शावः** अर्भकः ॥ **लावः** पक्षी ॥ **पद्वः** वायुः ॥

॥ ७३२ ॥ इष्वनिघृष्वरिष्वलिष्वादयः ॥ २. ३. १२८ ॥

इष्वादयः शब्दा वप्रत्ययान्ता निपात्यन्ते । इषिवृषिऋषीणां किच्च । **इष्वः** आचार्यः ॥ **निघृष्वः** निकषः ॥ **रिष्वः** हिंस्रः ॥ लषेरिच्चोपधायाः । **लिष्वः** लम्पटः । आदिग्रहणात् वृष्वादयो भवन्ति ॥

॥ ७३३ ॥ अशूस्रुप्रुषिलटिखटिकणिविलिनलिशलिखलिभ्यः क्वन् ॥ २. ३. १२९ ॥

अशूप्रभृतिभ्यः क्वन्प्रत्ययो भवति । **अश्वः** तुरगः ॥ **स्रुवः** हवनभाण्डम् ॥ **प्रुष्वः** निवृत्तिः ॥ **लट्वा** क्षुद्रकटका ॥ **खट्वा** शय्या ॥ **कण्वः** मुनिः ॥ **विल्वः** मालूरः ॥ **नल्वः** भूमानविशेषः ॥ **शल्वाः** क्षत्रियाः ॥ **खल्वः** दृतिः । **खल्वम्** निम्नम् ॥

॥ ७३४ ॥ शीङापो ह्रस्वश्च ॥ २. ३. १३० ॥

आभ्यां क्नप्रत्ययो ह्रस्वश्च भवति। शिवः शम्भुः। शिवा हरीतकी॥ अप्वा देवयूथम्॥

॥ ७३५ ॥ यसेर्ह च ॥ २. ३. १३१ ॥

यसेः क्नप्रत्यय हश्चान्तादेशो भवति। यह्वा बुद्धिः॥

॥ ७३६ ॥ लिहेर्जिह च ॥ २. ३. १३२ ॥

लिहेः क्नप्रत्ययो जिह चादेशो भवति। जिह्वा रसना॥

॥ ७३७ ॥ न भुवो डित् ॥ २. ३. १३३ ॥

भवतेर्नञ्युपपदे क्नप्रत्ययो भवति। अभ्वम् अद्भुतम्॥

॥ ७३८ ॥ कुपिकितिपणिपेलृपल्लिवल्लिमालिभ्योऽवक् ॥ २. ३. १३४ ॥

एभ्योऽवक्प्रत्ययो भवति। **कुपवः** मानम्॥ **कितवः** धूर्तः॥ **पणवः** वाद्यम्॥ **पेलवः** कोमलः॥ **पल्लवः** किसलयम्॥ **वल्लवः** गोपः॥ **मालवाः** जनपदः॥

॥ ७३९ ॥ कैरवभैरवकैरण्डवादीनवादयः ॥ २. ३. १३५ ॥

एते शब्दा अवक्प्रत्ययान्ता निपात्यन्ते। कुभृञो कैभरौ च। **कैरवं** कुमुदम्॥ **भैरवः** भर्गः॥ कृञोऽण्डक् वृद्धिश्च। **कारण्डवः** जलपक्षी॥ आङि दीङो नुट् च। **अदीनवः** दोषः। आदिग्रहणात् कोद्रवकोटवबटवादयो भवन्ति॥

॥ ७४० ॥ शृणोतेरावः ॥ २. ३. १३६ ॥

शृणोतेरावप्रत्ययो भवति। **शरावः** वर्धमानकः।

॥ ७४१ ॥ प्रथेः षिवन् पृथ च ॥ २. ३. १३७ ॥

प्रथेः षिवन्प्रत्यय पृथ चादेशो भवति। **पृथिवी** भूः॥

॥ ७४२ ॥ अमेरीवः ॥ २. ३. १३८ ॥

अमेरीवप्रत्ययो भवति । अमीवा ऋभुक्षाः ॥

॥ ७४३ ॥ ग्रसेर्डित् ॥ २. ३. १३९ ॥

ग्रसेरीवप्रत्ययो डित् भवति । ग्रीवा कन्धरा ॥

॥ ७४४ ॥ कुदापाभ्यः शः ॥ २. ३. १४० ॥

एभ्यः शप्रत्ययो भवति । कोशः सारः ॥ दाशः कैवर्तः ॥ पाशः बन्धनम् ॥

॥ ७४५ ॥ वृभृवम्यमिकुभ्यः शक् ॥ २. ३. १४१ ॥

वृप्रभृतिभ्य· शक्प्रत्ययो भवति । वृशम् शृङ्गिबेरम् ॥ भृशम् अत्यर्थम् ॥ वंशः वेणु· ॥ अंशः भागः ॥ कुशः दर्भ ॥

॥ ७४६ ॥ कलेरशच् ॥ २. ३. १४२ ॥

कलेरशच्प्रत्ययो भवति । कलशः कुम्भ ॥

॥ ७४७ ॥ इणस्तुट् च ॥ २. ३. १४३ ॥

इणोऽशच्प्रत्ययः तुट् चागमो भवति । एतशः अश्वः ॥

॥ ७४८ ॥ पलेराशच् ॥ २. ३. १४४ ॥

पलेराशच्प्रत्ययो भवति । पलाशः ब्राह्मवृक्षः ॥

॥ ७४९ ॥ कनेरी चातः ॥ २. ३. १४५ ॥

कनेराशच्प्रत्यय. । अकारस्य ईकारादेशो भवति । कीनाशः यमः ॥

॥ ७५० ॥ कणिकुलिवलिबलिभ्यः किशच् ॥ २. ३. १४६ ॥

कण्यादिभ्यः किशच्प्रत्ययो भवति । कणिशं सस्यमञ्जरी ॥ कुलिशं वज्रम् ॥ वलिशं यत्तस्थित्वा मृगा व्यापाद्यन्ते ॥ बलिशं मत्स्यग्रहणम् ॥

॥ ७५१ ॥ तिनिशेतिशबालिशादयः ॥ २. ३. १४७ ॥

तिनिशादय शब्दा किशच्प्रत्ययान्ता निपात्यन्ते । तनोतेरिच्चातः । **तिनिशः** वृक्षः ॥ **इतिशः** मुनिः ॥ बलेर्वृद्धिश्च । **बालिशः** मूर्खः ॥

॥ ७५२ ॥ अर्तेः पिशन् ॥ २. ३. १४८ ॥

अर्तेः पिशन्प्रत्ययो भवति । **अर्पिशम्** अग्रमासः ॥

॥ ७५३ ॥ अङ्किमस्जिभ्यामुशच् ॥ २. ३. १४९ ॥

आभ्यामुशच्प्रत्ययो भवति । **अङ्कुशः** सृणिः ॥ **मग्गुशः** नकुलः ॥

॥ ७५४ ॥ युमाभ्यां षः ॥ २. ३. १५० ॥

आभ्या षप्रत्ययो भवति । **योषा** स्त्री ॥ **माषः** धान्यविशेषः ॥

॥ ७५५ ॥ स्नुमूभ्यां कित् ॥ २. ३. १५१ ॥

आभ्यां षप्रत्ययः किद्भवति । **स्नुषा** पुत्रवधूः ॥ **मूषा** हेमावपनादिः ॥

॥ ७५६ ॥ कलेर्मषक् ॥ २. ३. १५२ ॥

कलेर्मषक्प्रत्ययो भवति । **कल्मषम्** पापम् ॥

॥ ७५७ ॥ कुलेश्च माषक् ॥ २. ३. १५३ ॥

कुलेश्च माषक्प्रत्ययो भवति । **कल्माषः** वर्ण ॥ **कुल्माषः** अर्धस्विन्नमाषादिः ॥

॥ ७५८ ॥ जलेराषः ॥ २. ३. १५४ ॥

जलेराषप्रत्ययो भवति । **जलाष** जलम् ॥

॥ ७५९ ॥ अविमह्योष्टिषच् ॥ २. ३. १५५ ॥

आभ्यां टिषच्प्रत्ययो भवति । **अविषः** समुद्रः । **अविषी** गङ्गा ॥ **महिषः** सैरिभः । **महिषी** राजपत्नी ॥

॥ ७६० ॥ रुहेर्वृद्धिश्च ॥ २. ३. १५६ ॥

रुहेष्टिषच्प्रत्ययो वृद्धिश्च भवति । **रौहिषः** तृणजातिः । **रौहिषी** दूर्वा ॥

॥ ७६१ ॥ तवेर्णिद्वा ॥ २. ३. १५७ ॥

तवेष्टिषच्प्रत्ययो णिद्वा भवति । **तविषं** जलम् ॥ **ताविषं** तदेव ॥

॥ ७६२ ॥ नञि व्यथेः ॥ २. ३. १५८ ॥

व्यथेर्नञ्युपपदे टिषच्प्रत्ययो भवति । **अव्यथिषः** सूर्यः । **अव्यथिषी** पृथिवी ॥

॥ ७६३ ॥ कलेर्वुगिच्चोपधायाः ॥ २. ३. १५९ ॥

कलेष्टिषच्प्रत्ययो वुगागमः उपधायाश्चेकारादेशो भवति । **किल्बिषं** पापम् ॥

॥ ७६४ ॥ कृतॄभ्यामीषन् ॥ २. ३. १६० ॥

आभ्यामीषन्प्रत्ययो भवति । **करीषं** शुष्कगोमयरजः ॥ **तरीषं** प्लवः ॥

॥ ७६५ ॥ ऋजिशॄपॄभ्यः कित् ॥ २. ३. १६१ ॥

ऋज्यादिभ्यः ईषन्प्रत्ययः किद्भवति । **ऋजीषः** अवस्करः ॥ **शिरीषः** वृक्षः ॥ **पुरीषं** शकृत् ॥

॥ ७६६ ॥ उषेर्नक् लोपश्च ॥ २. ३. १६२ ॥

उषेरीषन्प्रत्ययः नक् लोपश्चागमो भवति । **उष्णीषम्** मुकुटम् ॥

॥ ७६७ ॥ अमेर्वरट् च ॥ २. ३. १६३ ॥

अमेरीषन्प्रत्ययो वरट् चागमो भवति । **अम्बरीषं** भ्राष्ट्रम् ॥

॥ ७६८ ॥ ऋपॄकॢपिहपिनहिकलिभ्य उषन् ॥ २. ३. १६४ ॥

एभ्य उषन्प्रत्ययो भवति । **अरुषं** व्रणः ॥ **परुषः** कलुषः ॥ **कल्पुषः** क्रियानुगुणः ॥ **हपुषा** ओषधिः ॥ **नहुषः** राजा ॥ **कलुषः** अस्वछः ॥

॥ ७६९ ॥ पुरः किच्च ॥ २. ३. १६५ ॥

पिपर्तेरुषन्प्रत्ययः किद्भवति । **पुरुषः** ॥

॥ ७७० ॥ जॄपॄकॄमञ्जिपीयिहन्यङ्गिगण्डिभ्य ऊषन् ॥ २. ३. १६६ ॥

जॄप्रभृतिभ्य ऊषन्प्रत्ययो भवति । **जरूषः** आदित्यः ॥ **परूषः** वृक्षविशेषः ॥ **करूषः** काष्ठम् ॥ **मञ्जूषा** कोष्ठकम् ॥ **पीयूषम्** अमृतम् ॥ **हनूषः** राक्षसः ॥ **अङ्गूषः** बाणः ॥ **गण्डूषः** द्रवकवलम् ॥

॥ ७७१ ॥ यूषशूषार्कलूषकारूषकोरदूषाटरूष-शैलूषादयः ॥ २. ३. १६७ ॥

यूषादय शब्दाः ऊषन्प्रत्ययान्ता निपात्यन्ते । युशुवोर्डिच्च । **यूषः** पेयविशेषः॥ **शूषः** पलम् ॥ अर्के लुट् च । **अर्कलूषः** ऋषिः ॥ कृञो वृद्धिश्च । **कारूषाः** जनपदः ॥ कुरेरदुट्च । **कोरदूषः** कोद्रवः ॥ आटेररट् च । **आटरूषः** पाशः ॥ शलेश्चातः । **शैलूषः** नटः । आदिग्रहणात् ऊषप्रत्यूषाभ्यूषादयो भवन्ति ॥

॥ ७७२ ॥ कश्यशिपचिमुचियजिहनिकमिवदि-वामान्माभ्यः सः ॥ २. ३. १६८ ॥

कश्यादिभ्य. सप्रत्ययो भवति । **कक्षः** गहनम् ॥ **अक्षः** विभीतकादि. ॥ **पक्षः** अर्धमासः ॥ **मोक्षः** अपवर्गः ॥ **यक्षः** गुह्यक ॥ **हंसः** मरालः ॥ **कंसः** हिरण्यम् ॥ **वत्सः** तर्णकः ॥ **वासा** आटरूषकः ॥ **मांस** पिशितम् ॥ **मासः** चैत्रादिः ॥

॥ ७७३ ॥ प्लुषेरच्चोपधायाः ॥ २. ३. १६९ ॥

प्लुषेः सप्रत्ययः उपधायाश्चाकारान्तादेशो भवति । **प्लक्षः** वृक्षविशेषः ॥

॥ ७७४ ॥ ऋचिरिषिकृतिवृश्चिशॄगृधिभ्यः कित् ॥ २. ३. १७० ॥

ऋच्यादिभ्यः सप्रत्ययः किद्भवति । **ऋक्षं** नक्षत्रम् ॥ कपिरकादित्वा-ल्लत्वेन **लिक्षा** ॥ **कृत्सः** मुनिः ॥ **वृक्षः** पादपः ॥ **शीर्षं** शिरः ॥ **गृत्सः** गृध्नुः ॥

॥ ७७५ ॥ अमेर्नित् ॥ २. ३. १७१ ॥

अमेर्धातोः सप्रत्ययो निद्भवति । **अंसः** बाहुमूर्धा ॥

॥ ७७६ ॥ उन्देर्नलोपश्च ॥ २. ३. १७२ ॥

"उन्दी क्लेदने" इत्यस्माद्धातोः नित्, नकारलोपश्चास्य भवति । **उत्सः** जलम् ॥

॥ ७७७ ॥ पन्यल्यवरन्धिरभिचमिचटयतितमियुभ्योऽसच् ॥ २. ३. १७३ ॥

पन्यादिभ्योऽसच्प्रत्ययो भवति । **पनसः** वृक्षविशेषः ॥ **अलसः** अनुद्यमः ॥ **अवसं** पाथेयम् ॥ **रन्धसः** अन्धजातिः ॥ **रभसः** उद्धर्षः ॥ **चमसः** सोमपात्रम् ॥ **चटसः** चर्मपुटम् ॥ **अतसी** धान्यविशेषः ॥ **तमसा** नाम नदी ॥ **यवसः** अश्वादिघास. ॥

॥ ७७८ ॥ वेतसतामरससारसादयः ॥ २. ३. १७४ ॥

वेतसादयोऽसच्प्रत्ययान्ता निपात्यन्ते । वियस्तुट् च । **वेतसः** वानीरः ॥ तमेरः वृद्धिश्च । **तामरसं** प द्म॥ सर्तेर्णिच्च । **सारसः** पक्षिविशेष. ॥ आदिग्रहणात् उरसपुल्कसादयो भवन्ति ॥

॥ ७७९ ॥ पीङो नसक् ॥ २. ३. १७५ ॥

पीङो नसक्प्रत्ययो भवति । **पीनसः** श्लेष्मव्याधिः ॥

॥ ७८० ॥ कृपियुवलिभ्य आसः ॥ २. ३. १७६ ॥

कृपादिभ्यः आसप्रत्ययो भवति । **कर्पासः** पित्तप्रकृतिः ॥ **यवासः** दुरालभा ॥ **वलासः** श्लेष्म ॥

॥ ७८१ ॥ किलेः कित् ॥ २. ३. १७७ ॥

किलेरासप्रत्ययः किद्भवति। **किलासं** सिध्मम्। **किलासी** पाकखर्परः॥

॥ ७८२ ॥ **कुरः पासः** ॥ २. ३. १७८ ॥

"कुर शब्दे" इत्यस्मात् पासः प्रत्ययो भवति। **कूर्पासः** कञ्चुकम्॥

॥ ७८३ ॥ **पटिवीभ्यां टिसडिसचौ** ॥ २. ३. १७९ ॥

आभ्यां टिसडिसचौ प्रत्ययौ भवतः। **पटिसम्** आयुधविशेषः॥ **बिसं** मृणालम्॥

॥ ७८४ ॥ **तालेरीसच्** ॥ २. ३. १८० ॥

तालेरीसच्प्रत्ययो भवति। **तालीसं** गन्धद्रव्यम्॥

॥ ७८५ ॥ **त्रपेरुसच्** ॥ २. ३. १८१ ॥

त्रपेरुसच्प्रत्ययो भवति। **त्रपुसी**। विधानसामर्थ्यात् षत्वं न भवति॥

॥ ७८६ ॥ **अलेरम्बुसः** ॥ २. ३. १८२ ॥

अलेरम्बुसप्रत्ययो भवति। **अलम्बुसः** यातुधानः। **अलम्बुसा** नामौषधिः॥

॥ ७८७ ॥ **लूञो हः** ॥ २. ३. १८३ ॥

लूञो हः प्रत्ययो भवति। **लोहः** सुवर्णादि॥

॥ ७८८ ॥ **हिंसेः कित् सिं च** ॥ २. ३. १८४ ॥

हिंसेः हः प्रत्ययः कित् सि चास्यादेशो भवति। **सिंहः** मृगराजः॥

॥ ७८९ ॥ **कलेरहः** ॥ २. ३. १८५ ॥

कलेरहः प्रत्ययो भवति। **कलहः** युद्धम्॥

॥ ७९० ॥ **अनेरोकहः** ॥ २. ३. १८६ ॥

अनेरोकहः प्रत्ययो भवति । **अनोकहः** वृक्षः ॥

॥ ७९१ ॥ कटेराहः ॥ २. ३. १८७ ॥

कटेराहः प्रत्ययो भवति । **कटाहः** लोहादिपात्रम् ॥

॥ ७९२ ॥ निरिण उहक् ॥ २. ३. १८८ ॥

इणो निर्युपपदे अहक्प्रत्ययो भवति । **निर्यूहः** सौधादिकाष्ठनिर्गमः ॥

॥ ७९३ ॥ दस्त्यूहः ॥ २. ३. १८९ ॥

दस्त्यूहः प्रत्ययो भवति । **दस्त्यूहः** पक्षिविशेषः ॥

॥ ७९४ ॥ वलेरक्षन् ॥ २. ३. १९० ॥

वलेरक्षन्प्रत्ययो भवति । **बलक्षः** शुक्लः ॥

॥ ७९५ ॥ लाक्षाद्राक्षामिक्षादयः ॥ २. ३. १९१ ॥

लाक्षादयः शब्दाः अक्षन्प्रत्ययान्ता निपात्यन्ते । लसेरा च । **लाक्षा** जतु ॥ रसेर्दट् च । **द्राक्षा** मृद्वीका ॥ आङि मृजेष्टिलोपः प्रत्ययादेरिच्च । **आमिक्षा** हविर्विशेषः । आदिग्रहणात् चोक्षपीयूक्षादयः ॥

इति श्रीदण्डनाथनारायणभट्टविरचितायां सरस्वतीकण्ठाभरणस्य
वृत्तौ सहृदयहारिण्यां द्वितीयस्याध्यायस्य
तृतीयः पादः



INDEX OF SŪTRAS

INDEX OF WORDS

* Words marked with asterisk are found only in the Commentary

CORRIGENDA

PAGE	LINE	FOR	READ
4	6	चक्रः	चक्रुः
5	4	ऋतुः	ऋभुः
7	1	सृवृभ्यां	सृपृभ्यां
	2	दाकुः	पृदाकुः
15	2	मर्जूरः	मर्जूः
24	13	वस्यति	वस्यर्ति
25	1	No 199 is omitted by mistake	
28	21	दृभ्या विपृन्	दृपृभ्यां विन्
29	1	जृभृस्तृ	जृशृस्तृ
	10	शिनिः	शिबिः
44	16	तौकम्	तोकम्
	17	कर्तः	कर्कः
46	19	पाकत	पताका
48	23	अशिकशोः	अशिकचोः
53	3	भृशूभ्यां	भृशुभ्यां
53	7	भृङ्ग विषाणन्	भृङ्ग विषाणम्
	14	नीभ्यो	नृभ्यो
56	15	बुंक्	बुक्
58	13	चरे	चिरे
59	12	नकुट	नकुंट
62	14	जावी	जीवी
	19	बातः	वातः
64	6	बुक्	षुक्
66	1	पानन्	पानम्
80	20	दद्घ्न	दघ्नि
84	19	भ्रिमि	भ्रमि
88	7	मकुलं	मुकुलं
	18,20,22	३-२-	२-३-
94	10	भृष्ट-	भ्रष्ट-
97	19	महेलच्	महेरेलच्
100	7	न	नञि
	9	कुपि	कुडि
	11	कुपवः	कुडवः
107	4	उहक्	ऊहक्
	5	अहक्	ऊहक्
[७]	28	कुडु	डुकु

THE ŪṆADISŪTRAS OF THE KĀTANTRA SCHOOL

WITH

THE VṚTTI OF DURGASIMHA

॥ श्रीः ॥

॥ दुर्गसिंहविरचिता उणादिवृत्तिः ॥

॥ १ ॥ कृवापाजिमिस्वदिसाध्यशूदसनिजनिचरिचटिभ्य उण् ॥ १. १ ॥

नमस्कृत्य गिरं भूरिशब्दसन्तानकारणम् ।
उणादयोऽभिधास्यन्ते बालव्युत्पत्तिहेतवे ॥

एभ्यो धातुभ्यः [उण्प्रत्य]यो भवति । उणादय "भूतेऽपि" । भूते काले । अपिशब्दाद्वर्तमाने भविष्यति च । "ताभ्यामन्यत्रोणादयः" । ताभ्या संप्रदानापादानाभ्यां अन्यस्मिन् कारके कर्तरि कर्मादौ यथाभिधानं "प्रत्यय" "पर" इति परिभाषायां उणादयो भवन्ति । णकार इज्वद्भावार्थः । "डु कृञ् करणे" करोतीति **कारुः** शिल्पी ॥ "वा गतिगन्धनयोः" वातीति **वायुः** समीरः ॥ "धेट् पा पाने" पिबतीति **पायुः** अपानम् ॥ "जि जये" जयतीति **जायुः** औषधम् ॥ "डु मिञ् प्रक्षेपणे" मिनोतीति **मायुः** पित्तम् । गोपूर्वस्यान्योऽर्थ । गा वाचं मिनोतीति गोमायु सृगालः ॥ "स्वद स्वादने" स्वदते **स्वादुः** मधुरम् ॥ "राध साध संसिद्धौ" साध्यतीति [साध्नोतीति] **साधुः** कुशलः ॥ "अशूङ् व्याप्तौ" अश्नुत इति **आशु** शीघ्रम् ॥ "दॄ विदारणे" दृणातीति **दारुः** काष्ठम् ॥ "षणु दाने" सनोतीति **सानुः** प्रस्थम् शृङ्गम् पर्वतैकदेश ॥ "जन जनने" जायत इति **जानुः** अष्ठिवान् ॥ "चरिः" गत्यर्थ । चरतीति **चारु** शोभनम् ॥ "चट स्फुट भेदे" चटतीति **चाटुः** पटुवादी ॥

॥ २ ॥ किञ्जरयोः श्रिण्भ्याम् ॥ १. २ ॥

किञ्जरयोरुपपदयो यथासङ्ख्यमाभ्यां उण्प्रत्ययो भवति । "शॄ हिसा-

याम्" कि श्रृणातीति **किंशारुः** धान्यशूकम् ॥ "इण् गतौ" जरामेतीति **जरायुः** कललम् गर्भवेष्टनम् ॥

॥ ३ ॥ वहिरहितलिपंशिभ्य उण् ॥ १. ३ ॥

एभ्य उण्प्रत्ययो भवति । "वह प्रापणे" वहयत्य[उद्यने]· [नेने]ति **बाहुः** भुज. ॥ "रह त्यागे" रहयतीति **राहुः** ग्रह· ॥ "तल प्रतिष्ठायाम्" हेतौ तालयतीति **तालुः** वदनैकदेश । पुनरुण्ग्रहणात् उपधोपधस्याप्यकारस्य दीर्घ ॥ "पशि नाशने" पशतीति **पांशुः** रेणु. ॥

॥ ४ ॥ कृके वचो घुण् ॥ १. ४ ॥

कृकशब्दे उपपदे अस्मात् घुण्प्रत्ययो भवति । "वच परिभाषणे" कृकेण शिरो . वेण वक्तीति **कृकवाकुः** ताम्रचूड. ॥

॥ ५ ॥ भृमृतृचरित्सरित..[निम]स्जिशीङ्भ्य उः ॥ १. ५ ॥

एभ्य उप्रत्ययो भवति । "भृञ् भरणे" बिभर्तीति **भरुः** भर्ता ॥ "मृङ् प्राणत्यागे" म्रियते अस्मिन्निति **मरुः** निर्जलो देश. ॥ "तॄ प्लवन-तरणयो·" तरतीति **तरुः** वृक्ष ॥ "चरि." गत्यर्थ । चरतीति **चरुः** हविष्यान्नम् ॥ " [त्सर] छद्मगतौ" त्सरतीति **त्सरुः** खड्गमुष्टि· दण्डमुष्टिश्च ॥ "तनु विस्तारे" तनोतीति **तनुः** शरीरम् ॥ "टु मस्जो" मज्जतीति **मद्गुः** प्राणिविशेषः जलवायसो वा ॥ "शीङ् स्वप्ने" शेते **शयुः** अजगरः ॥

॥ ६ ॥·[प]टयसिवसिहनिमनित्रपीन्दिकन्दिबन्धिव··[हय]-णिभ्यश्च ॥ १. ६ ॥

एभ्य एकादशभ्य उप्रत्ययो भवति । "·[प]ट गतौ" पटतीति **पटुः** स्फुटवादी ॥ "असु क्षेपणे" जन्मनि जन्मनि देहमस्यन्तीति **असवः** इति नित्य बहुवचनम् ॥ "वस निवासे" वसतीति **वसु** द्रव्यम् ॥ "हन हिंसागत्योः" हन्ति वैरूप्यमिति **हनुः** कपोलैकदेश· ॥ "मन ज्ञाने" मन्यते धर्ममनेनेति **मनुः** प्रजापतिः ॥ "त्रपौषि लज्जायाम्" त्रपते **त्रपु** सीसकम् ॥

" इदि परमैश्वर्ये " इन्दतीति **इन्दुः** शशी ॥ " कदि क्रदि " दण्डको धातु । कन्दति कन्दने वा **कन्दुः** पाकस्थानविशेषः ॥ " बन्ध बन्धने " बध्नातीति **बन्धुः** स्वजनः ॥ " वह प्रापणे " वहतीति **बहु** प्रभूतम् ॥ " अण रण " इति दण्डको धातु । अणतीति **अणुः** सूक्ष्म व्रीहिश्च । चका··[रोऽ]-नुक्तसमुच्चयमात्रे ॥

॥ ७ ॥ स्यदेः[स्यन्देः] संप्रसारण··[धश्च] ॥ १. ७ ॥

अतश्च उप्रत्ययो भवति । सस्वरस्य यकारस्य संप्रसारणं च । अन्त-दकारस्य धकारादेश । " स्यन्दू प्रस्रवणे " स्यन्दते **सिन्धुः** नदी सागरश्च ॥

॥ ८ ॥ मनिजनिनमां मधजतनाकश्च ॥ १. ८ ॥

·[ए]षामुप्रत्ययो भवति, मधजतनाका यथासङ्ख्यमादेशा भवन्ति " मन ज्ञाने " मन्यते **मधुः** पुष्परस ॥ " जन जनने " जायते **जतु** लाक्षा । " [णमु] प्रह्वत्वे " । णो न । नमतीति **नाकुः** ॥

॥ ९ ॥··[र]ज्जुतर्कुवल्गुफल्गुशिशुरिपुपृथु[2]·[ल]घवः ॥ १. ९ ॥

एते उप्रत्ययान्ता निपात्यन्ते । निपातनमप्राप्तिप्रापणार्थ प्राप्तेश्च बाधन [ार्थम्] । लक्षणेन यदसिद्धं तत्सर्वं निपातनात्सिद्धम् । " सृज विसर्गे " सृज्यत इति **रज्जुः** गुणमयी ॥ " कृती छेदने " कृन्ततीति **तर्कु** कर्तनम् ॥ " वल वल्ल च " वलत इति **वल्गु** मनोज्ञम् ॥ " फल निष्पत्तौ " फलतीति **फल्गु** असारम् ॥ " शश प्लुतगतौ " शशतीति **शिशुः** बालक ॥ " रप लप " निष्ठुर रपतीति **रिपुः** शत्रु. ॥ " प्रथ प्रख्याने " प्रथते वर्धते **पृथु** विस्तीर्णम् ॥ " लघि. " गत्यर्थ । लङ्घत इति **लघुः** अल्प. ।

॥ १० ॥ इषिधृषिभिदिगृधि..[मृदि]पृभ्यः कुः ॥ १. १० ॥

एभ्यः कुप्रत्ययो भवति । " इषु इच्छायाम् " इच्छतीति **इषुः** शर ॥ " ञि धृषा " धृष्णोतीति **धृषुः** प्रगल्भ ॥ " भिदिर् " भिनत्तीति **भिदुः** वज्रम् ॥ " गृधु अभिकाङ्क्षायाम् " गृध्यतीति **गृधुः** काम ॥ [" मृद क्षोदे "]

---

१. The ms reads पाद-

२. The ms reads पृथ-

मृद्नातीति **मृदु** कोमलम् ॥ "पॄ पालने" पृणातीति **पुरुः** क्षत्रियविशेषः । कानुबन्धः यण्वद्भावादगुणार्थः ॥

॥ ११ ॥ कॄग्रो ऋत उश्च ॥ १. ११ ॥

अनयोः कुप्रत्ययो भवति, ऋकारस्य उरादेशश्च । "कॄ विक्षेपे" किरतीति **कुरुः** देशविशेषः ॥ ["गॄ निग]रणे" गिरतीति **गुरुः** आचार्य ॥

॥ १२ ॥ अर्तेरू च ॥ १. १२ ॥

अस्मात् कुप्रत्ययो भवति । ऋकारस्य उरादेशः । चकारादूरादेशश्च । "ऋ सृ गतौ" इयर्तीति **उरुः** महान् ॥ **ऊरुः** सक्थि ॥

॥ १३ ॥ भ्रस्जेः सलोपश्च ॥ १. १३ ॥

अस्मात् कुप्रत्ययो भवति । अस्य च सकारलोपः । "भ्रस्ज पाके" भृज्जतीति **भृगुः** प्रपातो मुनिश्च ॥

॥ १४ ॥ न्यवञ्चेः ॥ १. १४ ॥

निशब्द उपपदे अस्मात् कुप्रत्ययो भवति । "अञ्चु गतिपूजनयोः" न्यञ्चतीति **न्यङ्कुः** मृगविशेषः ॥

॥ १५ ॥ अपष्ठ्वादयः ॥ १. १५ ॥

अपष्ठुदुष्ठुसुष्ठुहरिद्रुमितद्रुशतद्रुशङ्कुधनुमयुपशुदेवयुजटायुकुमारयुमृगयवः । एते शब्दाः कुप्रत्ययान्ता निपात्यन्ते । "ष्ठा गतिनिवृत्तौ" अपतिष्ठतीति **अपष्ठुः** अविद्यः ॥ दुस्तिष्ठतीति **दुष्ठु** ॥ सु तिष्ठतीति **सुष्ठु** शोभनम् ॥ "द्रु गतौ" हरि द्रवतीति **हरिद्रु** वृक्षविशेषः ॥ मितं द्रवतीति **मितद्रुः** [समु]द्रः ॥ शतं द्रवतीति **शतद्रु** नदीविशेष ॥ "शकि शङ्कायाम्" शङ्कते अस्माज्जन इति **शङ्कुः** कीलकः ॥ "धन धान्ये" दधाति [दधन्ति] **धनुः** राशिः शस्त्रं च ॥ ["डुमिञ् प्रक्षेपणे"] मिनोतीति **मयुः** किन्नरः ॥ [["पश"] इति सौत्रोऽयं धातुः । पशतीति **पशुः** चतुष्पदः ॥ "या प्रापणे" देवान् यातीति **देवयुः** धार्मिकः ॥ कुमारं यातीति **कुमारयु** राजपुत्रः ॥ जटां

---

१. The works within brackets are omitted in the ms

यातीति जटायुः पक्षिविशेष. ॥ मृगान् यातीति मृगयु लुब्धक ॥ एवमन्येऽप्यनुसर्तव्या ॥

॥ १६ ॥ आङ्परयोः खनिशॄभ्यां डुः ॥ १. १६ ॥

आङ्परयोरुपपदयो यथासङ्ख्यमाभ्या डुप्रत्ययो भवति । डोऽनुबन्ध· अन्त्यस्वरादिलोपार्थ· । "खन अवदारणे" आ समन्तात् खनतीति **आखुः** मूषकः ॥ "शॄ हिंसायाम्" परं शृणातीति **परशुः** कुठार ॥

॥ १७ ॥ मद्यकिवासिमथिचतिभ्य उरः ॥ १. १७ ॥

ए　[एभ्य उरप्रत्ययो] भवति । "मदि स्तुतौ" मन्दते **मन्दुरा** वाजिशाला ॥ "अकि लक्षणे" अङ्कने **अङ्कुरः** बीजप्रादुर्भाव ॥ "वास उपसेवायम्" वासयतीति **वासुरा** रात्रि· ॥ "मन्थ विलोडने" मन्थतीति **मथुरा** पुरी ॥ "चते चदे च" चतन इति **चतुरः** दक्षः । दकारान्तो गुणश्च ॥

॥ १८ ॥ मकुरदर्दुरविधुरासुराः ॥ १. १८ ॥

एते शब्दा उरप्रत्ययान्ता निपात्यन्ते । "मकि मण्डने" मङ्कने **मङ्कुरः** कल्कः ॥ "दॄ विदारणे" दृणातीति **दर्दुरः** भेक· ॥ "विध विधाने" विधति इति **विधुरः** विह्वल· ॥ "असु क्षेपणे" अस्यतीति **असुरः** देवारि· ॥

॥ १९ ॥ सावशेराप्तौ ॥ १. १९ ॥

सावुपपदे अस्मादुरप्रत्ययो भवति, आप्तौ गम्यमानायाम् । "अश भोजने" "अशू व्याप्तौ" स्वश्नुते **स्वशुरः** दम्पत्यो. पिता ॥

॥ २० ॥ अवमह्योष्टिषः ॥ १. २० ॥

आभ्या टिषप्रत्ययो भवति । टानुबन्धो नटाद्यर्थ. । "अव रक्ष पालने" अवतीति **अविषः** समुद्रः ॥ "मह पूजायाम्" महतीति **महिषः** सैरिभ· । नटादित्वात् महिषी राज्ञी ॥

The ms reads सावशो-

॥ २१ ॥ रुहेर्वृद्धिश्च ॥ १. २१ ॥

अस्मात् टिषप्रत्ययो भवति वृद्धिश्च । "रुह बीजजन्मनि प्रादुर्भावे" रोहतीति रौहिषं कत्तृणम् ॥

॥ २२ ॥ किल्बिषाव्यथिषौ ॥ १. २२ ॥

एतौ टिषप्रत्ययान्तौ निपात्येते । "कॄ विक्षेपणे" किरतीति किल्बिषं पापम् ॥ "व्यथ दुःखभयचलनयोः" नञ्पूर्वं । न व्यथते अव्यथिषः सूर्यः ॥

॥ २३ ॥ तिमिरुधिमदिमन्दिचन्दिबधिरुचिशुषिभ्यः किरः ॥ १. २३ ॥

एतेभ्य किरप्रत्ययो भवति । "तिम ष्टिम" तिम्यतीति तिमिरं तमः ॥ "रुधिर्" रुणद्धीति रुधिरं रक्तम् ॥ "मदि हर्षे" माद्यतीति मदिरा सुरा ॥ "मदि स्तुति[मोदमदस्वप्नकान्तिगतिषु]" मन्दते मन्दिरं गृहम् ॥ "चदि आह्लादने" चन्दतीति चन्दिरः हस्ती ॥ "बध बन्धने" बध्नातीति बधिरः श्रोत्रविकल ॥ "रुच दीप्तौ" रोचते रुचिरं सुन्दरम् ॥ "शुष शोषणे" शुष्यतीति शुषिरं विवरम् । को यण्वत् । तेन गुणाभाव ॥

॥ २४ ॥ अजिरादयः ॥ १. २४ ॥

अजिरशिशिरशिबिरस्थिरखदिरा । एते किरप्रत्ययान्ता निपात्यन्ते । "अज क्षेपणे" वैरूप्यमजतीति अजिरं प्राङ्गणम् ॥ "शशु हिंसायाम्" शशतीति शिशिर ऋतुविशेष ॥ "शव पिरु" शवतीति शिबिर सवृत्तिस्थाननिवेशश्च ॥ "ष्ठा गतिनिवृत्तौ" तिष्ठतीतिस्थिरः निश्चल ॥ "खाद भक्षणे" खादतीति खदिर । एवमन्येऽप्यनुसर्तव्या ॥

॥ २५ ॥ शलिमण्डिभल्लिभ्य ऊकञ् ॥ १. २५ ॥

एभ्य ऊकञ्प्रत्ययो भवति । "फल शल" शलतीति शालूकं जलसंभवम् ॥ "मडि भूषायाम्" मण्डते शिरः अलङ्करोतीति मण्डूकः भेक ॥ "भल भल्ल" भल्लते हिनस्तीति भल्लूकः पशुविशेषः ॥

॥ २६ ॥ सितनिगमिमसिसच्यवधाञ्क्रुशिभ्यस्तुन् ॥ १. २६ ॥

एभ्यस्तुन्प्रत्ययो भवति। "षिञ् बन्धने" सिनोति बध्नाति जल **सेतुः** जलरोध. ॥ "तनु विस्तारे" तनोतीति **तन्तुः** सूत्रम् ॥ "गमॢ गतौ" गच्छतीति **गन्तुः** पथिक आङ्पूर्वस्तु आगन्तु अतिथि. "मसी परिणामे" मस्यतीति **मस्तु** दधिमण्डम् ॥ "षच सेचने" सचने **सक्तुः** यवविकार ॥ "अव रक्ष पालने" आखुभ्यो गृहमवतीति **ओतुः** बिडाल ॥ "डु धाञ्" दधातीति **धातुः** अस्थ्यादि लोहितादिर्वा गैरिकापेत वस्तु ॥ "क्रुश आह्वाने" तुन्नन्तस्य तु । क्रुशे घुटि स्त्रियां असंबुद्धावनपुसके ना[त्रा]भिधानम् । तत्र तृचि[च्] च[न] शसादिपु षष्ठीबहुवचनवर्जितेपु स्वरेपु वा तत्रागमस्य परत्वात् स्वरस्याभावो ज्ञेय । क्रोशन्तीति क्रोष्टार, तान् क्रोष्टून् । क्रोशतीति **क्रोष्टा** तेन क्रोष्ट्रा क्रोष्टुना । व्यञ्जनविषये तुन्नेव । क्रोष्टुभ्या क्रोष्टुभि, क्रोष्टुभ्य, क्रोष्टूनाम् क्रोष्टुपु इति । उणादीना बाहुल्यात्

> " क्वचित्प्रवृत्ति क्वचिदप्रवृत्ति. क्वचिद्विभाषा क्वचिदन्यदेव ।
> विधेर्विधानं बहुधा समीक्ष्य चतुर्विध बाहुलक वदन्ति ॥ "

॥ २७ ॥ कमिमनिजनिवसिहिभ्यश्च ॥ १. २७ ॥

एभ्यस्तुन्प्रत्ययो भवति । "कमु कान्तौ" कमते **कन्तुः** कन्दर्पः ॥ "मन ज्ञाने" मन्यते **मन्तुः** ज्ञानी मुनिश्च ॥ "जन जनने" जजन्ति जन्यते वा **जन्तुः** प्राणी ॥ "वस निवासे" वसति सुखमनेन इति **वस्तु** धनम् । वास्तु गृहभूमि । भिन्ननिर्देशात् वसेर्वा दीर्घत्व वक्तव्यम् ॥ "हि गतौ" हिनोतीति **हेतुः** कारणम् ॥

॥ २८ ॥ केत्वादयः ॥ १. २८ ॥

केत्वृतुक्रत्वाप्तुपीत्वेधतुवहतुजीवातव· । एते तुन्प्रत्ययान्ता निपात्यन्ते । "कै शब्दे" । "सन्ध्यक्षरान्तनाम्" इत्याकार· । कायतीति **केतुः** ध्वज· ॥ "ऋ गतौ" इयर्ति इति ऋतु· वसन्तादिः ॥ "डु कृञ्" करोतीति क्रतु याग । क्रियते स्वर्गकामैर्वा ॥ "आपॢ व्याप्तौ" आप्नोतीति

आप्तुः याज्ञिक ॥ "पा पाने" पिबतीति पीतु· सूर्य· ॥ "एधङ् वृद्धौ" एधते एधतु अग्नि ॥ "वह प्रापणे" वहतीति वहतु अनड्वान् ॥ "जीव प्राणधारणे" जीवतीति जीवातुः जीवनम् । एवम् येऽप्यनुसर्तव्या ॥

॥ २९ ॥ **स्तनिहृषिपुषिगदिमदिभ्य इन इत्नुः** ॥ १. २९ ॥

एभ्य इनन्तेभ्य इत्नुप्रत्ययो भवति । "स्तन शब्दे" चौरादिक· । [स्तनयतीति **स्तनयित्नुः** ॥] "तुष हृष तुष्टौ" [हर्षयतीति हर्षयित्नुः ॥] ["पुष पुष्टौ" पोषयतीति पोषयित्नुः ॥ "गद व्यक्तायां वाचि" [गदयतीति **गदयित्नुः**] वावदूक· ॥ "मदि हर्षे" हेताविन् । मदयतीति **मदयित्नुः** सीधुः ॥

॥ ३० ॥ **मृग्रोरुतिः** ॥ १. ३० ॥

आभ्यामुतिप्रत्ययो भवति । इकार उच्चारणार्थ· । "मृङ् प्राणत्यागे" म्रियन्ते क्षुद्रजन्तव स्पर्शेनाभ्य इति **मरुत्** वायु ॥ "गॄ निगरणे" गिरतीति **गरुत्** पक्षिपिच्छम् ॥

॥ ३१ ॥ **कृषिचमितनिधनिबधिसर्जिखर्जिभ्य ऊः** ॥ १. ३१ ॥

एभ्य ऊप्रत्ययो भवति । "कृष विलेखने" कृष्यते **कर्षूः** शुष्कगोमयम् ॥ "चमु छमु" चमतीति **चमूः** सेना ॥ "तनु विस्तारे" तनोतीति **तनूः** शरीरम् ॥ "धन धान्ये" दधन्तीति **धनूः** शस्त्रम् ॥ "बध बन्धने" बधते[बध्नाति] चित्तमिति **बधूः** पुत्रादिभार्या ॥ "सर्ज आर्जने" सर्जतीति **सर्जूः** विद्युत् ॥ "खर्ज मार्जने" खर्जतीति **खर्जूः** कण्डूति. ॥

॥ ३२ ॥ **तॄो दोऽन्तश्च** ॥ १. ३२ ॥

अस्मादूप्रत्ययो भवति दोऽन्तश्च । "तॄ प्लवनतरणयो·" तीर्यते अनया **तर्दूः** ॥

॥ ३३ ॥ **दरिद्रातेर्यालोपश्च** ॥ १. ३३ ॥

इश्च आश्च यौ, योर्लोपो यालोप· । अस्मादूप्रत्ययो भवति इकाराकारयोर्लोपश्च । "दरिद्रा दुर्गतौ" दरिद्रातीति **दद्रूः** कुष्ठविशेष· ॥

---

1 The words within brackets are omitted in the ms

॥ ३४ ॥ कण्ड्वादयः [कच्छ्वदयः] ॥ १. ३४ ॥

कण्डू[कच्छू]दिधिषूजम्बूकम्ब्वड्वलाबूपादूकर्कन्धूकसेरूकासूनृभूरतू । एते ऊप्रत्ययान्ता निपात्यन्ते । "कच बन्धने" कचतीति कच्छूः पामा ॥ "दीधीङ् दीप्तिदेवनयोः" दिधीते दिधिषू पुनर्भू स्त्री ॥ "जन जनने" जनन्तीति जम्बू वृक्षविशेषः ॥ "कमु कान्तौ" कमते कम्बू परद्रव्यापहारी ॥ "अड उद्यमे" अडतीति अड्डू जलतरणि ॥ "लबि अवस्रंसने"। आङ्पूर्वः । आलम्बत अलाबू तुम्बीफलम् ॥ "पद गतौ" पद्यते पादूः उपानत् ॥ ["डुधाञ् धारणपोषणयो"] कर्कं कण्टकं दधातीति कर्कन्धूः बदरी ॥ "कस सिष" कसतीति कसेरू तृणविशेष मूलम् [चै] ॥ "कस गतौ" कसतीति कासूः वातरोगः ॥ "भा दीप्तौ" नृपूर्वः । नृभिर्भातीति नृभूः राजा ॥ "ऋ गतौ" इयर्तीति रतू कृमिविशेषः । एवमन्येऽप्यनुसर्तव्याः ॥

॥ ३५ ॥ हृसृतडिरुहियूषिभ्य इतिः ॥ १. ३५ ॥

एभ्य इतिप्रत्ययो भवति । इकार उच्चारणार्थः । "हृञ् हरणे" हरतीति हरित् वर्णविशेषः ॥ "सृ गतौ" सरतीति सरित् नदी ॥ "तड आघाते"। चौरादिकः । अस्य च अत एव दीर्घाभावः । ताडयतीति तडित् विद्युत् ॥ "रुह बीजजन्मनि" रोहयतीति रोहित् मत्स्यो वर्णविशेषश्च ॥ "यूष" हिंसार्थः । यूषतीति योषित् नारी ॥

॥ ३६ ॥ शमेर्डः ॥ १. ३६ ॥

अस्मात् डप्रत्ययो भवति । ["शमु उपशमे"] शाम्यतीति शण्डः नपुंसकः ॥

॥ ३७ ॥ अनुनासिकान्ताड्डः ॥ १. ३७ ॥

अनुनासिकान्ताद्धातोः डप्रत्ययो भवति । "वन" शब्दार्थः । वनतीति वण्डः ॥ षण्डः ॥ "खन अवदारणे" खनतीति खण्ड शकलम् अर्धं वा ॥

---

१. The ms adds आबू ।

२ The ms reads करेसूकसेरू ।

३. The words within brackets are omitted in the ms.

"कुण शब्दे" कुणति जनेन कुण्ड जलाश्रय· ॥ "दमु उपशमने" दम्यतीति दण्ड· यष्टि ॥ "रण" शब्दार्थ । रणतीति रण्डा विधवा ॥ "चण श्रण दाने" श्रणतीति श्रण्ड गोपतिः ॥ "मन ज्ञाने" मन्यते ज्ञानं मण्डम् ॥ "मुण प्रज्ञाने" मुणतीति मुण्ड भिक्षुविशेष. । मुण्ड शिरः ॥

॥ ३८ ॥ **वरण्डादयः** ॥ १. ३८ ॥

वरण्डशिखण्डकरण्डपापिण्डपिचण्डा । एते डप्रत्ययान्ता निपात्यन्ते । "वृञ् वरणे" वृणोतीति **वरण्डः** मुखरोगविशेष, गृहैकदेशश्च ॥ "डु कृञ्" करोतीति करण्ड· स्त्रीणामाधार ॥ "शासु अनुशिष्टौ" शास्तीति शिखण्ड· मयूरपिञ्छम् ॥ "पा रक्षणे" पातीति पापिण्ड. संहितद्रव्यम् ॥ "डु पचष् पाके" पचत्यन्नं पिचण्ड जठरम् ॥

॥ ३९ ॥ **कमेरठः** ॥ १. ३९ ॥

अस्मादठप्रत्ययो भवति । "कमु कान्तौ" कमते **कमठः** कच्छपः ॥

॥ ४० ॥ **शकिशमिवहिभ्योऽलः** ॥ १. ४० ॥

एभ्योऽलप्रत्ययो भवति । "शक्ऌ शक्तौ" शक्नोतीति **शकलं** खण्डम् ॥ "शम दम" शाम्यति चित्तमस्मात् **शमलम्** अपवित्रम् ॥ "वह प्रापणे" वहतीति **वहलं** विस्तीर्णम् ॥

॥ ४१ ॥ **वृषलादयः** ॥ १. ४१ ॥

वृषलदेवलकेवलकललपललाः । एते अलान्ता निपात्यन्ते । "पृषु वृषु" वर्षतीति नीचकर्म **वृषलः** शूद्र ॥ "दिवु" क्रीडादिषु । दीव्यतीति **देवलः** देवद्रव्योपजीवी ॥ "केवृ" केवते परमिति **केवलः** असहायः ॥ "कल सङ्ख्याने" कलते **कललं** गर्भवेष्टनम् ॥ "पल रक्षणे" चौरादिकः । पालयति देहं **पललं** मांसम् ॥

॥ ४२ ॥ **कणेष्ठः** ॥ १. ४२ ॥

अस्मात् ठप्रत्ययो भवति । "कण" शब्दार्थ. । कणतीति **कण्ठः** गलः ॥

॥ ४३ ॥ पतिचण्डिभ्यामालञ् ॥ १. ४३ ॥

आभ्यामालञ्प्रत्ययो भवति। ञकार इज्वद्भावार्थ. । "पल शल पतॢ पथे च गतौ" पतत्युदकमत्र **पातालम्** अधोभुवनम् ॥ "चडि कोपे" चण्डते कुप्यते **चण्डालः** निषाद ॥

॥ ४४ ॥ कुणिपीङ्भ्यां कालः ॥ १. ४४ ॥

आभ्यां धातुभ्या कालप्रत्ययो भवति । ककारो यण्वद्भावार्थं । "कुण शब्दे" कुणतीति **कुणालः** नगररक्षक, मगधरक्षकश्च । **कुणाला** नगरी ॥ "पीङ् पाने" पीयते **पियालः** वृक्षविशेष ॥

॥ ४५ ॥ शीङो वालवलञौ ॥ १. ४५ ॥

अस्माद्वालवलञौ प्रत्ययौ भवतः । "शीङ् स्वप्ने" शेते जले **शेवालं** जलनीली ॥ **शैवल** तदेव ॥

॥ ४६ ॥ इल्वलपल्वलशुक्लतण्डुलशिथिलचषालमालाः ॥ १. ४६ ॥

एते वलञन्ता निपात्यन्ते। "इल गतौ" एलतीति **इल्वलाः** तारका. ॥ "पल रक्षणे" पालयतीति **पललं** पुष्करिणीजलम् ॥ "शुच शोके" शोचतीति **शुक्लः** सित. ॥ "तड आघाते" ताडयतीति **तण्डुलः** धान्यविशेष ॥ "श्रथि शैथिल्ये" श्रथते **शिथिलः** निराधार ॥ "चष भ्लष भक्षणे" चषतीति **चषालः** यूपकटक ॥ "[मी माने]" मातीति **माला** स्रक् ॥

॥ ४७ ॥ सारेरङ्गः ॥ १. ४७ ॥

अस्मादङ्गप्रत्ययो भवति। "शॄ सॄ हिंसायाम्"। सृणोति कश्चित् । हेताविन् । सारयतीति **सारङ्गः** मृगः ॥

॥ ४८ ॥ शृङ्गभृङ्गाङ्गानि ॥ १. ४८ ॥

एते अङ्गप्रत्ययान्ता निपात्यन्ते । "शॄ सॄ हिंसायाम्" शृणातीति **शृङ्गम्** गवादीनां विषाणम् ॥ "डु भृञ्" बिभर्तीति **भृङ्गः** भ्रमर. ॥ "अम रोगे" अमति **अङ्गं** शरीरम् ॥

---

१ The words within brackets are omitted in the ms.

॥ ४९ ॥ मुदिगॄभ्यां गग्गौ ॥ १. ४९ ॥

आभ्यां गग्गौ प्रत्ययौ भवतः यथासङ्ख्यम् । "मुद हर्षे" मोदते **मुद्गः** धान्यविशेष ॥ "गॄ निगरणे" गिरतीति **गर्गः** ऋषिः । को यण्वत् ॥

॥ ५० ॥ शॄदॄभ्यामदिः ॥ १. ५० ॥

आभ्यामदिप्रत्ययो भवति । इकार उच्चारणार्थ । "शॄ हिंसायाम्" शृणाति रोगेण जनमिति **शरत्** ऋतुविशेष. ॥ "दॄ विदारणे" दृणाति शत्रुमिति **दरत्** प्रपात ॥

॥ ५१ ॥ धृञ् षोन्तोऽगुणश्च ॥ १. ५१ ॥

अस्माददिप्रत्ययो भवति । अस्य धातोः षोऽन्तो भवति । अकार उच्चारणार्थं । गुणाभावश्च । "धृञ् आधारे" ध्रियते आद्रियते कार्यार्थं **दृषत्** पाषाण· ॥

॥ ५२ ॥ युष्यसिभ्यां मदिक् ॥ १. ५२ ॥

आभ्या मदिक्प्रत्ययो भवति । "यूष" हिंसार्थ. । यूषसि त्व **युष्मत्** ॥ "असु क्षेपणे" अस्यतीति **अहम्** । अथवा लिङ्गमात्रोदाहरणम् । यूषतीति युष्मद् । अस्यतीति अस्मद् । अत एव निर्देशात् यूषेः ह्रस्व. । इकार उच्चारणार्थ. । ककारो यण्वद्भावार्थ. । तेनागुणत्वम् ॥

॥ ५३ ॥ अर्तिहुसुधृक्षिणीपदभायास्तुभ्यो मः ॥ १. ५३ ॥

एभ्यो मप्रत्ययो भवति । "ऋ गतौ" अर्तीति **अर्मः** व्याधिविशेषः ॥ "हु दाने" हूयते **होमः** अग्निदानम् ॥ "षुञ् अभिषवे" सुनोतीति **सोमः** चन्द्रः ॥ "धृञ् धारणे" नरके पतन्तः प्राणिन. धरतीति **धर्मः** पुण्यम् ॥ "क्षि क्षये" क्षयतीति **क्षेमः** कुशलम् ॥ "णीञ् प्रापणे" नयतीति **नेमः** कालः ॥ "पद गतौ" पद्यते याति लक्ष्मीं **पद्मं** कमलम् ॥ "भा दीप्तौ" भातीति **भामः** प्रदीप्तः ॥ "या प्रापणे" यातीति **यामः** प्रहरः ॥ "ष्टुञ् स्तुतौ" स्तौतीति **स्तोमः** सङ्घातः ॥

॥ ५४ ॥ ग्रसेरा च ॥ १. ५४ ॥

अस्मान्मप्रत्ययो भवति । अस्य चान्त्यस्य सस्यात्वं स्यात् । "ग्रसु ग्लसु अदने" ग्रस्यते **ग्रामः** जनपदनिवासः ॥

॥ ५५ ॥ इन्दियुधिश्याधूहिभ्यो मक् ॥ १. ५५ ॥

एभ्यो मक्प्रत्ययो भवति । "ञि इन्धी दीप्तौ" इन्धे **इध्मं** काष्ठम् ॥ "युध सम्प्रहारे" युध्यते **युध्मं** प्रहरणम् ॥ "श्यैङ् गतौ" । सन्ध्यक्षरान्तानां आ । श्यायते **श्यामा** वर्णविशेषः ॥ "धू विधूनने" धुनातीति **धूमः** अग्निशिखा ॥ "हि गति[वृद्ध्योः][1]" हिनोतीति **हिमं** तुहिनम् ॥

॥ ५६ ॥ घर्मसीमाग्रीष्माधमाः ॥ १. ५६ ॥

एते मक्प्रत्ययान्ता निपात्यन्ते । "घृ क्षरणदीप्त्योः" घरतीति **घर्मः** सताप ॥ "षिञ् बन्धने" सिनोतीति **सीमा** अवधिः ॥ "गॄ निगरणे" गिरतीति **ग्रीष्मः** ऋतुः ॥ नञ्पूर्वो धाञ् । न दधातीति **अधमः** नीचः ॥

॥ ५७ ॥ युजिरुचितिजां घ्मक् ॥ १. ५७ ॥

एभ्यः घ्मक्प्रत्ययो भवति । घानुबन्धः कत्वगत्वार्थः । "युजिर् योगे" युनक्तीति **युग्मं** युगलम् ॥ "रुच दीप्तौ" रोचते **रुक्मं** सुवर्णम् ॥ "तिज निशाने" तितिक्षतीति **तिग्मं** तीक्ष्णम् ॥

॥ ५८ ॥ भियः सुरन्तो वा ॥ १. ५८ ॥

अस्मान्मक्प्रत्ययो भवति सुरन्तश्च वा । उकारानुबन्धः । "ञि भी भये" भियते अस्मिन् **भीमः** भयानकः ॥ **भीष्मः** कुरुपितामहः ॥

इति दौर्गसिंह्यामुणादिवृत्तौ

॥ प्रथमः पादः ॥

---

1. The word within brackets is omitted in the ms.

॥ अथ द्वितीयः पादः ॥

॥ ५९ ॥ अशिलटिखटिविशिभ्यः क्वः ॥ २. १ ॥

एभ्य क्वप्रत्ययो भवति। ककारोऽगुणार्थ। "अशू व्याप्तौ" अश्नुते व्याप्नोतीति **अश्वः** तुरङ्गः॥ "लट बाल्ये च" लटतीति **लट्वा** पक्षिविशेषः॥ "खट काङ्क्षे" खटयते शयनार्थमिति **खट्वा** शय्या॥ "विश प्रवेशने" विशति लोकोऽस्मिन्निति **विश्वं** जगत्॥

॥ ६० ॥ शर्वजिह्वाग्रीवा ॥ २. २ ॥

एते क्वप्रत्ययान्ता निपात्यन्ते। "शॄ हिंसायाम्" श्रृणाति दैत्यान् **शर्वः** श्रीमहादेव॥ "ओ हाक् त्यागे" भुक्त्वा रसान् जहातीति **जिह्वा** रसना॥ "गॄ शब्दे" गृणातीति **ग्रीवा** कन्धरा॥

॥ ६१ ॥ वृषितक्षिराजिधन्विप्रदिवियुभ्यः कनिः ॥ २. ३ ॥

को यण्वद्भावार्थ। एभ्यः कनिप्रत्ययो भवति। "जिषु णिपु वृषु" वर्षतीति **वृषा** इन्द्र॥ "तक्षू त्वक्षू" तक्षतीति **तक्षा** वर्धकिः॥ "राजृ दीप्तौ" राजत इति **राजा** अधिपतिः॥ "धन्वि" गत्यर्थ। धनतीति **धन्वा** तटम्॥ "दिवु" क्रीडादिषु। प्रदीव्यतीति **प्रदिवा** दिवसः॥ "यु मिश्रणे" यौतीति **युवा** तरुण.॥

॥ ६२ ॥ नञि जहातेः ॥ २. ४ ॥

नञि उपपदे जहातेर्धातो. कनिप्रत्ययो भवति। "ओ हाक् त्यागे" रविं न जहातीति **अहः** दिनम्। नस्य तत्पुरुषे लोपः॥

॥ ६३ ॥ पूषादयः ॥ २. ५ ॥

पूषन् अर्यमन् मज्जन् उक्षन् श्वन् प्लीहन् मातरिश्वन् क्लेदन् स्नेहन् मूर्धन् यूषन्। एते कन्यन्ता निपात्यन्ते। "पुष पुष्टौ" पुष्णाति वर्धते

पूषा आदित्यः ॥ "ऋ गतौ" इयर्तीति **अर्यमा** आदित्यः ॥ "टु मस्जो" मज्जतीति **मज्जा** अस्थिसारः ॥ "उक्ष सेचने" मूत्रेण उक्षति भुव सिञ्चति इति **उक्षा** बलीवर्द· ॥ "टु ओ श्वि" चौरादीन् श्वयति गच्छतीति **श्वा** कुक्कुर. ॥ "अहि प्लिहि गतौ" प्लीहने **प्लीहा** व्याधिविशेष· ॥ "टु ओ श्वि" मातरि पूर्व । मातरि श्वयति रेतो वर्धते **मातरिश्वा** वायु· ॥ "क्लिदू आर्द्रभावे" क्लिद्यते **क्लेदा** चन्द्रः ॥ "ष्णिह प्रीतौ" स्निह्यतीति **स्नेहा** मित्रम् ॥ "मूर्छा मोहससुच्छ्राययोः" मूर्छन्त्यत्राहता· प्राणिनो **मूर्धा** मस्तकम् ॥ "यूष" हिंसार्थः । यूपतीति **यूषन्** । "यूष्णो धान्यरसान् पश्य" ॥ दुष्यतीति **दोषन्** । "दोष्णो बाहू पश्य" । अनयोश्च "न् शसादौ" इनि प्रयोगोऽभिधानम्[१] ॥

॥ ६४ ॥ हृकृञ्भ्यामेणुः ॥ २. ६ ॥

आभ्यामेणुप्रत्ययो भवति । "हृञ् हरणे" हरति मन. **हरेणुः** गन्ध-द्रव्यम् ॥ ["डु कृञ् करणे"] करोति कार्य **करेणुः** हस्ती हस्तिनी वा ॥

॥ ६५ ॥ दाभारिवृञ्भ्यो नुः ॥ २. ७ ॥

एभ्यो नुप्रत्ययो भवति । "डु दाञ्" ददातीति **दानुः** दाता ॥ "भा दीप्तौ" भातीति **भानुः** सूर्य· ॥ "रि गतौ" रियते **रेणुः** धूलि· ॥ "वृञ् वरणे" वृणोतीति **वर्णुः** नादविशेषः ॥

॥ ६६ ॥ सूविषिभ्यां यण्वत् ॥ २. ८ ॥

आभ्यां नुप्रत्ययो भवति । स च यण्वत्, तेनागुणत्वम् । "षूङ् प्राणिगर्भ[विमोचने]" सूयने **सूनुः** पुत्र· ॥ "विष्लृ व्याप्तौ" वेवेष्टि व्याप्नोतीति **विष्णुः** हरिः ॥

॥ ६७ ॥ धेन्वादयः ॥ २. ९ ॥

धेनुजह्नुस्थाणुवेणुवभ्रव· । एते नुप्रत्ययान्ता नियात्यन्ते । "धेट् पा पाने" । सन्ध्यक्षरान्तानामाकार । धयति पिबति वत्स· तान् **धेनुः** नवप्रसूता गवादि. ॥ "ओ हाक् त्यागे" जहातीति **जह्नु**. विद्याधरः

---

१ The words within brackets are omitted in the ms.

ऋषिविशेषो वा ॥ "ष्ठा गतिनिवृत्तौ" जगति प्रलीनेऽपि तिष्ठतीति स्थाणुः ईश्वरः ॥ "वै शोषणे"। सन्ध्यक्षारान्तानामाकारः। वायति जलं वेणुः वशः ॥ "वच परिभाषणे" वक्तीति वग्नुः प्रियवादी। एवमादयो द्रष्टव्याः ॥

॥ ६८ ॥ रमिकासिकुषिपातॄवचिरिचिसिचिगुभ्यस्थक् ॥ २. १० ॥

एभ्यस्थक्प्रत्ययो भवति। को यण्वद्भावर्थः। "रमु क्रीडायाम्" रमति मनसि रथः स्यन्दनः ॥ "काशृ दीप्तौ" काशतीति काष्ठं दारु ॥ "कुष निष्कर्षे" कुष्णातीति कुष्ठं गन्धद्रव्यं रोगविशेषश्च ॥ "पा पाने" पीयते पाथः जलम् ॥ "तॄ प्लवनतरणयोः" तीर्यते अनेनेति तीर्थं धर्मस्थानम् पुण्य[स्थ]लं वा ॥ "वच परिभाषणे" उच्यते उक्थं साम ॥ "रिहिर् विरेचने" रिणक्ति रिक्थम् ॥ "षिचिर् चलने" सिक्थं मधूच्छिष्टम् ॥ "गु पुरीषोत्सर्गे" गुवतीति गुथं विष्ठा ॥

॥ ६९ ॥ अवे भृञः ॥ २. ११ ॥

अवे उपपदे भृञस्थक् भवति। "डु धाञ्" [?] "डु भृञ्"। अव बिभर्ति इति अवभृथः यज्ञान्तस्नानम् ॥

॥ ७० ॥ न्युदोः शीङ्गाभ्याम् ॥ २. १२ ॥

अनयोरुपपदयोराभ्यां यथासङ्ख्यं थक् भवति। "शीङ् स्वप्ने" निपूर्वः। नियतं शेते जनोऽत्र निशीथः अर्धरात्रिः ॥ "कै गै रै शब्दे" सन्ध्यक्षरान्तानामाकारः। उदपूर्वः। उद्गीयते उद्गीथः श्रुतेः प्रणवः ॥

॥ ७१ ॥ पृष्ठयूथप्रोथाः ॥ २. १३ ॥

एते थक्प्रत्ययान्ता निपात्यन्ते। "पृषु वृषु" पर्षतीति पृष्ठं पश्चात्कायः ॥ "यु मिश्रणे" यूतीति यूथं समूहः ॥ "प्रुङ् प्लुङ्" प्रवते चलतीति प्रोथः अश्वघोषान्तरम् ॥

॥ ७२ ॥ स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदिरुदिमदिमन्दिचन्दुन्दीदिभ्यो रक् ॥ २. १४ ॥

एभ्यो धातुभ्यो रक्प्रत्ययो भवति । यण्वद्भावादनुषङ्गलोप. । "स्फायी ओप्यायी वृद्धौ" स्फायते स्फारं प्रभूतम् ॥ "तञ्चि वञ्चि" तञ्चतीति **तक्रम्** मथितम् ॥ वञ्चतीति **वक्रं** कुटिलम् ॥ "शक्लृ शक्तौ" पा [पातुं ?] शक्नोतीति **शक्रः** ॥ "क्षिप प्रेरणे" क्षिपतीति **क्षिप्रं** शीघ्रम् ॥ "क्षुदिर् संवरणे" क्षुदतीति **क्षुद्रः** दुर्जनः ॥ "रुदिर् अश्रुविमोचने" रोदतीति **रुद्रः** शङ्करः ॥ "मदि हर्षे" मद्यतीति **मद्रः** देशविशेषः ॥ "मुदि" स्तुत्यादौ । मन्दते **मन्द्रः** गम्भीरध्वनिः ॥ "चदि आह्लादने" चन्दतीति **चन्द्रः** शशी ॥ "उन्दी क्लेदने" उनत्तीति **उन्द्रः** [जैल]चरविशेष· ॥ "इदि परमैश्वर्ये" इन्दतीति **इन्द्रः** देवराज. ॥

॥ ७३ ॥ सुसूधाञ्गृधिश्वितिवृतिछिदिमुदितृपिदम्भिशुभिभ्यश्च ॥ २. १५ ॥

एभ्यो रक्प्रत्ययो भवति । चकारः समुच्चयार्थ· । "षु[ञ् अभिष]वे" "षु प्रसवे" वा । सुनोति इति सवति वा मद **सुरा** मद्यम् ॥ "षूङ् प्राणिगर्भविमोचने" सूते **सूरः** रविः ॥ "डु धाञ्" दधातीति **धीरः** अचल· ॥ "गृधु अभिकाङ्क्षायाम्" गृध्यतीति [**गृध्रः** पक्षिविशेष·] ॥ ["श्विता] वर्णे" श्वेतते **श्वित्रं** कुष्ठम् ॥ "वृतु वर्तने" वर्तते **वृत्रः** इन्द्रारि· ॥ "छिदिर् द्विधाकरणे" छिनत्तीति **छिद्रं** रन्ध्रम् ॥ "मुदि हर्षे" मुद्यते लोकोऽनया **मुद्रा** आज्ञाकरणम् ॥ "तृप[प्रीणने" तृप्यन्ते देवा अनेन इति **तृप्रः**] पुरोडाश. ॥ "दम्भु दम्भे" दम्नोतीति **दभ्रं** स्तोकम् ॥ "शुभ शुम्भ शोभार्थे" शुभतीति **शुभ्रं** शुक्लं मङ्गल वा ॥

॥ ७४ ॥ तम्यमिजिनां दीर्घश्च ॥ २. १६ ॥

एभ्यो रक्प्रत्ययो दीर्घश्च । "तमु काङ्क्षायाम्" ताम्यतीति **ताम्रं**

---

१ The words within brackets have been eaten away by moths in the ms

शुल्बम् ॥ "अम द्रम हम्म मीमृ हय गतौ" अम्यते सेव्यते **आम्रः** सहकारः ॥ "जि जये" जयतीति **जीरः** वृक्षविशेषः ॥

॥ ७५ ॥ **शूद्रादयः** ॥ २. १७ ॥

शूद्रोग्रवज्रविप्रभद्रगौरभेरीरा । एते रक्प्रत्ययान्ता निपात्यन्ते । "शद्लृ शातने" शीयते **शूद्रः** तुरीयो वर्णः ॥ ["उचँ समवाये"] उच्यत इति उग्रः दुःसहः ॥ "टु ओ स्फूर्जा वज्रनिर्घोषे" स्फूर्जतीति वज्रं [पवि[1] ॥ "वि]द ज्ञाने" वेत्तीति विप्रः ब्राह्मणः ॥ "भदि कल्याणे सौख्ये च" भन्दते भद्रं कल्याणम् ॥ "गाङ् गतौ" गायते गौरः अवदातः । स्त्रियां गौरी अवदाता भवानी वा ॥ "ञि भी भये" बिभेति जनोऽनया भेरी दुन्दुभिः ॥ "इण् गतौ" एति जना इमा इरा सुरा । कपिलकादिदर्शनाल्लत्वम् । इला भूमिः ॥

॥ ७६ ॥ **वृश्चिकृषिभ्यां किकः** ॥ २. १८ ॥

आभ्यां किकप्रत्ययो भवति । "व्रश्चू छेदने" वृश्चतीति **वृश्चिकः** अली ॥ "कृष विलेखने" कृष्यतीति **कृषिकः** कृषीवलः ॥

॥ ७७ ॥ **मूषिकसिमिकौ** ॥ २. १९ ॥

एतौ किकप्रत्ययान्तौ निपात्येते । "मुष खण्डने" मुष्यतीति **मूषिकः** आखुः ॥ "स्यम स्वन ध्वन शब्दे" स्यमतीति **सिमिकः** तरुविशेषः ॥

॥ ७८ ॥ **क्रिय इकः** ॥ २. २० ॥

अस्मादिकप्रत्ययो भवति । "डु क्रीञ् द्रव्यविनिमये" क्रीणातीति **क्रयिकः** क्रेता ॥

॥ ७९ ॥ **श्याहृञवद्ददक्षिभ्य इनः** ॥ २. २१ ॥

एभ्य इनप्रत्ययो भवति । "श्यैङ् गतौ" सन्ध्यक्षरान्तानामाकारः । श्यायत इति **श्येनः** पक्षिविशेषः ॥ "हृञ् हरणे" गीतेन ह्रियते **हरिणः**

---

1. The words within brackets have been eaten away by moths.

मृगः ॥ "अव रक्ष पालने" अवतीति **अविनः** अध्वर्युः ॥ "द्रु गतौ" द्रवतीति **द्रविण** धनम् ॥ "दक्ष वृद्धौ शीघ्रार्थे च" दक्षते **दक्षिणः** प्रवीणः । स्त्रियां दानम् ॥

॥ ८० ॥ वृजिनाजिनेरिणविपिनतुहिनमहिनानि ॥ २. २२ ॥

एतानि इनप्रत्ययान्तानि निपात्यन्ते । "वृजी वर्जने" वृज्यतेऽपनीयतेऽनेनेति **वृजिनं** पापम् ॥ "अज गतिक्षेपणयो." अजतीति **अजिन** चर्म ॥ "ऋ गतौ" इयर्तीति **इरिणम्** ऊषर क्षेत्रम् ॥ "डु वपु" उप्यते **विपिनं** वनम् ॥ "तुहिर दुहिर अर्दने" तोहति अर्दति **तुहिनम्** । अथ वा "दह भस्मीकरणे" दहतीति तुहिनम् । दस्य तुकारादेश. । हिमम् ॥ "मह पूजायाम्" महतीति **महिनं** महत्वम् ॥

॥ ८१ ॥ वचिप्रच्छिश्रिद्रुश्रुप्रुज्वां क्विप् दीर्घश्च ॥ २. २३ ॥

एभ्यः क्विप्प्रत्ययो भवति, दीर्घश्च स्वरस्य चैषाम् । "वच परिभाषणे" उच्यते **वाक्** वाणी ॥ "प्रच्छ ज्ञीप्सायाम्" शब्दं पृच्छतीति **शब्दप्राट्** शिष्य. ॥ "भज श्रीड् सेवायाम्" पुण्यकृत श्रयतीति **श्रीः** लक्ष्मीः ॥ "द्रु गतौ" द्रवतीति **द्रूः** कामरूपी ॥ "श्रु गतौ" श्रवतीति **श्रूः** यज्ञोपकरणं हविर्द्रव्यम् ॥ "प्रुङ् प्लुङ्" कटेन प्रवर्तत इति **कटप्रूः** कटप्रवर्तक· ॥ "जु" इति सौत्रोऽय धातुः । जायते[जवते] **जूः** जवनम् । पिशाचवाण्यामिति केचित् । वचिप्रच्छयो. दीर्घे कृते नित्यत्वात् संप्रसारण नेष्यते ॥

॥ ८२ ॥ परौ व्रजेश्च ॥ २. २४ ॥

परावुपपदे व्रजेर्धातो. क्विप्प्रत्ययो भवति । स्वरस्यास्य दीर्घत्वम् । चकारो दीर्घानुवृत्त्यर्थ· । "वज व्रज गतौ" परिव्रजतीति **परिव्राट्** भिक्षुः ॥

॥ ८३ ॥ तनेः कयः ॥ २. २५ ॥

अस्मात् कयप्रत्ययो भवति । ककार उत्तरत्र यण्वत्कार्यार्थः । "तनु विस्तारे" तनोति वश **तनयः** पुत्र· ॥

॥ ८४ ॥ हृञो दोऽन्तश्च ॥ २. २६ ॥

अस्मात् कप्रत्ययो भवति। अस्य च दोऽन्तो भवति। अकार उच्चारणार्थः। यण्वद्भावादगुणत्व च। "हृञ् हर[णे¹]" बुद्ध्या अर्थं हरतीति हृदयं मनः॥

॥ ८५ ॥ रातेर्डैः ॥ २. २७ ॥

अस्माड्डैप्रत्ययो भवति। डकारोऽन्त्यस्वरादिलोपार्थ। "रा ला आदाने" गुणान् रातीति राः। "रैः" इत्यात्वम्॥

॥ ८६ ॥ गमेर्डोः ॥ २. २८ ॥

अस्मात् डोः प्र[त्ययो भवति।] "गमॢ गतौ" गच्छतीति गौः। "गोरौ घुटि" इत्यौत्वम्। दिगादिषु दशसु गोः॥

॥ ८७ ॥ ग्लानुदिभ्यां डौः ॥ २. २९ ॥

आभ्या डौ प्रत्ययो भवति। "ग्लै हर्षक्षये" सन्ध्यक्षरान्तानामात्वम्। ग्ला[यतीति ग्लौः चन्द्र.॥] "णुद प्रेरणे" नुद्यते धीवरैः नौः तरी॥

॥ ८८ ॥ भ्रमेर्डूः ॥ २. ३० ॥

अस्मात् डूः प्रत्ययो भवति। "भ्रमु चलने" भ्रमतीति भ्रूः नेत्रोपरिस्थानम्॥

॥ ८९ ॥ दमेर्डोस् ॥ २. ३१ ॥

अस्मात् डोस्प्रत्ययो भवति। "दम उ[पशमने" दाम्यतीति] दोः भुज॥

॥ ९० ॥ सर्तेरयूः ॥ २. ३२ ॥

अस्मादयूप्रत्ययो भवति। "सृ गतौ" सरतीति सरयूः सरित्॥

॥ ९१ ॥ शीङो धुक् ॥ २. ३३ ॥

अस्माद्धुक्प्रत्ययो भवति। "शीङ् स्वप्ने" शेते अनेनेति शीधुः सुराविशेषः॥

---

1. The words within brackets have been eaten away.

॥ ९२ ॥ [भुंजिमृङोः][1] युक्त्युकौ ॥ २. ३४ ॥

अनयो धात्वोः युक्त्युक्प्रत्ययौ भवत· यथासङ्ख्यम् । "भुज पालनाभ्यवहारयो." भुज्यते भुज्युः ओदन· ॥ "मृङ् प्राणत्यागे" म्रियते अनेनेति **मृत्युः** अन्तकः । अनयो गुणो न भवति, औणादिकत्वात् ॥

॥ ९३ ॥ कॄपॄवृञ्निधाञ्भ्यो नः ॥ २. ३५ ॥

एभ्यो न· प्रत्ययो भवति । "कॄ विक्षेपे" किरतीति **कर्णः** श्रोत्रम् ॥ "पॄ पालने" पिपर्ति वृक्षं **पर्ण** दलम् ॥ "वृञ् वरणे" वृणोतीति **वर्णः** शुक्लादि ॥ "डु धाञ्" निपूर्वः । निधीयते **निधानं** निधिः ॥

॥ ९४ ॥ धृषेर्धिष च ॥ २. ३६ ॥

अस्मात् न· प्रत्ययो भवति धिषादेशश्च । "ञि धृषा प्रागल्भ्ये" धृष्णोत्यनया **धिषणा** बुद्धि· । धृष्णोतीति धिषणः बृहस्पति· । इत्वविधानादेव न गुणः ॥

॥ ९५ ॥ हनेर्जघश्च ॥ २. ३७ ॥

अस्मात् न. प्रत्ययो भवति जघादेशश्च । "हन हिंसागत्योः" हन्ति चित्तमिति **जघनं** कटिप्रदेशः ॥

॥ ९६ ॥ दिवेः ऋन् ॥ २. ३८ ॥

दिवेर्धातो. ऋन्प्रत्ययो भवति । नकार उच्चारणार्थ । "दिवु" क्रीडादिषु । दीव्यतीति **देवा** पत्युर्भ्राता ॥

॥ ९७ ॥ नञि च नन्देः ऋदीर्घश्च ॥ २. ३९ ॥

अस्मात् नञि उपपदे ऋन्प्रत्ययो भवति, अस्य स्वरस्य दीर्घश्च । "टु नदि समृद्धौ" न नन्दतीति भ्रातृजाया **ननान्दा** पत्युर्भगिनी ॥

॥ ९८ ॥ यतेश्च ॥ २. ४० ॥

अस्मात् ऋन्प्रत्ययो भवति, अस्य स्वरस्य दीर्घश्च । "यति प्रयत्ने" यतत इति **याता** पतिभ्रातृभार्या ॥

---

1. The words within brackets have been eaten away

॥ ९९ ॥ नियो डानुबन्धश्च ॥ २. ४१ ॥

अस्मात् ऋन्प्रत्ययो भवति, स च डानुबन्ध इष्यते, अन्त्यस्वरादेः लोपार्थम्। "णीञ् प्रापणे" नयतीति ना पुरुषः ॥

॥ १०० ॥ स्वस्रादयः ॥ २. ४२ ॥

स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृप्रशास्तृपितृमातृदुहितृजामातृभ्रातरः । एते ऋन्प्रत्ययान्ता निपात्यन्ते। "श्वस प्राणने" श्वसतीति **स्वसा** भगिनी ॥ "पत्लृ पथे च गतौ"। नञ्पूर्वः। न पतति कुलमनेनेति नप्ता पौत्रः ॥ "णश अदर्शने" नश्यति पापमनेनेति नेष्टा ऋत्विग्विशेषः ॥ "तक्षू त्वक्षू तनूकरणे" त्वक्षतीति त्वष्टा। अथवा "त्विष दीप्तौ" त्वेष्टि लोचने काष्ठेषु त्वष्टा सूत्रधारः ॥ "क्षुदिर् सपेषणे" क्षुदति पिनष्टि इति क्षत्ता प्रतीहारः ॥ "हु दाने" जुहोतीति होता याज्ञिकः ॥ "पूञ् पवने" पुनातीति पोता ऋत्विक् ॥ "शासु अनुशिष्टौ" प्रशास्तीति प्रशास्ता उपाध्याय ॥ "पा रक्षणे" पातीति पिता जनकः ॥ "मा माने" मातीति माता जननी ॥ "दुह प्रपूरणे" दोग्धि मातृकुलं दुहिता ॥ "जनीङ् प्रादुर्भावे" पुत्रप्रतिनिधिः जायते जामाता दुहितुः पतिः ॥ "भ्राजृ दीप्तौ" भ्राता ॥

॥ १०१ ॥ ऋतृसृधृञ्धम्यश्यविवृतिग्रहिभ्योऽनिः ॥ २. ४३ ॥

एभ्योऽनिप्रत्ययो भवति। "ऋ गतौ" इयर्तीति **अरणिः** अग्निनिर्मन्थनकाष्ठम् ॥ "तॄ प्लवनतरणयोः" तरत्यनेनेति **तरणिः** नौः सूर्यो वा ॥ "सृ गतौ" सरतीति **सरणिः** मार्गः ॥ "धृञ् धारणे" धरतीति **धरणी** पृथ्वी ॥ "धम" इति सौत्रोऽयं धातुः। धमतीति **धमनिः** गलशिरा ॥ "अश भोजने" पर्वतादीनश्नातीति **अशनिः** वज्रम् ॥ "अव रक्ष पालने" अवतीति **अवनिः** पृथ्वी ॥ "वृतु वर्तने" वर्तने **वर्तनिः** वर्तनोपकरणद्रव्यम् ॥ "ग्रह उपादाने" गृह्णातीति **ग्रहणिः** व्याधिविशेषः ॥

॥ १०२ ॥ अर्चिशुचिहुसृपिछदिछर्दिभ्य इसिः ॥ २. ४४ ॥

एभ्यो धातुभ्य इसिप्रत्ययो भवति। इकारः उच्चारणार्थः। "अर्च

पूजायाम्" अर्च्यते पूज्यते **अर्चिः** ज्वाला ॥ "शुच शोके" शोचते तमोऽत्र **शोचिः** दीप्तिः ॥ "रुच दीप्तौ" रोचते **रोचिः** सैव ॥ "हु दाने" हूयत इति **हविः** देवान्नम् ॥ "सृ पृ गतौ" सप्त धातव सर्पन्त्यनेन **सर्पिः** आज्यम् ॥ "छद संवरणे" रुचादित्वादिन् । छादयतीति **छदिः** कुड्मल कुटीरक वा ॥ "छर्द वमने" छर्दते **छर्दिः** वमनम् ॥

॥ १०३ ॥ ज्योतिरादयः ॥ २. ४५ ॥

ज्योतिस् बर्हिस् इत्येवमादय शब्दाः इसिप्रत्ययान्ता निपात्यन्ते । "द्युत शुभ रुच दीप्तौ" द्योतते **ज्योतिः** दीप्तिः ॥ "बृहि वृद्धौ" बृहतीति **बर्हिः** कुशः । एवमन्येऽप्यनुसर्तव्याः ॥

॥ १०४ ॥ ऋपृवपिचक्षिजनितनिधनिभ्य उस् ॥ २. ४६ ॥

एभ्य उस्प्रत्ययो भवति । "ऋ गतौ" इयर्तीति **अरुः** व्रणम् ॥ "पृ पालनपूरणयोः" पृणातीति **परुः** पर्वत ॥ "डु वप् बीजसन्ताने" उप्यते पुरुषार्थोऽनेनेति **वपुः** शरीरम् ॥ "चक्षुङ् व्यक्तायां वाचि" चष्टे हृदयाभिप्राय **चक्षुः** । ख्यानेरनुपादानात् चक्षुङ् ख्याञ् इति न भवति ॥ "जन जनने" जजन्तीति [जनुः][1] जर्जारिः ॥ "तनु विस्तारे" तनोतीति **तनुः** कायः ॥ "धन धान्ये" धन्यते **धनुः** शरासनम् ॥

॥ १०५ ॥ एतेरिज्वत् ॥ २. ४७ ॥

अस्मादुस्प्रत्ययो भवति । स च इज्वत् । "इण् गतौ" एतीति **आयुः** जीवितम् ॥

॥ १०६ ॥ चतिकटशृवृञ्भ्यष्वरः ॥ २. ४८ ॥

एभ्यः ट्वरप्रत्ययो भवति । टकारो नदाद्यर्थः । "चते चदे च" चतते **चत्वरं** चतुर्णां पथां समुदायः, प्राङ्गणम् ॥ "कट गतौ" कटतीति **कट्वरः** दधिविकारः ॥ "शॄ हिंसायाम्" शृणातीति **शर्वरः** त्रियामा । नदादित्वात् शर्वरी, रात्रिः ॥ "वृञ् वरणे" वृणाति वृणोति वा **बर्बरः** देशविशेष. मनुष्यश्च ॥

---

1. The word within brackets is omitted in the original,

॥ १०७ ॥ नौ सदि ॥ २. ४९ ॥

नावुपपदे अस्मात् ट्वरप्रत्ययो भवति । "षद्लृ विशरणे" । "धात्वादेः षः स" । निपूर्व । निषीदत्यस्मिन् लोको **निषद्वरः** कर्दम. ॥

॥ १०८ ॥ छित्वरादयः ॥ २. ५० ॥

छित्वरछत्वरधीवरतीवरपीवरगह्वरचीवरनीवरा. । एते वरप्रत्ययान्ता निपात्यन्ते । "छिदिर् द्विधाकरणे" छिनत्तीति **छित्वरः** धूर्तः ॥ "छद पद छादने" छादयतीति छत्वर· स एव ॥ "डु धाञ्" दधाति जालमिति धीवरः कैवर्त· ॥ "तुद व्यथने" तुदतीति तीवर प्राकृतजातिविशेषः ॥ "पीङ् पाने" पीयते पीवरः स्थूल. ॥ "गुहू सवरणे" गुहतीति गह्वर गहनम् ॥ "चिञ् चयने" चिनोतीति चीवरं भिक्षुपरिधानम् ॥ "णीञ् प्रापणे" नयतीति नीवर. जलसंभव. कश्चित् । एवमन्येऽप्यनुसर्तव्या. ॥

॥ १०९ ॥ इण्जिकृषिभ्यो नक् ॥ २. ५१ ॥

एभ्यो नक्प्रत्ययो भवति । ककारो यण्वद्भावार्थ, तेनागुणत्वम् । "इण् गतौ" एतीति **इनः** सूर्य धनेश्वरो वा ॥ "जि जये" जयतीति **जिनः** तीर्थङ्करो विष्णुर्वा ॥ "कृष विलेखने" कर्षत्यरीन् **कृष्णः** वासुदेवः ॥

॥ ११० ॥ बन्धेर्ब्रधिश्च ॥ २. ५२ ॥

अस्मान्नक्प्रत्ययो भवति ब्रध्यादेशश्च । इकार उच्चारणार्थ· । "बध बन्धने" बध्नाति जन्तुदृष्टीन् **ब्रध्नः** सूर्यः ॥

॥ १११ ॥ धावसिद्रुभ्यो नः ॥ २. ५३ ॥

एभ्यो नप्रत्ययो भवति । "डु धाञ्" धार्यन्ते **धानाः**; स्त्रीत्वं बहुत्वं च; भ्रष्टयवाः ॥ "वस निवासे" वसतीति **वस्नम्** अवक्रयणम् ॥ "द्रु गतौ" द्रवतीति **द्रोणः** परिमाणविशेष. अश्वत्थश्च । आम्र· पीतो वा ॥

॥ ११२ ॥ रास्ना सास्ना स्थूणा वीणा ॥ २. ५४ ॥

एते नप्रत्ययान्ता निपात्यन्ते । "राशृ शब्दे" राश्यते प्राणी अनया **रास्ना** औषधविशेषः ॥ "शासू अनुशिष्टौ" शास्यते अनया **सास्ना** गल-

कम्बलः ॥ "ष्ठा गतिनिवृत्तौ" तिष्ठति पदार्थोऽस्यां स्थूणा स्तम्भः ॥ "वि प्रजने" सप्तस्वरान् वेति गच्छतीति वीणा परिवादिनी । आकारस्य ऊत्वं नस्य णत्वं भवति ॥

॥ ११३ ॥ पातेः पः ॥ २. ५५ ॥

अस्मात् पः प्रत्ययो भवति । "पा रक्षणे" पायते पापं दुरितम् ॥

॥ ११४ ॥ नीपादयः ॥ २. ५६ ॥

नीपयूपसूपकूपतल्पशष्पबाष्पाः । एते पप्रत्ययान्ता निपात्यन्ते । "णीञ् प्रापणे" नयतीति नीपः वृक्षः ॥ "यु मिश्रणे" यौतीति यूपः यज्ञकीलकः ॥ "षूङ् प्राणिप्रसवे" सूयते सूपः व्यञ्जनविशेषः ॥ "कुङ् शब्दे" कवते कुवते वा कूपः प्रथिः ॥ "तल प्रतिष्ठायाम्" चुरादिः । तालयतीति तल्पं शय्या ॥ "शसु हिंसायाम्" शस्यते भक्ष्यते इति शष्पं बालतृणम् ॥ "वाসৃ शब्दे" वास्यते बाष्पः अश्रु ऊष्मोद्गमश्च । एवमन्येऽप्यनुसर्तव्याः ॥

॥ ११५ ॥ इण्भीकापाशल्यर्चिकृदाधाराभ्यः कः ॥ २. ५७ ॥

एभ्यः कप्रत्ययो भवति । "इण् गतौ" एतीति एकः असहायः ॥ "ञि भी भये" सर्पात् बिभेति भेकः मण्डूकः ॥ "कै शब्दे" कायतीति काकः ॥ ["पै पाने" पिबतीति पाकः] ॥ ["शल गतौ" शलतीति] शल्कः वल्कलम् । शल्यर्चिभ्यां इट् न भवति औणादिकत्वात् । एवमन्यत्रापि उक्तवक्ष्यमाणविधौ[धिषु] प्रतिपत्तव्यम् । "अर्चि पूजायाम्" अर्च्यते अर्कः रविः ॥ "डु कृञ् करणे" क्रियते कल्कः । कपिलिकादिदर्शनात् रेफस्य लत्वम्, पिष्टपिण्डः ॥ "डु दाञ्" ददातीति दाकः दाता ॥ "डु धाञ्" धार्यते धाकः यज्ञः ॥ "रा ला दाने" रातीति राकः कर्णः, राका चन्द्रसंपूर्णा पौर्णमासी ॥

॥ ११६ ॥ मूकादयः ॥ २. ५८ ॥

मूकयूकाभेकपृथुकवृकसृकभूकाः । एते कप्रत्ययान्ता निपात्यन्ते । "मूङ् बन्धने" मूयते मूकः जडः ॥ "यु मिश्रणे" यूयते यूका क्षुद्रजन्तुः ॥

1. The words within brackets are omitted in the ms.

"अर्ह मह पूजायाम्" अर्हतीति अर्भकः शिशुः ॥ "प्रथ प्रख्याने" प्रथयतीति **पृथुकः** स एव ॥ "वृञ् आवरणे" वृणोतीति वृकः मृगविशेषः ॥ "सृ गतौ" सरतीति सृकम् उत्पलमूलम् ॥ "भू सत्तायाम्" भवतीति **भूकं** छिद्रम् ॥

॥ ११७ ॥ शक्केरुन्युन्तौ ॥ २. ५९ ॥

अस्मात् उनि उन्त इत्येतौ प्रत्ययौ भवतः । "शक्लृ शक्तौ" नभसा गन्तुं शक्नोतीति **शकुनिः** पक्षी । एवं **शकुन्तः** स एव ॥

॥ ११८ ॥ ऋकृतृवृञ्यमिदार्यर्जिभ्य उनः ॥ २. ६० ॥

एभ्य उनप्रत्ययो भवति । "ऋ गतौ" इयर्तीति **अरुणः** सूर्यसारथिः॥ "डु कृञ् करणे" क्रियते **करुणा** कृपा ॥ "तॄ प्लवनतरणयोः" क्रियां कर्तुं तरति शक्नोतीति **तरुणः** युवा ॥ "वृञ् वरणे" वृणोतीति **वरुणः** पश्चिमदिक्पतिः ॥ "यम उपरमे" यच्छतीति **यमुना** कालिन्दी नदी ॥ "दॄ विदारणे" हेताविन् । दारयतीति **दारुणः** रौद्रः ॥ "अर्ज सर्ज अर्जने" अर्जतीति **अर्जुनः** वृक्षः पाण्डवश्च ॥

॥ ११९ ॥ पिशुनफाल्गुनौ ॥ २. ६१ ॥

एतौ उनप्रत्ययान्तौ निपात्येते । "पिषॢ संचूर्णने" पिनष्टीति **पिशुनः** सूचको दुर्जनश्च ॥ "फल निष्पत्तौ" फलतीति **फाल्गुनः** मासविशेषः अर्जुनश्च ॥

॥ १२० ॥ कृधूवाभ्यः सरक् ॥ २. ६२ ॥

एभ्यः सरक्प्रत्ययो भवति । को यण्वत् । तेनागुणत्वम् । "डु कृञ् करणे" करोतीति **कृसरा** यवागूः ॥ "धू विधूनने" धुवतीति **धूसरः** अग्निस्निग्धः ॥ "वा गतिगन्धनयोः" वातीति **वासरः** दिवसः ॥

॥ १२१ ॥ भीशीङ्भ्यामानकः ॥ २. ६३ ॥

आभ्यामानकः प्रत्ययो भवति । "ञि भी भये" भीयते अस्मिन्निति **भयानकः** भीष्मः ॥ "शीङ् स्वप्ने" शेते **शयानकः** अजगरः ॥

॥ १२२ ॥ शिङ्घेराणकः ॥ २. ६४ ॥

अस्मादाणकप्रत्ययो भवति । "शिघि आघ्राणे" इदनुबन्धत्वान्नागम । शिङ्घाणकः नासामलः ॥

॥ १२३ ॥ इषेः किकः ॥ २. ६५ ॥

अस्मात् किकप्रत्ययो भवति । को यण्वद्भावार्थ. । "इषु इच्छायाम्" इच्छतीति इषिका विरुणीशलाका ॥

॥ १२४ ॥ तिन्तिडिकादयः ॥ २. ६६ ॥

तिन्तिडिका किङ्किणिका [जर्जरिका[1]] पर्परिका मृद्विका । एते किकप्रत्ययान्ता निपात्यन्ते । ["तिमँ आर्द्रीभावे"] तिम्यतीति तिन्तिडिका तिलवृक्षविशेष· ॥ "कण क्वण शब्दे" किम्पूर्व । किङ्कणतीति किङ्किणिका ॥ "जॄ वयोहानौ" जीर्यते इति जर्जरिका बहुच्छिद्रा ॥ "पॄ पालनपूरणयो" पृणातीति पर्परिका मर्दलः ॥ "मृद क्षोदे" मृद्नातीति मृद्विका । एवमन्येऽपि ॥

॥ १२५ ॥ घृसिदूभ्यः क्तः ॥ २. ६७ ॥

एभ्य· क्तप्रत्ययो भवति । "घृ क्षरणदीप्त्यो" घरतीति घृतं सर्पि· ॥ "षिञ् बन्धने" सिनोतीति सितः शुक्ल· ॥ "दूङ् परितापे" दूयते दूतः सङ्गमकारकः । ककारो यण्वद्भावार्थः । तेनागुणत्वम् ॥

॥ १२६ ॥ जर्ततातपलितसुरतलोष्टाः ॥ २. ६८ ॥

एते क्तप्रत्ययान्ता निपात्यन्ते । "जृषु झृषु" जीर्यते जर्तः दीर्घरोमा ॥ "दैङ् त्रैङ् पालने" सन्ध्यक्षरान्तानामात्वम् । त्रायते तातः पिता ॥ "डु पचष् पाके" पच्यते पलितं पक्वकेशाः ॥ "रमु क्रीडायाम्" सुपूर्वः । सुखाय रम्यते सुरतं मैथुनम् ॥ "लूष हिसायाम्" चुरादिः । लूषयतीति लोष्टः मृत्पिण्डः ॥

---

1. The words within brackets are omitted in the ms.

॥ १२७ ॥ **स्पृहेराय्यः** ॥ २. ६९ ॥

अस्मादाय्यप्रत्ययो भवति । "स्पृह ईप्सायाम्" चुरादित्वादिन् । स्पृहयतीति **स्पृहयाय्यं** गवीन घृतं वा ॥

इति दौर्गसिह्मामुणादिवृत्तौ

द्वितीयः पादः ॥

॥ अथ तृतीयः पादः ॥

॥ १२८ ॥ वृञ एण्यः ॥ ३. १ ॥

अस्मादेण्यप्रत्ययो भवति । "वृञ् वरणे" वृणोतीति **वरेण्य** श्रेष्ठः ॥

॥ १२९ ॥ अर्तेरन्यः ॥ ३. २ ॥

अस्मादन्यप्रत्ययो भवति । "ऋ गतौ" अर्यते **अरण्यं** वनम् ॥

॥ १३० ॥ हो हिरश्च ॥ ३. ३ ॥

अस्मादन्यप्रत्ययो भवति, हिरादेशश्च । "ओ हाक् त्यागे" हीयते **हिरण्यं** सुवर्णम् ॥

॥ १३१ ॥ पर्जन्यपुण्ये ॥ ३. ४ ॥

एतौ अन्यप्रत्ययान्तौ निपात्येते । "पृची सपर्के" पृङ्क्ते पृणक्ति वा **पर्जन्यः** इन्द्रः ॥ "पुण शोभे" पुणतीति **पुण्यं** धर्मकर्म ॥

॥ १३२ ॥ अमिनक्षिकडिभ्योऽत्रः ॥ ३. ५ ॥

एभ्योऽत्रप्रत्ययो भवति । "अम रोगे" अमतीति **अमत्रं** भाजनम् ॥ "नक्ष गतौ" नक्षतीति **नक्षत्रं** अश्विन्यादि ॥ "कड मदे" कडतीति **कडत्रं** चर्मासनम् । "लडयोः" इत्यैक्यात् कलत्र भार्या नपुंसकलिङ्गे च ॥

॥ १३३ ॥ भृञोऽतः ॥ ३. ६ ॥

अस्मादतप्रत्ययो भवति । "डु भृञ्" बिभर्तीति **भरतः** राजा प्रथमतीर्थङ्करपुत्रो नटो वा ॥

॥ १३४ ॥ पृषिरञ्जिभ्यां यण्वत् ॥ ३. ७ ॥

आभ्यामतप्रत्ययो भवति, स च यण्वत् । "पृषु वृषु" पृषतीति

पृषतः कस्तूरीमृग ॥ "रञ्ज रागे" जनं रञ्जतीति **रजतं** रौप्यम्। अगुणत्वमनुषङ्गलोपः ॥

॥ १३५ ॥ आङि वसेरथः ॥ ३. ८ ॥

आङि उपपदे वसेरथप्रत्ययो भवति। "वस निवासे" आङ्पूर्व.। आवसति लोकोऽस्मिन्निति **आवसथं** गृहम् ॥

॥ १३६ ॥ जॄवृभ्यामूथः ॥ ३. ९ ॥

आभ्यामूथप्रत्ययो भवति। "जॄ वयोहानौ" जीर्यते **जरूथम्** आर्द्रमांसम् ॥ "वृञ् वरणे" वृणोतीति **वरूथं** रथगोपनम् ॥

॥ १३७ ॥ अतिचमिरभियुभ्योऽसः ॥ ३. १० ॥

एभ्योऽसः प्रत्ययो भवति। "अत सातत्यगमने" अततीति **अतसी**। नटादित्वादिः। क्षुमा ॥ "चमु छमु जमु" [चम]तीति **चमसं** यज्ञोपकरणम् ॥ "रभ राभस्ये" रभते **रभसः** उत्साहः ॥ "यु मिश्रणे" यौतीति **यवसः** घासः ॥

॥ १३८ ॥ वेतसवाहसदिवसफनसाः ॥ ३. ११ ॥

एते असप्रत्ययान्ता निपात्यन्ते। "वि प्रजने" वेतीति **वेतसः** वानीरः ॥ "वह प्रापणे" वहतीति **वाहसः** अजगरः ॥ "दिवु" क्रीडादिषु। दीव्यतीति **दिवसः** दिनम् ॥ "फण गतौ" फणते **फनसः** वृक्षविशेष ॥

॥ १३९ ॥ कृशृशलिगर्दिरासिवलिवल्लिभ्योऽभः ॥ ३. १२ ॥

एभ्योऽभप्रत्ययो भवति। "डु कृञ् करणे" करोति वेगमिति **करभः** उष्ट्रः। कपिरिकादित्वाल्लत्वम्। कलभः बालहस्ती ॥ "शॄ हिंसायाम्" शृणातीति**शरभः** अष्टापदजीवविशेषः ॥ "शल श्वल आशुगतौ" "शल चलने वा" शलतीति **शलभः** पतङ्गः ॥ "नर्द गर्द शब्दे" गर्दतीति **गर्दभः** खरः ॥ "रस शब्दे" हेताविन्। रसतीति **रासभः** स एव ॥ "वल वल्ल च" वलतीति **वलभिः**। नटादित्वादिः। गृहाणामाच्छादनम् ॥ "वल वल्ल" च। वल्लतीति **वल्लभः** हृदयः ॥

॥ १४० ॥ ऋषिवृषिभ्यां यण्वत् ॥ ३. १३ ॥

आभ्यामभप्रत्ययो भवति । स च यण्वत् । "ऋष्टि ऋषि गतौ" ऋषतीति **ऋषभः** नाभेयो जिनः, गन्धर्वस्वरविशेषो वा ॥ "पृषु वृषु उक्ष सेचने" वर्षतीति **वृषभः** गौः ॥

॥ १४१ ॥ इः सर्वधातुभ्यः ॥ ३. १४ ॥

सर्वधातुभ्यो यथासङ्ख्यं इः प्रत्ययो भवति । "क्षु रु शब्दे" रौतीति रविः सूर्यः ॥ ["कुं शब्दे"][1] कौतीति कविः काव्यकर्ता शुक्रश्च ॥ "दॄ विदारणे" दृणातीति दरिः गुहा । "ध्वन शब्दे" ध्वनतीति ध्वनि शब्दः ॥ "वल वल्ल च" वलंतीति बलि दैत्यविशेष. ॥ वल्लते वल्लिः लता । स्त्रीया ई । वल्ली ॥ "अव रक्ष पालने" ऊर्णाभिरात्मानमवतीति अवि. मेषः ॥ "सर्जि छपि पथि गतौ" चौरादिः । इदनुबन्धत्वान्नागमः । पन्थयतीति पन्थाः मार्गः ॥ "मन्थ विलोडने" मन्थतीति मन्था मथनदण्डः । पन्थिमन्थ्यादीनामात्वम् ॥ "हृञ् हरणे" हरतीति हरि. विष्णुः अक्कादिषु ॥

॥ १४२ ॥ गृनाम्न्युपधात् क्विः ॥ ३. १५ ॥

गिरतेः नाम्न्युपधातोच्चधातो. क्विःप्रत्ययो भवति । नाम्नि उपधा यस्येति विग्रहः । "गॄ निगरणे" गिरतीति **गिरिः** पर्वतः ॥ "रुच दीप्तौ" रोचते रुचिः अभिलाषः ॥ "दिपि दीप्तौ" दीप्यत इति दीपिः ॥ "कृष विलेखने" कर्षतीति कृषिः कर्षणम् ॥ "घृणु दीप्तौ" घृणोतीति घृणिः दीप्तिः इत्यादयोऽप्यनुसर्तव्याः ॥

॥ १४३ ॥ गण्डिमण्डिभ्यो झः ॥ ३. १६ ॥

आभ्यां झप्रत्ययो भवति । "गडि वदनैकदेशे" इदनुबन्धत्वान्नागमः । हेताविन् । गण्डयतीति **गण्डयन्तः** भूषणम् ॥ "मडि भूषायाम्" मण्डयतीति **मण्डयन्तः** ॥

---

1. The words within brackets are omitted in the ms.

॥ १४४ ॥ जीविशिवसिभासिवहिनन्दिहि-साधिभ्यश्च ॥ ३. १७ ॥

एभ्यो झप्रत्ययो भवति । "जि जये" जयतीति **जयन्तः** इन्द्रपुत्रः ॥ "विश प्रवेशने" विशति लोकोऽस्मिन्निति **वेशन्तः** पल्वलम् ॥ "वस निवासे" वसति लोकोऽस्मिन्निति **वसन्तः** ऋतुराज. ॥ "भासृ दीप्तौ" भासतीति **भासन्तः** शोभनम् ॥ "वह प्रापणे" वहतीति **वहन्तः** कालः ॥ "टु नदि समृद्धौ" नन्दतीति **नन्दन्तः** बुद्धिमान् हृष्टो वा ॥ "हि गतौ" हिनोतीति **हेमन्तः** ऋतुविशेष ॥ "राध साध संसिद्धौ" साध्यतीति **साधन्तः** भिक्षुः ॥

॥ १४५ ॥ कुङोररक् ॥ ३. १८ ॥

अस्मादरक्प्रत्ययो भवति । "कुङ् शब्दे" कवते **कुररः** पक्षी । स्त्रियां तु कुररी ॥

॥ १४६ ॥ अङ्गिमदिमन्थिकडिमृजिभ्य आरः ॥ ३. १९ ॥

एभ्य आरप्रत्ययो भवति । "अगि" गत्यर्थः । अङ्गतीति **अङ्गारः** दग्धकाष्ठम् ॥ "मदी हर्षे" मद्यते **मदारः** मत्तहस्ती ॥ "मदि" स्तुत्यादौ । मन्दते **मन्दारः** वृक्षः ॥ "कड मदे" कडतीति **कडारः** पिङ्गलः ॥ "मृजू शुद्धौ" आखुवर्थं गृहं मार्ष्टीति **मार्जारः** बिडालः ॥ 'कनीनका' इत्यादौ "श्रकि" गत्यर्थः । श्रङ्कते श्रृङ्गार· रसविशेषः । कस्य गत्वं रेफस्य ऋत्वम् ॥ "भृञ्" बिभर्ति जलमिति भृङ्गार. जलस्थानम् । न्वात्वागमो गोन्तश्च । "कूज अव्यक्त शब्दे" कूजते कुञ्जरः हस्ती ॥ कूजेः परस्याकाररय ह्रस्वत्वम्; जकारात्पूर्वो नागमः, ऊकारस्य उकारः ॥

॥ १४७ ॥ सर्तेरषष्षोऽन्तश्च ॥ ३. २० ॥

अस्मादपप्रत्ययो भवति षोऽन्तश्च । "सृ गतौ" सरतीति **सर्षपः** सिद्धार्थः ॥

॥ १४८ ॥ **विटपादयः** ॥ ३. २१ ॥

विटपकुणपकुडपदलपोलपा· । एते अपप्रत्ययान्ता निपात्यन्ते । "विट शब्दे" विटतीति **विटपः** स्तम्भ ॥ "कुण शब्दे" कुणतीति कुणप शव ॥ "कुट कौटिल्ये" कुटतीति कुटप· मानविशेष ॥ "दल त्रि फला" दलतीति दलपः प्रहरणम् ॥ "ऋ गतौ" इयर्तीति उलप· तृणविशेष. । एवमन्येऽप्यनुसर्तव्याः ॥

॥ १४९ ॥ **वृतेस्तिकः** ॥ ३. २२ ॥

अस्मात्तिकप्रत्ययो भवति । "वृतु वर्तने" वर्तत इति **वर्त्तिका** दीपाश्रय । चटिका वा स्त्रिया मादा [१] ॥

॥ १५० ॥ **कृतिभिदिलतिभ्यो यण्वत्** ॥ ३. २३ ॥

एभ्यस्तिकप्रत्ययो भवति, स च यण्वत्, तेनागुणत्वम् । "कृती छेदने" शुभ कृन्ततीति **कृत्तिकाः** । स्त्रीत्वं बहुत्व च । बहुला ॥ "भिदिर् विदारणे" भिनत्तीति **भित्तिका** कुड्यम् ॥ "लत" इति सौत्रोऽयं धातु. । लततीति **लत्तिका** गोधा ॥

॥ १५१ ॥ **इष्यसिभ्यां तकः** ॥ ३. २४ ॥

आभ्यां तकप्रत्ययो भवति । ·· [इष्टका ॥ अष्टका ॥]

[॥ १५२ ॥ **दॄगॄभ्यां भः** ॥ ३. २५ ॥][1]

"दॄ विदारणे" दृणातीति **दर्भः** कुशः पवित्रकरणम् ॥ "गॄ निगरणे" नाभिनालेन मातुराहार गिलतीति **गर्भः** प्रसिद्धप्रसूतिकारणम् ॥

॥ १५३ ॥ **इणो यण्वत्** ॥ ३. २६ ॥

अस्माद्भप्रत्ययो भवति, स च यण्वत् । "इण् गतौ" एति गच्छतीति **इभः** हस्ती ॥

---

1. This sūtra is omitted in the Ms.

॥ १५४ ॥ विपतिभ्यां तनः ॥ ३. २७ ॥

आभ्यां तनप्रत्ययो भवति । "वि प्रजने" वीयते अनया **वेतना** भृतक-मूल्यम् ॥ "पत्लृ" पतति लोकोऽस्मिन्निति **पत्तन** नगरम् ॥

॥ १५५ ॥ सञ्ज्यसिभ्यां क्थिः ॥ ३. २८ ॥

आभ्यां क्थिः प्रत्ययो भवति । तकारो यण्वद्भावार्थः, तेनागुणत्वम् । षञ्जेरेनुषङ्गलोपः । "षञ्ज सङ्गे" सज्जतीति **सक्थि** ऊरु ॥ "असु क्षेपणे" अस्यते क्षिप्यते ; "अन" मज्जादै वा नात्र [?] **अस्थि** शरीरावयवः ॥

॥ १५६ ॥ सारेरथिः ॥ ३. २९ ॥

अस्मादथिप्रत्ययो भवति । "सृ गतौ" । हेताविन् । अश्वान् सारयतीति **सारथिः** रथवाहः ॥

॥ १५७ ॥ अङ्ग्यतिभ्यामुलिथिः ॥ ३. ३० ॥

इदित्वान्नागमः । "अगि" गत्यर्थः । अङ्गतीति **अङ्गुलिः** करावयवः ॥ "अत सातत्यगमने" अततीति **अतिथिः** अभ्युर [आगन्तुक.] ॥

॥ १५८ ॥ निदलिभ्यां मिः ॥ ३. ३१ ॥

आभ्या मिप्रत्ययो भवति । "णीञ् प्रापणे" नयति शकटं **नेमिः** चक्रधारा ॥ "दल त्रि फला" दलत्यरीन् इति **दल्मिः** शक्रायुधम् ॥

॥ १५९ ॥ ऊर्मिभूमिरश्मयः ॥ ३. ३२ ॥

एते मिप्रत्ययान्ता निपात्यन्ते । "ऋ गतौ" इयर्तीति **ऊर्मिः** भङ्गः ॥ "भू सत्तायाम्" भवति सर्वत्र **भूमिः** पृथ्वी ॥ "राश्रृ शब्दे" राशतीति **रश्मिः** किरणः ॥

॥ १६० ॥ इषेः सुक् ॥ ३. ३३ ॥

इषेर्धातोः सुक्प्रत्ययो भवति। "इषु इच्छायाम्" इष्यते इक्षुः मधुरद्रव्यविशेष ॥

॥ १६१ ॥ अवितॄस्तृतन्त्रिभ्य ईः ॥ ३. ३४ ॥

एभ्य ईप्रत्ययो भवति। "अव रक्ष पालने" पुत्रार्थं रजोऽवतीति अविः रजस्वला ॥ "तॄ प्लवनतरणयो" तीर्यतेऽनया तरिः नौ ॥ "स्तृञ् आच्छादने" स्तृणातीति स्तरी आच्छादनविशेष. ॥ "तन्त्रि कुटुम्बधारणे" तन्त्रयतीति तन्त्री वीणा ॥

॥ १६२ ॥ लक्षेर्मोऽन्तश्च ॥ ३. ३५ ॥

अस्मादीप्रत्ययो भवति, मोऽन्तश्च। "लक्ष दर्शनाङ्कनयोः" लक्षयति दर्शयति पुण्यकर्माण लक्ष्मीः ॥

॥ १६३ ॥ वातप्रमीः ॥ ३. ३६ ॥

अयमीप्रत्ययान्तो निपात्यते। वातप्रपूर्वे "मा माने" वातं प्रमातीति वातप्रमीः वातवाहनो मृगः ॥

॥ १६४ ॥ कृगॄजागृभ्यः किः ॥ ३. ३७ ॥

एभ्यः किप्रत्ययो भवति। को यण्वत्। "डु कृञ् करणे" करोतीति कुर्विः ॥ "गॄ निगरणे" गिरतीति गिर्विः। छान्दसावेतौ रविचन्द्रौ ॥ "जागृ निद्राक्षये" जागर्तीति जागृविः अग्नि ॥

॥ १६५ ॥ छव्यादयः ॥ ३. ३८ ॥

छविदर्विस्थविदीदिविकिकिदीवयः। एते क्विप्रत्ययान्ता निपात्यन्ते। "छो छेदने" छव्यतीति छविः कान्ति. ॥ "दॄ विदारणे" दृणातीति दर्विः तर्दूः ॥ "ष्ठा गतिनिवृत्तौ" तिष्ठतीति स्थविः तन्तुवायद्रव्यम् ॥ "दिवु" क्रीडादिषु। दीव्यतीति दीदिवि स्वर्गः द्विर्वचनम् ॥ ["[1]दिवु" क्रीडादिषु। किकिपूर्वः। किकिदीवि]। पक्षिविशेषः ॥

---

1. The words within brackets are omitted in the Ms.

॥ १६६ ॥ खञ्जेरकः ॥ ३. ३९ ॥

अस्मादकप्रत्ययो भवति । "खजि मन्थे" खञ्जतीति **खञ्जकः** पक्षी ॥

॥ १६७ ॥ बलाकादयः ॥ ३. ४० ॥

बलाकपिनाकपताकश्यामाकशलाका । एते अकप्रत्ययान्ता निपात्यन्ते । "वल संवरणे" वलते **बलाका** पक्षिणि ॥ "पिष्लृ सचूर्णने" पिनष्टीति पिनाकं हरधनु ॥ "पतॢ गतौ" पततीति पताका ध्वज ॥ "श्यैङ् गतौ" श्यायते श्यामाक. धान्य व्रीहिविशेष ॥ "पल शल" शलतीति शलाका अञ्जनलेखनिका नेत्राञ्जनीति ॥

॥ १६८ ॥ अर्तेरत्निः ॥ ३. ४१ ॥

अस्मादत्निप्रत्ययो भवति । "ऋ गतौ" इयर्तीति **[अरत्निः]**[1] कनिष्ठिकाङ्गुलिः ॥

॥ १६९ ॥ अञ्जेरलिः ॥ ३. ४२ ॥

अस्मादलिप्रत्ययो भवति । "अञ्जु" व्यक्त्यादौ । अनक्तीति **अञ्जलिः** करसङ्घट्टः ॥

॥ १७० ॥ मृकणिभ्यामीचिः ॥ ३. ४३ ॥

आभ्यामीचिप्रत्ययो भवति । "मृङ् प्राणत्यागे" म्रियते तमोऽनेन **मरीचिः** किरणः ॥ "कण गतौ" कणने **कणीचिः** कलाविशेषः ॥

॥ १७१ ॥ रातेस्त्रिः ॥ ३. ४४ ॥

अस्मात्त्रिप्रत्ययो भवति । "रा ला दाने" रात्रिचराणं प्रतीति ददातीति **रात्रिः** क्षपा ॥

---

1. The word within brackets is omitted in the Ms

॥ १७२ ॥ **दुषेरिकः** ॥ ३. ४५ ॥

अस्मादिकप्रत्ययो भवति । “दुष वैकृत्ये” हेताविन् । दूषयतीति **दूषिका** नेत्रमलम् । “दुषे कालिते” इत्युपधाया ऊत्वम् ॥

॥ १७३ ॥ **कृतॄभ्यामीषः** ॥ ३. ४६ ॥

आभ्यामीषप्रत्ययो भवति । “डु कृञ् करणे” गृहशोभा करोतीति **करीषः** शुष्कगोमयम् ॥ “तॄ प्लवनतरणयोः” तरतीति **तरीषः** शोभनम् ॥

॥ १७४ ॥ **शिरीषादयः** ॥ ३. ४७ ॥

शिरीषपुरीषर्जीषाम्बरीषा· । एते ईषप्रत्ययान्ता निपात्यन्ते । “शॄ हिसायाम्” शृणातीति **शिरीषः** वृक्षः ॥ “पॄ पालनपूरणयो” पालयति प्राणान् सम्यक् परिणामनिष्कासेन पुरीष विष्ठा ॥ “ऋजि भृजी भर्जने” ऋज्यते ऋजीष पशुवचनम्, वृथापाको वा ॥ “वृञ् वरणे” । अंपूर्वः । अ आकाश वृणोतीति अम्बरीषः भ्राष्ट्र । एवमन्येऽप्यनुसर्तव्याः ॥

॥ १७५ ॥ **कॄशॄशौण्डृभ्य ईरः** ॥ ३. ४८ ॥

एभ्य ईरप्रत्ययो भवति । “कॄ विक्षेपणे” किरतीति **करीरः** वृक्ष ॥ “शॄ हिसायाम्” शीर्यते **शरीरं** कायः ॥ “शौण्डृ गर्वे” शौण्डतीति **शौण्डीरः** सत्यवान् दाता ॥

॥ १७६ ॥ **क्षीरोशीरगभीरगम्भीराः** ॥ ३. ४९ ॥

एते ईरप्रत्ययान्ता निपात्यन्ते । “क्षणु हिसायाम्” क्षणोतीति **क्षीरं** पयः ॥ “वश कान्तौ” वष्टीति **उशीरम्** । सम्प्रसारण निपातनात् । अथवा उश्यते काम्यते उशीर गन्धद्रव्यम् ॥ “गमॢ गतौ” गच्छतीति **गभीरः** अगाधः ॥ **गम्भीरः** स एव ॥

॥ १७७ ॥ **अगिश्रुश्रियुवहिभ्यो निः** ॥ ३. ५० ॥

एभ्यो धातुभ्यो नि.प्रत्ययो भवति । “अक अग कुटिलायां गतौ” अगति वायुवशादूर्ध्व गच्छतीति **अग्निः** अनल ॥ “श्रु श्रवणे” श्रूयते

श्रोणिः कटिप्रदेशः ॥ "श्रीञ् सेवायाम्" श्रयतीति **श्रेणिः** पङ्क्तिः ॥ "यु मिश्रणे" यौतीति **योनिः** गुणोत्पत्तिस्थानम् ॥ "वह प्रापणे" उह्यते इति **वह्निः** दहनः ॥

॥ १७८ ॥ सृणिवेणिवृष्णिधृष्णिपार्ष्णिचूर्णयः ॥ ३. ५१ ॥

एते निप्रत्ययान्ता निपात्यन्ते । "सृ गतौ" सरतीति **सृणिः** अङ्कुशः ॥ "वि प्रजने" वेतीति **वेणिः** केशबन्धः ॥ "वृष सेचने" वर्षतीति **वृष्णिः** यादवविशेषः ॥ "ञि धृषा प्रागल्भ्ये" धृष्णोतीति **धृष्णिः** वंशविशेष [?] ॥ पृषु सेचने" पृष्यत इति **पार्ष्णिः** पादग्रन्थिः पादपश्चादवस्थानम् ॥ "चर" गत्यर्थः । चरतीति **चूर्णिः** ग्रन्थविशेष ॥

॥ १७९ ॥ पातेर्डतिः ॥ ३. ५२ ॥

अस्माड्डति प्रत्ययो भवति । "पा रक्षणे" पातीति **पतिः** स्वामी ॥

॥ १८० ॥ भूस्वदिभ्यः क्रिः ॥ ३. ५३ ॥

एभ्यः क्रिप्रत्ययो भवति । को यण्वद्भावार्थः । "भू सत्तायाम्" भवतीति **भूरिः** प्रभूतम् ॥ "षूङ् प्राणिगर्भविमोचने" सूते बुद्धिं **सूरिः** पण्डितः ॥ "अद प्सा भक्षणे" खमत्तीति **अद्रिः** पर्वतः ॥

॥ १८१ ॥ पृणातेः कुषः ॥ ३. ५४ ॥

अस्मात् कुषप्रत्ययो भवति । कोऽनुबन्धः । "पॄ पालनपूरणयोः" पृणाति पूरयति स्त्रीणामुदरं गर्भेणेति **पुरुषः** पुमान् ॥

॥ १८२ ॥ हतेरूषः ॥ ३. ५५ ॥

हन्तेर्धातोः ऊषप्रत्ययो भवति । "हन हिंसागत्योः" हन्तीति **हनूषः** राक्षसविशेषः ॥

॥ १८३ ॥ मञ्जूषादयः ॥ ३. ५६ ॥

मञ्जूषगण्डूषपीयूषाटरूषाः । एते ऊषप्रत्ययान्ता निपात्यन्ते । "मचि धारणोच्छ्रायपूजनेषु" मञ्चते **मञ्जूषा** पेटा ॥ "गडि वदनै-

कदेशे " गण्डतीति गण्डूषं कर[मुख]वारि ॥ " पीङ् पाने " पीयते इति पीयूषम् अमृतम् ॥ " ऋ गतौ " आटपूर्व. । आट इयर्तीति आटरूष. वासा ॥

॥ १८४ ॥ शकादिभ्योऽटः ॥ ३. ५७ ॥

एवमादिभ्योऽट· प्रत्ययो भवति । " शक्लृ शक्तौ " शक्नोति गन्तुमनेन **शकटः** स्यन्दनः ॥ " अव रक्ष पालने " अवतीति अवट· गर्त· ॥ " सृ गतौ " सरतीति सरट· कृकलास· ॥ " डु कृञ् करणे " करोति मद **करटः** गजकपोलः । एवमन्येऽप्यनुसर्तव्या· ॥

॥ १८५ ॥ जटामर्कटौ ॥ ३. ५८ ॥

एतावटप्रत्ययान्तौ निपात्येते । " जनी प्रादुर्भावे " केशेषु जायन्ते **जटा** केशसमूह ॥ " मृङ् प्राणत्यागे " म्रियते **मर्कटः** कपिः । अथ वा " मर्क " इति सौत्रोऽयं धातु· । मर्कतीति मर्कटः ॥

॥ १८६ ॥ वहलादिभ्य इत्रोत्रौ ॥ ३. ५९ ॥

एवमादिभ्यो यथासङ्ख्यं इत्र उत्र इत्येतौ प्रत्ययौ भवतः । " वह प्रापणे " वहतीति **वहित्रं** पोत· ॥ " रा ला दाने " लातीति **लोत्रम्** अपहृत द्रव्यम् । एवमादयोऽप्यनुसर्तव्याः ॥

॥ १८७ ॥ खर्जिकृपिमसिपिञ्जादिभ्य ऊरोलौ ॥ ३. ६० ॥

एवमादिभ्य ऊर ऊल इत्येतौ प्रत्ययौ भवतः । " खर्ज मार्जने " खर्जतीति **खर्जूरः** वृक्षविशेषः ॥ " कृपू सामर्थ्ये " कल्पते **कर्पूरः** गन्धद्रव्यम् ॥ " मसि परिमाणे " मस्यतीति **मसूरः** धान्यविशेष. ॥ " पिञ्ज " इति सौत्रोऽयं धातु. । पिञ्जतीति **पिञ्जूरः** अक्षिरोगः ॥ " लगि " गत्यर्थः । लङ्गयतीति **लाङ्गूलं** पुच्छम् । उणादित्वाल्लङ्गेर्दीर्घत्वम् । इत्यादयोऽनुसर्तव्याः ॥

॥ १८८ ॥ सर्तेर्वः ॥ ३. ६१ ॥

अस्माद्वप्रत्ययो भवति । " सृ गतौ " सरतीति **सर्वं** कृत्स्नम् ॥

॥ १८९ ॥ उल्बादयः ॥ ३. ६२ ॥

उल्बनिम्बबिम्बशुल्बाः । एते बप्रत्ययान्ता निपात्यन्ते । "ऋ गतौ" इयर्तीति उल्बं जरायुः ॥ "णीङ् प्रापणे" नयते निम्बः वृक्षः ॥ "वि प्रजने" वेतीति बिम्बं प्रतिरूपम् ॥ "शल गतौ" शलतीति शुल्बं ताम्रम् । एवमन्येऽप्यनुसर्तव्याः ॥

॥ १९० ॥ शविकमिभ्यां दः ॥ ३. ६३ ॥

आभ्यां दप्रत्ययो भवति । "शव गतौ" शवतीति शब्दः ध्वनिः ॥ "कमु कान्तौ" कमतीति कन्दः सूरणः ॥

॥ १९१ ॥ कुन्दादयः ॥ ३. ६४ ॥

कुन्दवृन्दमन्दाब्दाः । एते दप्रत्ययान्ता निपात्यन्ते । ··· ·· तीति कुन्दः पुष्पविशेषः ॥ "वृञ् वरणे" वृणोतीति वृन्दः समूहः ॥ "मन ज्ञाने" मन्यते मन्दः स्थिरगतिः ॥ "अव रक्ष पालने" अवतीति अब्दः संवत्सरः ॥

॥ १९२ ॥ पीम्यो रुः ॥ ३. ६५ ॥

अनयो रुप्रत्ययो भवति । "पीङ् पाने" पीयते पेरुः भास्करः ॥ "मीङ् हिंसायाम्" मीयते मेरुः सुरशैलः । सुपूर्वः । सुमेरुः स एव ॥

॥ १९३ ॥ जत्र्वादयः ॥ ३. ६६ ॥

जत्रुश्मश्रुशिग्रुशत्रवः । एते रुप्रत्ययान्ता निपात्यन्ते । "जनीङ् प्रादुर्भावे" जायते जत्रु ग्रीवाया अस्थि ग्रीवावयवो वा ॥ "शो तनूकरणे" श्यति श्मश्रु मुखशोभा ॥ "शीङ् निशामने" शिनोतीति शिग्रुः शोभाञ्जनः ॥ "शद्लृ शातने" शीयत इति शत्रुः वैरी । एवमन्येऽपि ॥

॥ १९४ ॥ योरागूः ॥ ३. ६७ ॥

अस्मादागूप्रत्ययो भवति । "यु मिश्रणे" यौतीति यवागूः अश्वपद्य वर्णं च ॥

इति दौर्गसिंह्या उणादिवृत्तौ

तृतीयः पादः ॥

॥ अथ चतुर्थः पादः ॥

॥ १९५ ॥ जनिमनिदसिभ्यो युः ॥ ४. १ ॥

एभ्यः युप्रत्ययो भवति । उणादित्वात् योरनादेशो न भवति । "जनी प्रादुर्भावे" जायते **जन्युः** प्राणी ॥ "मन ज्ञाने" मन्यते **मन्युः** कोपः ॥ "तसु दसु उपक्षये" दस्यति अन्यमुपक्षणोतीति **दस्युः** चोरः ॥

॥ १९६ ॥ ह्रीकृशिभ्यां कुगानुकौ ॥ ४. २ ॥

आभ्यां कुक् आनुक् इत्येतौ प्रत्ययौ भवतः यथासङ्ख्यम् । ककारो यण्वद्भावार्थः, तेनागुणत्वम् । "ह्री लज्जायाम्" जिह्रेतीति **ह्रीकुः** सलज्जः ॥ "कृश तनूकरणे" कृशतीति **कृशानुः** वह्निः ॥

॥ १९७ ॥ मन्यतेः किरत उच्च ॥ ४. ३ ॥

अस्मात् किः प्रत्ययो भवति, अत उत्वम् । "मन ज्ञाने" मन्यते **मुनिः** यतिः ॥

॥ १९८ ॥ अहिकम्प्योर्नलोपश्च ॥ ४. ४ ॥

आभ्यां कि प्रत्ययो भवति, नलोपश्च । "अहि म्लिहि गतौ" अंहते वेगेन गच्छतीति **अहिः** सर्पः ॥ "कपि चलने" कम्पते **कपिः** वानरः ॥

॥ १९९ ॥ शृवसिवपिराजिवृहनिनभिभ्य[1] इञ् ॥ ४. ५ ॥

एभ्य इञ्प्रत्ययो भवति । ञकार इज्वद्भावार्थः । "शृ सृ हिंसायाम्" शृणोतीति **शारिः** गजप्रावरणम् ॥ "वस निवासे" वसतीति **वासिः** काष्ठकुद्दाल ॥ "टु वपु" उप्यते **वापी** जलाधार ॥ "राजृ दीप्तौ" राजते इति **राजिः** श्रेणि. ॥ "वृञ् वरणे" वृणोतीति **वारि** जलम् ॥ "हन हिंसागत्योः" हन्तीति **घातिः** प्रहरणम् ॥ "णभ तुभ हिंसयाम्" नभ्यतीति **नाभिः** शरीरमध्यम् ॥

---

1. The ms reads नभेरिञ्

॥ २०० ॥ अजिजन्यतिरशिपणिभ्यः[१] ॥ ४. ६ ॥

एभ्य इञ्प्रत्ययो भवति । पृथग्योग स्पष्टार्थः । अत एव निर्देशादजेर्वी न स्यात् । "अज क्षेपणे" अज्यते लोकोऽस्मिन्निति **आजिः** ॥ "जन जनने" जजन्तीति **जनिः** माता ॥ "अत सातत्यगमने" अततीति **आतिः** गमनम् ॥ "रश" इति सौत्रोऽयं धातु. । रशतीति **राशिः** ॥ "पण व्यवहारे स्तुतौ च" पणायते व्यवहरत्यनेन **पाणिः** कर ॥

॥ २०१ ॥ वे[ञो डिः][१] ॥ ४. ७ ॥

अस्मात् डिप्रत्ययो भवति । डोऽन्त्यस्वरादिलोपार्थः । "वेञ् तन्तुसन्ताने" वयतीति **विः** पक्षी ॥

॥ २०२ ॥ नीविः ॥ ४. ८ ॥

अय डिप्रत्ययान्तो निपात्यते । निपूर्वः । "वेञ् तन्तुसन्ताने" वयतीति **नीविः** मूलबन्धनम् [मूलधनम्] ॥

॥ २०३ ॥ सख्यादयः ॥ ४. ९ ॥

सखि अश्रि प्रहि इत्यादयो डिप्रत्ययान्ता निपात्यन्ते । "ख्या प्रकथने" समानपूर्व । समा[न[१]] ख्यातीति **सखि** मित्रम् ॥ "श्रा पाके" नञ्पूर्वः । न श्रातीति **अश्रिः** अग्रभाग ॥ "ओ हाक् त्यागे" । प्रपूर्व । प्रजहातीति **प्रहिः** कूप त्यागकर्ता वा । इत्यादयोऽप्यनुसर्तव्याः ॥

॥ २०४ ॥ धृञ्वसिभ्यां क्तिः ॥ ४. १० ॥

आभ्यां क्तिप्रत्ययो भवति । ककारो यण्वद्भावार्थः । तेनागुणत्वम् । "दृञ् आदरे" द्रियते **दृतिः** चर्मप्रसेवकः ॥ "वस आच्छादने" वस्यतेऽनया **वस्तिः** पूर्वशिरा ॥

॥ २०५ ॥ वहिवस्यमिभ्योऽतिः ॥ ४. ११ ॥

एभ्योऽतिप्रत्ययो भवति । "वह प्रापणे" वहतीति **वहतिः** नौः ॥

---

१. The ms reads **पणेः**

२. The letters within brackets are omitted in the ms.

"वस निवासे" वसति लोकोऽस्यामिति **वसतिः** गृहम् ॥ "अम गतौ" अमतीति **अमतिः** काल ॥

॥ २०६ ॥ क्षिपिध्रुविलिखिलङ्घिदमिभ्यो ऋक् ॥ ४. १२ ॥

एभ्यो ऋक्प्रत्ययो भवति । "क्षिप प्रेरणे" क्षिपतीति **क्षिपकः** योद्धा ॥ "ध्रुव गतिस्थैर्ययो" ध्रुवति निश्चलीभवत्यनेन **ध्रुवकः** शङ्कु ॥ "लिख लेखने" लिखतीति **लेखकः** चित्रकर ॥ इदनुबन्धत्वान्नागम । "लघि" गत्यर्थः । लङ्घत इति **लङ्घकः** अशमी कामीत्यर्थ ॥ "दम" इति सौत्रः । दमतीति **दमकः** कर्मकारी ॥

॥ २०७ ॥ हो द्वे च ॥ ४. १३ ॥

अस्मात् ऋक्प्रत्ययो भवति । अस्य च द्वे रूपे भवतः । "ओ हाक् त्यागे" जहाति **जहकः** कमल ॥

॥ २०८ ॥ कृषेर्वृद्धिर्वा ॥ ४. १४ ॥

अस्मात् ऋक्प्रत्ययो भवति वृद्धिर्वा । "कृष विलेखने" कर्षतीति **कर्षकः** **कार्षकः** कृषीवलः । "युऋझामनाकान्ता" इति ऋक्स्थाने अकादेशो भवति ॥

॥ २०९ ॥ कृञादिभ्यो ऋः ॥ ४. १५ ॥

"डु कृञ् करणे" "सृ गतौ" "मृङ् प्राणत्यागे" "फल निष्पत्तौ" एवमादिभ्यो ऋप्रत्ययो भवति । करोति भयं **करकं** घनोपल. ॥ सरत्यनेन **सरकः** सुरापानपात्रम् ॥ म्रियतेऽनेन **मरकः** जनोपमर्ग ॥ फलतीति **फलकः** अक्षक्रीडादिः । एवमन्येऽपि ॥

॥ २१० ॥ शमेः खः ॥ ४. १६ ॥

अस्मात् खप्रत्ययो भवति । "शमु दमु उपशमने" जलं विना शाम्यतीति **शङ्खः** कम्बुः ॥

॥ २११ ॥ मुहेर्मूर्च ॥ ४. १७ ॥

अस्मात् खप्रत्ययो भवति, मूरादेशश्च । "मुह वैचित्ये" मुह्यति कार्येषु **मूर्खः** जडः ॥

॥ २१२ ॥ शिखा ॥ ४. १८ ॥

अय शब्दः खप्रत्ययान्तो निपात्यते । "शीङ् निशामने" शिनोति जनः **शिखा** चूडा ॥

॥ २१३ ॥ गमेर्गः ॥ ४. १९ ॥

अस्मात् गप्रत्ययो भवति । "गम्लृ गतौ" गम्यते पुण्यार्थिभि **गङ्गा** जाह्नवी ॥

॥ २१४ ॥ जनेर्घः ॥ ४. २० ॥

अस्मात् घप्रत्ययो भवति । "जनीङ् प्रादुर्भावे" जायतेऽनया वेगो **जङ्घा** प्राण्यङ्गविशेषः ॥

॥ २१५ ॥ कचेः छः ॥ ४. २१ ॥

अस्मात् छप्रत्ययो भवति । "कच बन्धने" कचते बध्नाति जलम्, जलेन कच्यते वा **कच्छः** नदीपार्श्वः ॥

॥ २१६ ॥ कृतॄकृपिभ्यः कीटः ॥ ४. २२ ॥

एभ्य· कीटप्रत्ययो भवति । "कॄ विक्षेपे" शिरसि कीर्यते क्षिप्यते **किरीटः** मकुट ॥ "तॄ प्लवनतरणयाः" तरतीति **तिरीटं** वेष्टनम् ॥ "कृपू सामर्थ्ये" कल्पत इति **कृपीटः** कर्पूरकुटी जलं वा ॥

॥ २१७ ॥ शमेर्डः ॥ ४. २३ ॥

अस्मात् ड· प्रत्ययो भवति । "शमु दमु उपशमे" शाम्यतीति **शण्डः** महिषः चोरो वा ॥

॥ २१८ ॥ सूचेः स्मः ॥ ४. २४ ॥

अस्मात् स्म· प्रत्ययो भवति । "सूच पैशुन्ये" सूचयतीति **सूक्ष्मं** परमाणुमात्रम् ॥

॥ २१९ ॥ अदि भुवो डुतः ॥ ४. २५ ॥

अद्युपपदे अस्मात् डुतप्रत्ययो भवति । "भू सत्तायाम्" । **अदपूर्व**. अद्विस्मित भवत्यत्र **अद्भुतम्** आश्चर्यम् ॥

"बन्ध बन्धने" बध्यते इति वन्ध्या निष्फला ॥ "ज्या वयोहानौ" जिनातीति जाया । "जनी प्रादुर्भावे" सुखाय जायते आत्मा अत्र जाया पत्नी ॥

॥ २२५ ॥ रुचिभुजिभ्यां किष्यः ॥ ४. ३१ ॥

आभ्यां किष्यप्रत्ययो भवति । ककारो यण्वद्भावार्थ । तेनागुणत्वम् । "रुच दीप्तौ" रोचते इति **रुचिष्यः** प्रिय ॥ "भुज पालने" स्वाम्युच्छिष्टं भुङ्क्ते **भुजिष्यः** दास ॥

॥ २२६ ॥ मदेः स्यः ॥ ४. ३२ ॥

अस्मात् स्यप्रत्ययो भवति । "मदि हर्षे" माद्यति हृष्यति नवोदकेन **मत्स्यः** मीन ॥

॥ २२७ ॥ मद्यसिवसि[वासि]भ्यः सरः ॥ ४. ३३ ॥

एभ्य सरप्रत्ययो भवति । "मदि हर्षे" माद्यतीति **मत्सरः** पैशुन्यम् ॥ "अश भोजने" अश्नातीति **अक्षरं** वर्ण ॥ "वस आच्छादने" वसन्ति ऋतवोऽत्र **वत्सरः** वर्ष । संपूर्व सवत्सर स एव ॥ "वास उपसेवायाम्" चौरादित्वादिन् । वासयतीति **वासरः** दिवस. ॥

॥ २२८ ॥ शृणातेः करः ॥ ४. ३४. ॥

अस्मात् करप्रत्ययो भवति । "शृ हिसायाम्" शृणाति पित्तमिति **शर्करा** मत्स्यण्डी गुडविकारः ॥

॥ २२९ ॥ पुषो यण्वत् ॥ ४. ३५ ॥

अस्मात् करप्रत्ययो भवति । स च यण्वत् । ["पुष पुष्टौ"][1] **पुष्यति** शोभामिति **पुष्करं** पद्मम् । लत्वम् । पुष्कलं भूरि ॥

॥ २३० ॥ स्तृणातेष्टत् ॥ ४. ३६ ॥

अस्मात् टत्प्रत्ययो भवति । अकारमात्रः । "रमृवर्ण" । अथवा ढट् ।

---

1. The words within brackets are not found in the ms

" डानुबन्धेऽन्त्यस्वरादेर्लोप." । डकारो नदाद्यर्थं । रकारमात्र एव । " स्तृञ् आच्छादने " स्तृणाति आच्छादयति लज्जया आत्मान इति स्त्री महिला ॥

॥ २३१ ॥ कठिचकिभ्यामोरः ॥ ४. ३७ ॥

आभ्यामोरप्रत्ययो भवति । " कठ कृच्छ्रजीवने " कठति कृच्छ्रेण [जीवति] **कठोरः** कर्कश. ॥ " चक तृप्तौ " चकतीति **चकोरः** पक्षिविशेष ॥

॥ २३२ ॥ घुणेर्डोरः ॥ ४. ३८ ॥

अस्मात् डोरप्रत्ययो भवति । " डानुबन्[धेऽन्त्यस्वरादे]र्लोप "[1] । " घुण घूर्ण भ्रमणे " घोणते **घोरं** रौद्रम् ॥

॥ २३३ ॥ सर्वधातुभ्यः ष्ट्रन् ॥ ४. ३९ ॥

सर्वेभ्यो धातुभ्यो यथासभवं ष्ट्रन्प्रत्ययो भवति । षकारो नदाद्यर्थ. । निमित्ताभावादृकारः । नकार उच्चारणार्थं । " भस भर्त्सनदीप्त्यो " बभस्तीति भस्त्री कांसादिधमनिः चर्ममयी । अस्य नदादित्वमाकृतिगणत्वात् ॥ " धेट् पा पाने" पीयतेऽत्र पात्र पात्री वा ॥ " मा माने " मातीति मात्रा उपकरणं स्तोकं वा ॥ " अम रोगे " अमतीति अमत्रम् अन्तर्नाडी गुणश्च ॥ " वि प्रजनादिषु " वेतीति वेत्र विटपविशेष. ॥ " वश कान्तौ " वष्टीति उष्ट्रः करभः । अस्य ष्ट्रन्नन्तस्य संप्रसारण निपातनात् षत्व च ॥

॥ २३४ ॥ चिमिदिभ्यां त्रक् ॥ ४. ४० ॥

आभ्या त्रक्प्रत्ययो भवति । ककारो यण्वद्भावार्थः । तेनागुणत्वम् । " चिञ् चयने " चिनोतीति **चित्रं** लेख्यम् आश्चर्यं वा ॥ " ञि मिदा स्नेहने " मिनोति स्नेहयुक्तो भवति इति **मित्रम्** । " अघोषेष्वशिटा प्रथम· " । सुहृत् ॥

॥ २३५ ॥ पूञो ह्रस्वश्च ॥ ४. ४१ ॥

अस्मात् त्रक्प्रत्ययो भवति । धातो. ह्रस्वश्च । कोऽगुणार्थः । [" पूञ पवने "] पुनातीति **पुत्रः** ॥

---

1. The words within brackets are omitted in the Ms.

॥ २३६ ॥ सिर्मनन्तश्च ॥ ४. ४२ ॥

“पूञ् पवने” अस्मात् सिप्रत्ययो भवति। अस्य च मन् अन्तश्च। चकारात् ह्रस्वत्व च। इकार उच्चारणार्थ। पुनातीति पुमान् पुरुष ॥

॥ २३७ ॥ कुटेर्मलः ॥ ४. ४३ ॥

अस्मान्मलप्रत्ययो भवति। कुटादित्वात् अगुणत्वम्। “कुट कौटिल्ये” कुटति पानीयं कुटिल भवति इति कुड्मलम्। निपातनात् टस्य डत्वम्। ईषद्विकसितम् ॥

॥ २३८ ॥ व्रश्चेः सक् ॥ ४. ४४ ॥

अस्मात् सक्प्रत्ययो भवति। ककारो यण्वद्भावार्थ। तेन “ग्रहिज्या” इत्यादिना संप्रसारणम्। “व्रश्चू छेदने” व्रश्चत्यातपं वृक्षः पादप ॥

॥ २३९ ॥ स्रुवः चिक् ॥ ४. ४५ ॥

अस्मात् चिक्प्रत्ययो भवति। इकारोऽनुबन्धः। कोऽगुणार्थ। “स्रु गतौ” स्रवतीति स्रुक् यज्ञोपकरणम् ॥

॥ २४० ॥ चतेर्वारः ॥ ४. ४६ ॥

अस्माद्वारप्रत्ययो भवति। अकार उच्चारणार्थः। “चते चदी याचने” चतन्ति चतेते चत्वारः चतुस्सङ्ख्या ॥

॥ २४१ ॥ गमेरिनिः ॥ ४. ४७ ॥

अस्मादिनिप्रत्ययो भवति। “गमॢ गतौ” गमिष्यतीति गमी गन्ता ॥

॥ २४२ ॥ आङि णिनिः ॥ ४—४८ ॥

आङि उपपदे गमेरेव णिनिः प्रत्ययो भवति। णकार इज्वद्भावार्थ.। इकार उच्चारणार्थ। “गमॢ गतौ” आङ्पूर्वः। आगमिष्यतीति आगामी आगन्तुः ॥

॥ २४३ ॥ भूस्थाभ्यां णिनिः ॥ ४—४९ ॥

आभ्यां णिनिप्रत्ययो भवति । णकार इज्वद्भावार्थः । भाव् इश्च । "भू सत्तायाम्" भविष्यतीति भावी भविष्यन् ॥ "ष्ठा गतिनिवृत्तौ" स्थास्यतीति **स्थायी** स्थास्यन् ॥

॥ २४४ ॥ परमेष्ठी ॥ ४—५० ॥

अयं णिनिप्रत्ययान्तो निपात्यते । "ष्ठा गतिनिवृत्तौ" परमपूर्वः । सप्तम्या अलुक् । परमे पदे तिष्ठतीति **परमेष्ठी** ब्रह्मा ॥

॥ २४५ ॥ भृवमिकुभ्यः शक् ॥ ४—५१ ॥

एभ्यः शक्प्रत्ययो भवति । ककार पूर्ववत् । "डु भृञ्" बिभर्तीति **भृशम्** अत्यर्थम् ॥ "टु वमु उद्गिरणे" वमति शब्दमिति **वंशः** वेणुः ॥ "कु शब्दे" कौति पवित्रतामिति **कुशः** दर्भ ॥

॥ २४६ ॥ कीनाशाङ्कुशौ ॥ ४—५२ ॥

एतौ शक्प्रत्ययान्तौ निपात्येते । "कित ज्ञाने" चेकेतीति **कीनाशः** यमः ॥ "अकि लक्षणे" इदनुबन्धत्वान्नागमः । अनुस्वारो वर्गान्तः । अङ्कतीति **अङ्कुशः** करिवारणम् ॥

॥ २४७ ॥ वृतृवदिहनिमनिकस्यशिकषेभ्यः सः ॥ ४—५३ ॥

एभ्यः सप्रत्ययो भवति । "वृञ् वरणे" वृणोति सर्वं छादयतीति **वर्षं** मधुपानम् ॥ [तर्षः सूर्यः ॥][1] "वद व्यक्तायां वाचि" मातरमभ्येत्य वदतीति **वत्सः** शकृत्करिः ॥ "हन हिंसागत्योः" बिसं हन्तीति **हंसः** । अथवा चारुगत्या हन्ति गच्छति इति हस पक्षी ॥ उणादित्वात् क्वचित् दीर्घत्वमपि दृश्यते । "मन ज्ञाने" मन्यते सभाव्यते शरीरोपचयमनेन इति **मांसं** पिशितम् ॥ "कसि गतौ" इदनुबन्धत्वान्नागम । कसतीति **कांसः** धातुविशेषः ॥ "अशू व्याप्तौ" अश्नोतीति **अक्षः** शकटैकदेशः ॥ "कष निष्कर्षे" कषतीति **कक्षा** प्रसिद्धा ॥

---

1. The words within brackets are omitted in the ms.

॥ २४८ ॥ कृञः पासः ॥ ४—५४ ॥

"डु कृञ् करणे" अस्मात् पासप्रत्ययो भवति। करोति शोभां **कर्पासः** बादरः ॥

॥ २४९ ॥ वसेः कनसिः ॥ ४—५५ ॥

अस्मात् कनसिप्रत्ययो भवति। इकार उच्चारणार्थः। ककारो यण्वत् ; तेनागुणत्वम्, सम्प्रसारणं च। "उशनस्" इत्यादिना अन्। "वश कान्तौ" वष्टि वाञ्छति दानवोदयमिति **उशना** शुक्र ॥

॥ २५० ॥ सर्वधातुभ्योऽसुन्[1] ॥ ४—५६ ॥

सर्वधातुभ्यो यथाभिधान असुन्प्रत्ययो भवति। नकारोकारौ उच्चारणार्थौ। "विध विधाने" विधति सृजति इति वेधा· स्रष्टा ॥ "इण् गतौ" एति सर्व विकारम् अय लोहम् ॥ "पीङ् पाने" पीयते पयः पानीयम् ॥ "तप धूप सन्तापे" तपतीति तपः धर्मार्जनम् ॥ "मन ज्ञाने" मन्यते बुध्यते अनेनेति मनः अन्त करणम् ॥ "चिती संज्ञाने" चेतति जन आत्मानमिति चेतः चित्तम् ॥ "रह त्यागे" रहति त्यजति ससर्गमिति रह· एकान्तम् ॥ "वि प्रजने" वेति इति वयः शरीरावस्था ॥ यथासंभवं गुणः। "अन्त्वसन्तस्य" इति दीर्घत्वम्। "डु धाञ्" पुरो धीयते पुरोधा· पुरोहितः ॥

॥ २५१ ॥ चन्द्रे मातेः ॥ ४—५७ ॥

चन्द्रे उपपदे अस्मादसुन्प्रत्ययो भवति। अगुणवद्भावादाकारलोपः। भिन्नयोग. स्पष्टार्थ एव। चन्द्र मातीति **चन्द्रमाः** चन्द्र·।

॥ २५२ ॥ अनेहसोऽप्सरसोऽङ्गिरसः ॥ ४—५८ ॥

एतेऽसुन्प्रत्ययान्ता निपात्यन्ते। "ईह चेष्टायाम्" नञ्पूर्व·। न ईहते चेष्टते **अनेहा** कालः ॥ "सृ गतौ" अप्पूर्वः। अप्सरन्तीति **अप्सरसः** देवयोषित. ॥ "गॄ निगरणे" गिरन्तीति **अङ्गिराः**। निपातनादंपूर्वः। अनुस्वारो वर्गान्तः, इरादेशश्च। मुनिविशेष. ॥

---

1. This suffix is written consistently as असन्,

॥ २५३ ॥ उषिरञ्जिशॄभ्यो यण्वत् ॥ ४—५९ ॥

एभ्योऽसुन्प्रत्ययो भवति, स च यण्वत् । तेनागुणत्वम् । अनुषङ्गलोपः । "ॠदन्तस्येरगुणे" । "उष दाहे" तनु उषति दहति इति उषाः अहर्मुखम् ॥ "रञ्ज रागे" रक्षत्यनेनेति रजः धूलि ॥ "शॄ सॄ हिंसायाम्" शीर्यते हिस्यते शिरः मूर्धा ॥

॥ २५४ ॥ यजेः शिश्च ॥ ४—६० ॥

अस्मादसुन्प्रत्ययो भवति । स च यण्वत् । जस्य शिरादेश । इकार उच्चारणार्थ. । "यज देवपूजासङ्गतिकरणदानेषु" यज्यते यशः कीर्तिः ॥

॥ २५५ ॥ उषेर्जश्च ॥ ४. ६१ ॥

अस्मादसुन्प्रत्ययो भवति । अस्य जकारोऽन्तस्य । अकार उच्चारणार्थ । "उष दाहे" उषतीति ओजः बलम् ॥

॥ २५६ ॥ वाचः सोऽन्तश्च ॥ ४. ६२ ॥

अस्मादसुन्प्रत्ययो भवति, सोऽन्तश्च । अकार उच्चारणार्थः । चवर्गस्य कि । "नामि" इत्यादिना षत्वम् । "वच परिभाषणे" वक्ति वाणीमिति वक्षः भुजमध्यम् ॥

॥ २५७ ॥ स्रुरिभ्यां तोऽन्तश्च ॥ ४. ६३ ॥

आभ्यामसुन्प्रत्ययो भवति अनयोस्तोऽन्तश्च । "षु स्रु द्रु" स्रवति जल स्रोतः प्रवाह ॥ "रि रेषणे च" रीयने स्रवते योनौ रेतः शुक्रम् ॥

॥ २५८ ॥ शीङः फोऽन्तश्च ॥ ४. ६४ ॥

अस्मादसुन्प्रत्ययो भवति, फोऽन्तश्च । अकार उच्चारणार्थ. । शीङ् स्वप्ने" शेते योनौ शेफः मेढ्रम् ॥

॥ २५९ ॥ छदेर्नश्च ॥ ४. ६५ ॥

अस्मादसुन्प्रत्ययो भवति, धातोश्छस्य नोऽन्तश्च । "छद षद्" चौरादित्वादिन् । अस्योपधाया दीर्घ. । उणादित्वात् ह्रस्वत्वम् । छादयति पापं छन्दः वेदः ॥

॥ २६० ॥ अमेर्भोऽन्तश्च ॥ ४. ६६ ॥

अस्मादसुन्प्रत्ययो भवति, भोऽन्तश्च । अकार उच्चारणार्थ । "अम रोगे" अमति स्वादुत्व गच्छति इति अम्भः पानीयम् ॥

॥ २६१ ॥ अर्तेरुश्च ॥ ४. ६७ ॥

अस्मादसुन्प्रत्ययो भवति । अस्य च उकारादेशो भवति । अर्यते गम्यते उरः वक्ष. ॥

॥ २६२ ॥ कृतेः स्नक् ॥ ४. ६८ ॥

अस्मात् स्नक्प्रत्ययो भवति । ककारो यण्वद्भावार्थः । तेनागुणत्वम् । "कृती छेदने" कृन्तति वेष्टयति व्याप्नोति इति कृत्स्न विश्वम् ॥

॥ २६३ ॥ श्लिषेरितोऽच्च ॥ ४. ६९ ॥

अस्मात् स्नक्प्रत्ययो भवति । अस्येकारस्याद्भवति । "श्लिष आलिङ्गने" श्लिष्यते श्लक्ष्णं सुन्दरम् । "षढोः कः से" निमित्ताण्णत्वं "रषृवर्णेभ्यो णम्" ॥

॥ २६४ ॥ तिजेर्दीर्घश्च ॥ ४. ७० ॥

अस्मात् स्नक्प्रत्ययो भवति । अस्य च इकारो दीर्घो भवति । "चजो. कगौ" चस्य गत्वम् । अघोषेषु कत्वम् षत्व णत्वं च । "तिजि निशाने क्षमाया च" तितिक्षते सर्वं सहते तीक्ष्णं खरम् ॥

इति श्री दौर्गसिंह्यामुणादि-

वृत्तौ चतुर्थ पादः ॥

॥ अथ पञ्चमः पादः ॥

शब्दात्मिका या त्रिजगद्बिभर्ति स्फुरद्विचित्रार्थसुधा स्रवन्ती ।
या ऋद्धिरी··हृद मुखे च सा मे वशमस्तु नित्यम् ॥

उणादिविषये प्रसिद्ध पञ्चमं पाद प्रकाशयन्नाह —

॥ २६५ ॥ अभावीशेः कुः ॥ ५. १ ॥

अभावुपपदे ईशे. कुप्रत्ययो भवति । "ईशि ऐश्वर्ये"। अभिपूर्व· । अभीष्टे तमो नाशयति अभीषुः रश्मिः ॥

॥ २६६ ॥ वौ धाञश्च ॥ ५. २ ॥

वावुपपदे दधाते कु· प्रत्ययो भवति । "डु धाञ्" विपूर्व· । विदधात्यमृतमिति विधुः चन्द्र । कोऽनुबन्धो यण्वदर्थ । तेनानुषङ्गलोपः । असार्वधातुक इति ॥

॥ २६७ ॥ दंशेः कनिः ॥ ५. ३ ॥

दशे· कनिप्रत्ययो भवति । कानुबन्धत्वादनुषङ्गलोपः । "दंश दशने" दशतीति दश सङ्ख्या ॥

।। २६८ ॥ मङ्केर्नलुगवन्तश्च ॥ ५. ४ ॥

मङ्के कनि· प्रत्ययो भवति नलुगवन्तश्च । "मघिङ् कैतवे च" इदनुबन्धत्वान्नागम । मङ्कत इति मघवा इन्द्रः ॥

॥ २६९ ॥ सहेः षष् कनेर्लुक् च ॥ ५. ५ ॥

सहेः कनि. प्रत्ययो भवति, सहे षषादेशश्च । कनेर्लुग्भवति । "षह मर्षणे" "धात्वादेः ष. स." सहत इति षट् ॥

॥ २७० ॥ बृंहेः क्मान्नच्च हात्पूर्वः ॥ ५. ६ ॥

बृंहेः क्मान्प्रत्ययो भवति । अच्च हकारात् पूर्व । "बृहि बृहि वृद्धौ"

इदनुबन्धत्वान्नागम । बृहति व्रतानि इति ब्रह्मा । अथवा बृंहति वर्धति चराचराणि भूतान्यत्र ब्रह्मा । इद ब्रह्म । अय ब्रह्मा । उभय विशेषान्निर्दिष्टः प्रकृत न बाधते इति न लुक् । ब्रह्मा धाता ।

॥ २७१ ॥ सृपिकपिललिभ्य आटक् ॥ ५. ७ ॥

एभ्य आटक्प्रत्ययो भवति । कानुबन्धोऽगुणार्थ । "सृप्ऌ गतौ" सृप्यत इति **सृपाटः** परिमाणविशेष ॥ "कपि चलने" इदनुबन्धत्वान्नागमः । निरनुषङ्गनिर्देशादेव नलोप । कम्पत इति **कपाटम्** द्वारपिधानम् ॥ "लल ईप्सायाम्" चुरादाविन् । लाल्यकरणादेव ह्रस्व । लालयतीति **ललाटं** प्रसिद्धम् । अथवा विकल्पेनन्ताशुरादय [?] । अथवा चित्रितं लभ्यते ईप्स्यते इति **ललाटम्** ॥

॥ २७२ ॥ तरतेरसुड् ॥ ५. ८ ॥

"तॄ प्लवनतरणयो." अस्मादसुड्प्रत्ययो भवति । तरतीति **तिरः** अन्तर्धानम् । "ॠदन्तस्येरगुणे" इति इर् ॥

॥ २७३ ॥ मिथिलसिभ्यां कुनः ॥ ५. ९ ॥

आभ्या कुनप्रत्ययो भवति । "मिथृ सङ्गमे च" मतान्तरेण सौत्रः । मेथति मिथते वा **मिथुनं** स्त्रीपुंसयोर्युग्मम् ॥ "लस श्लेषक्रीडनयो" लसतीति **लसुनं** कन्दविशेष

॥ २७४ ॥ वदेरान्यः प्रशंसायाम् ॥ ५. १० ॥

वदे प्रशंसायामान्यः प्रत्ययो भवति । "वद व्यक्ताया वाचि" ससदि निःशङ्कं वदतीति **वदान्यः** प्रियवाक् दानशील ॥

॥ २७५ ॥ वचेर्मिनिञ् चस्य गः ॥ ५. ११ ॥

वचेः मिनिञ्प्रत्ययो भवति । चस्य गो भवति प्रशंसाया गम्यमानायाम् । "वच परिभाषणे" वक्तीति **वाग्मी** चारुवक्ता ॥

॥ २७६ ॥ प्रीञोऽङ्गुक् ॥ ५. १२ ॥

प्रीणातेरङ्गुक्प्रत्ययो भवति । नात्र प्रशसानुवर्तते । "प्रीञ् तर्पणे" प्रीणातीति **प्रियङ्गुः** धान्यविशेषः । "स्वरादित्वात्" इत्यादिना इयादेशः ॥

॥ २७७ ॥ पञ्चेरालः ॥ ५. १३ ॥

"पचि विस्तारे"। चौरादित्वात् इन्। इदनुबन्धत्वान्नागम। पञ्चेरालप्रत्ययो भवति। पञ्चयति विस्तारयति **पञ्चालः** देशविशेष· ॥

[॥ २७८ ॥ [1]व्रियो ह्रिः दीर्घश्च ॥ ५. १४ ॥]

"व्रि वरणे" व्रियत इति **व्रीह्रिः** धान्यम् ॥

॥ २७९ ॥ आशौ शुषेः सनिक् ॥ ५. १५ ॥

"शुष शोषणे" अन्तर्भूतकारितार्थोऽयम्। आशुपूर्व·। आशावुपपदे शुषेः सनिक्प्रत्ययो भवति। आशु शोषयति रसानिति, आशु शुष्यत्यस्मादिति वा **आशुशुक्षणिः** अग्नि. ॥

॥ २८० ॥ विशेः कानः ॥ ५. १६ ॥

अस्मात् कानप्रत्ययो भवति। "विषॢ व्याप्तौ" वेवेष्टि व्याप्नोति शिर इति **विषाणम्** अङ्गं हस्तिदन्तं वा। कानुबन्धोऽगुणार्थः ॥

॥ २८१ ॥ कृपेः कणश्च ॥ ५. १७ ॥

कृपे. कणप्रत्ययो भवति। चकारात् कानश्च। "कृपू सामर्थ्ये" कल्प्यते रक्षितुमात्मानमिति **कृपणः** अदाता ॥ कल्पते शत्रून् हन्तुं **कृपाणः** खड्गः ॥

॥ २८२ ॥ गमेश्छो मलुक् च ॥ ५. १८ ॥

गमेश्छो भवति, मलुक् च। "गमॢ गतौ" गच्छतीति **गच्छः** गणविशेष. ॥

॥ २८३ ॥ कपितमिमृणिपलिकुलिकिलिभ्यः कालः ॥ ५. १९ ॥

एभ्य· कालप्रत्ययो भवति। "कपि चलने" इदनुबन्धत्वान्नागमः। कम्पत इति **कपालम्**। अगुणत्वादनुषङ्गलोपः, कपीति स्वरूपनिर्देशाद्वा ॥ "तमु काङ्क्षायाम्" ताम्यतीति **तमालः** वृक्ष· ॥ "मृणि हिसायाम्" मृणाति मृण्यते वा **मृणालं** पद्मकन्दः ॥ "पल गतौ" पलति पल्यते [[2]वा] **पलालं**

---

[1] This sūtra is missing in the ms.

[2] This word is not found in the ms.

अणुव्रीह्यादि ॥ "कुल संस्त्याने" कोलयति सस्त्यायति कर्दममिति **कुलालः** कुम्भकारः ॥ "कील बन्धने" कीलते कील्यते वा **कीलालं** रुधिरं मद्यं जलं वा मलं वा ॥

॥ २८४ ॥ सर्तेर्गोऽन्तश्च ॥ ५. २० ॥

"सृ गतौ" सर्तेः कालः प्रत्ययो भवति गोऽन्तश्च । "सृ गतौ" सरति भयादिति **सृगालः** प्रसिद्ध एव ॥

॥ २८५ ॥ पलेराशः ॥ ५. २१ ॥

"पल गतौ" अस्मादाशप्रत्ययो भवति । पलति विस्तारं **पलाशः** वृक्षविशेषः ॥

॥ २८६ ॥ तॄपनिभ्यामङ्गः ॥ ५. २२ ॥

आभ्यामङ्गप्रत्ययो भवति । "तॄ प्लवनतरणयो" तरतीति **तरङ्गः** वीचिः ॥ "पतॢ गतौ" पततीति **पतङ्गः** आदित्यः पक्षी वा ॥

॥ २८७ ॥ मृदिकरिभ्यां कवत् ॥ ५. २३ ॥

आभ्यामङ्गप्रत्ययो भवति । स च कवत् । कानुबन्धः । "मृद क्षोदे" मृद्यते **मृदङ्गः** वाद्यविशेषः ॥ ["कुर शब्दे"] कुरतीति **कुरङ्गः** हरिणः ॥

॥ २८८ ॥ रौते रुक् ॥ ५. २४ ॥

रौतेर्धातो रुक्प्रत्ययो भवति । कानुबन्धोऽगुणार्थः । "रु शब्दे" रौतीति **रुरुः** मृगविशेषः ॥

॥ २८९ ॥ उषितृषिभ्यां क्नः ॥ ५. २५ ॥

आभ्यां क्नप्रत्ययो भवति । "उष दाहे" उषतीति **उष्णः** घर्मः ॥ "ञि तृषा पिपासायाम्" तृषतीति **तृष्णा** लोभ ॥

॥ २९० ॥ पणिकितिभ्यामवक् ॥ ५. २६ ॥

आभ्यामवक्प्रत्ययो भवति । "पण व्यवहारे च" पणायते पण्यते वा **पणवः** तन्तुवायः ॥ "कित कैतवे" चेकेतीति **कितवः** द्यूतकारः ॥

[1] The words within brackets are omitted in the ms.

॥ २९१ ॥ चेरेरमः ॥ ५. २७ ॥

चेरेरमप्रत्ययो भवति । "चरिः" गत्यर्थ । चरतीति **चरमः** पाश्चात्य· ॥

॥ २९२ ॥ सिनोतेर्मोऽन्तो ह्क् ॥ ५. २८ ॥

सिनोतेर्हक्प्रत्ययो भवति, मोऽन्तश्च । "षिञ् बन्धने" सिनोति हिनस्ति जीवानिति **सिह्मः** मृगपति· । यद्यपि बन्धने तथापि हिसार्थोऽनेकार्थत्वाद्धातूनाम् इति ॥

॥ २९३ ॥ तो दीर्घश्च ॥ ५. २९ ॥

सिनोतेस्तप्रत्ययो भवति दीर्घश्च धातो । "षिञ् बन्धने" सिनोति रामं स्नेहेन **सीता** वैदेही । सिनोति कर्षण धान्येन इति सीता लाङ्गलपद्धतिर्वा ॥

॥ २९४ ॥ यसिपनिभ्यां कः ॥ ५. ३० ॥

आभ्या कप्रत्ययो भवति । "यसु प्रयत्ने" यस्यति प्रयत्नेन जपति इति **यस्कः** ऋषिः ॥ "पन" च । पनायते पन्यते वा **पङ्कः** कर्दम ॥

॥ २९५ ॥ अंहे रिः ॥ ५. ३१ ॥

अहे धातोः रिः प्रत्ययो भवति । "अहि गतौ" । इदनुबन्धत्वान्नागम· । अंहत्यनेन **अङ्घ्रिः** पादः ॥

॥ २९६ ॥ तनोतेर्डवत् ॥ ५. ३२ ॥

तनोते रिप्रत्ययो भवति । स च डवत् । डानुबन्धोऽन्त्यस्वरादिलोपार्थ. ॥ "तनु विस्तारे" सङ्ख्याविशेषं तन्वन्तीति **त्रयः** सङ्ख्या बहुवचनान्त· ॥

॥ २९७ ॥ सृणातेः पक् उर्च ॥ ५. ३३ ॥

सृणाते· धातो पक्प्रत्ययो भवति । अतश्च उरादेशश्च । "सृ हिसायाम्" सृणाति धान्यस्य तुषादीनि **सूर्पः** गृहोपकरणम् ॥

॥ २९८ ॥ कलेरङ्कः ॥ ५. ३४ ॥

कलेरङ्क प्रत्ययो भवति । "कल गतौ सङ्ख्याने च" कलयतीति **कलङ्कः** लाञ्छन दोषो वा ॥

॥ २९९ ॥ अविकम्बिभ्यामुः ॥ ५. ३५ ॥

आभ्यामुः प्रत्ययो भवति । "अवि शब्दे" "अम्ब" इति सौत्रोऽयं धातु[र्वा]। अम्ब्यते तृष्णार्तैरिति अम्बु जलम् ॥ "कम्ब" सौत्रः । कम्ब्यते वर्ण्यते **कम्बुः** शङ्ख । अथवा "कबृ वर्णे"। उणादित्वात् अस्मादेव नकारागमश्च ॥

॥ ३०० ॥ मुरेर्धनिः ॥ ५. ३६ ॥

मुरे धनिप्रत्ययो भवति । इकार उच्चारणार्थ । "मुर सञ्चूर्णने" मूर्यत इति **मूर्धा** शिर । "नामिनोर्वोः" इति दीर्घ ॥

॥ ३०१ ॥ नौतेरत्यनौ ॥ ५. ३७ ॥

नौतेरत्यनौ प्रत्ययौ भवतः । "णु स्तुतौ" नौतीति **नवतिः नव** सङ्ख्या-शब्दौ ॥

॥ ३०२ ॥ सपेस्तितातितनः ॥ ५. ३८ ॥

सपेर्धातोः तितातितन्प्रत्यया भवन्ति । "षप समवाये" सपत्यध्वान गच्छतीति **सप्तिः** अश्व ॥ **सप्ततिः सप्त** सङ्ख्याशब्दौ ॥

॥ ३०३ ॥ वित्र्योः श्यतेर्डतिडतौ नः शात्पूर्वः ॥ ५. ३९ ॥

वित्रिरित्येतयोः श्यतेः डतिडतौ प्रत्ययौ भवत । यथासङ्ख्यं शात्पूर्वो नकार. । "शो तनूकरणे"। विपूर्वः । विश्यतीति **विंशतिः** ॥ त्रिपूर्वः । त्रिश्यतीति **त्रिंशत्** । उभौ सङ्ख्याशब्दौ ॥

॥ ३०४ ॥ अशेरीतिः ॥ ५. ४० ॥

अशेरीति प्रत्ययो भवति । "अशू व्याप्तौ" अश्नुत इति **अशीतिः** सङ्ख्या ॥

1. The ms omits the word within brackets.

॥ ३०५ ॥ सहेरस्रम् ॥ ५. ४१ ॥

षहेर्धातो अस्रंप्रत्ययो भवति । "षह मर्षणे" । "धात्वादेः षः सः" । सहत इति सहस्रं सङ्ख्या ॥

॥ ३०६ ॥ शमेर्डतः ॥ ५. ४२ ॥

शमेः डतः प्रत्ययो भवति । "शम दम" शाम्यतीति शतम् । डानुबन्धः ॥

॥ ३०७ ॥ पञ्चेरनिः ॥ ५. ४३ ॥

पञ्चेरनिप्रत्ययो भवति । "पचि विस्तारे" । इदनुबन्धः । चुरादिः । पञ्चयन्ति विस्तारयन्ति सङ्ख्यामिति पञ्च ॥

॥ ३०८ ॥ अशेस्तोऽन्तश्च ॥ ५. ४४ ॥

अशेर्धातोः अनिप्रत्ययो भवति तोऽन्तश्च । "अशू व्याप्तौ" अश्नुत इति अष्टन् । "छशोश्च" इति षत्वम् । तवष उवर्गादिति उत्वम् ... नवत्यादय एते सङ्ख्याशब्दाः ॥

॥ ३०९ ॥ यजेरुसिः ॥ ५. ४५ ॥

यजेरुसिप्रत्ययो भवति । "यज देव[पूजा][1]दिषु" इज्यन्ते पितरः अनेनेति यजुः वेदः ॥

॥ ३१० ॥ मुहेरुगूर्तकौ क्षणे ॥ ५. ४६ ॥

मुहेरुक् ऊर्तक् इत्येतौ प्रत्ययौ भवत क्षणेऽभिधेये । "मुह वैचित्ये" मुह्यत इति मुहुः प्रतिक्षणः ॥ मुह्यतीति मुहूर्तं दिनपञ्चदशोऽन्तः ॥

॥ ३११ ॥ कुले टालेरिलुक् डश्च ॥ ५. ४७ ॥

कुले उपपदे टालेरिनन्तस्य डः प्रत्ययो भवति, इलुक् च । "टल ट्वल वै-[क्लैव्ये]" हेताविन् । अस्योपधाया दीर्घः । कुलपूर्वः । कुलं टालयतीति कुलटा पांशुला । स्त्रियामा ॥

---

1. The letters within brackets are omitted in the ms.

॥ ३१२ ॥ अनेः शुः ॥ ५. ४८ ॥

अनेर्धातोः शुः प्रत्ययो भवति । "अन च" अनतीति **अंशुः** रश्मिः ॥

॥ ३१३ ॥ तनित्यजियजिभ्यो डदिः ॥ ५. ४९ ॥

एभ्यो डदिप्रत्ययो भवति । इकार उच्चारणार्थ. । "तनु विस्तारे" तनोतीति **सः** ॥ "त्यज हानौ" त्यजतीति **त्यः** ॥ "यज देवपूजासङ्गति-करणदानेषु" यजतीति **यः** । तद् त्यद् यद् इत्येते त्रय शब्दा वाच्यलिङ्गाः ॥

॥ ३१४ ॥ कायतेर्डतिडिमौ ॥ ५. ५० ॥

कायतेः डतिडिमौ प्रत्ययौ भवत । "कै शब्दे" । "सन्ध्यक्षरान्ता-नामाकार" । कायतीति **कति** सङ्ख्या ॥ कायतीति **कः** । डानुबन्ध सर्वत्र ॥

॥ ३१५ ॥ इणो दमक् तदश्च ॥ ५. ५१ ॥

इणो धातोः दमक् तदश्च इत्येतौ प्रत्ययौ भवतः । कानुबन्धः । "इण् गतौ" एतीति **इदम्** ॥ एतीति **एतद्** । अत्रान्यत्र गुणः । प्रथमैकवचने तु अयं इयं इद एष. एषा एतद् स्त्रीनपुंसकेपु ॥

॥ ३१६ ॥ खण्डेर्गक् ॥ ५. ५२ ॥

खण्डेः धातोः गक्प्रत्ययो भवति । "खडि भेदे" इदनुबन्धत्वान्ना-गमः । खण्डयति भिनत्तीति **खड्गः** प्रसिद्ध. कारितलोपः । अथ वा विकल्पेन-न्तश्चुरादयः [?] । "अनिदनुबन्धानाम्" इति नञादिष्टत्वात् इदनुबन्धस्यापि नलोपः ॥

॥ ३१७ ॥ कुटिजटिभ्यां किलः ॥ ५. ५३ ॥

आभ्यां किलप्रत्ययो भवति । "कुट कौटिल्ये" कुटतीति **कुटिलः** वक्र ॥ "जट झट सघाते" जटतीति **जटिलः** जटावान् । यः केशान् जटीकरोति सोऽर्थात् जटिल उच्यते ॥

॥ ३१८ ॥ **पटेरोलः** ॥ ५. ५४ ॥

पटेरोलप्रत्ययो भवति । "अट पट" पटतीति **पटोलः** फलम् ॥

॥ ३१९ ॥ **सहेरुरिः** ॥ ५. ५५ ॥

सहेर्धातोः उरिप्रत्ययो भवति । "षह मर्षणे" सहतीति **सहुरिः** पृष्ठम् ॥

॥ ३२० ॥ **अमेर्धुः** ॥ ५. ५६ ॥

अमेर्धुः प्रत्ययो भवति । "अम द्रम गतौ" अम्यते जलार्थिभिरिति **अन्धुः** कूप ॥

॥ ३२१ ॥ **ह्रसेर्वः** ॥ ५. ५७ ॥

ह्रसेर्वप्रत्ययो भवति । "ह्रस शब्दे" ह्रसति उच्चारणकाले मन्दं शब्द करोतीति **ह्रस्वः** लघुः ॥

॥ ३२२ ॥ **किरतेरूरो रत्वम्** ॥ ५. ५८ ॥

किरतेः धातोः ऊरप्रत्ययो भवति । ऋकारस्य च रत्वम् । "कॄ विक्षेपणे" किरति दयां **क्रूरः** दुष्टः ॥

॥ ३२३ ॥ **प्रथेरमः** ॥ ५. ५९ ॥

प्रथेरमप्रत्ययो भवति । "प्रथ प्रख्याने" प्रथते प्रथ्यते वा **प्रथमः** आद्यः ॥

॥ ३२४ ॥ **स्वृभृभ्यां गः** ॥ ५. ६० ॥

आभ्यां गः प्रत्ययो भवति । "स्वृ शब्दे" स्वर्यते पुण्यार्थिभिरिति **स्वर्गः** देवलोकः ॥ "डु भृञ्" बिभर्ति लोकान् इति **भर्गः** महेश्वरः ॥

॥ ३२५ ॥ **पतेर्नीः** ॥ ५. ६१ ॥

पतेर्नीप्रत्ययो भवति । "पतॢ गतौ" पतति पाति पतिमिति **पत्नी** कलत्रम् ॥

॥ ३२६ ॥ शमिकमिभ्यां बलः ॥ ५. ६२ ॥

आभ्या बलप्रत्ययो भवति । "शमु दमु" शाम्यतेऽनेनेति **शम्बलं** पाथेयम् ॥ "कमु कान्तौ" काम्यत इति **कम्बलः** प्रसिद्धः ॥

॥ ३२७ ॥ उषिकुषिगार्तिभ्यस्थः ॥ ५. ६३ ॥

एभ्यस्थप्रत्ययो भवति । "उष दाहे" उष्यते तप्तान्नादिना सौकुमार्यादिति **ओष्ठः** दन्तवास. ॥ "कुष निष्कर्षे" कुष्यते अस्माद्धान्यमिति **कोष्ठः** धान्यस्थानम् ॥ "गै शब्दे" गायत इति **गाथा** प्राकृतरचनाविशेषः ॥ "ऋ गतौ" अर्यत इति **अर्थः**। अथवा पुण्यकृतमियर्ति इत्यर्थः द्रव्यम् ॥

॥ ३२८ ॥ माङः सः ॥ ५. ६४ ॥

माङ सप्रत्ययो भवति । "माङ् माने" मीयते घटिकादिभिः **मासः** त्रिंशदहोरात्र· ॥

॥ ३२९ ॥ मनेर्दीर्घश्च ॥ ५. ६५ ॥

मने. सप्रत्ययो भवति, दीर्घश्च । "मन ज्ञाने" मन्यते संभाव्यते शरीरोपचयमनेन इति **मांसं** पिशितम् ॥

॥ ३३० ॥ अमेः शुकः ॥ ५. ६६ ॥

अमेः शुकप्रत्ययो भवति । [" [1]अम गत्यादिषु" अमतीति **अंशुकः** वस्त्रम् ॥

॥ ३३१ ॥ हृञो म्यः ॥ ५. ६७ ॥

हृञो म्यप्रत्ययो भवति ।] "हृञ् हरणे" हरति हरते वा मनांसि चारुतया इति **हर्म्यम्**। अथवा हरति चन्द्रकलानीति हर्म्यं धवलगृहम् ॥

इति श्री दौर्गसिंह्यां उणादिवृत्तौ

पञ्चमः पाद· ॥

---

1. The words within brackets are omitted in the ms.

॥ अथ षष्ठः पादः ॥

॥ ३३२ ॥ पटिकमिमुशिकुशिभ्यः कलः ॥ ६. १ ॥

एभ्यः कल. प्रत्ययो भवति । "पट गतौ" पटतीति **पटलं** समूह-मण्डलम् ॥ "कमु कान्तौ" कम्यते भ्रमरै इति **कमलं** पद्मम् ॥ "मुश खण्डने" मुश्यते धान्यमनेनेति **मुशलं** कण्डनोपकरणम् ॥ "कुश श्लेषणे" कुश्यते पृच्छ्यते अनेनेति **कुशलं** क्षेमम् । धातूनामनेकार्थत्वात् प्रश्नेऽपि वर्तते ॥

॥ ३३३ ॥ कुटेः कीरः ॥ ६. २ ॥

कुटेः कीरः प्रत्ययो भवति । "कुट कौटिल्ये" कुटतीति **कुटीरं** गृहविशेषः ॥

॥ ३३४ ॥ तसेः करः ॥ ६. ३ ॥

तसेः करप्रत्ययो भवति । "तसु दसु उपक्षये" तस्यति परद्रव्यमिति **तस्करः** चोरः ॥

॥ ३३५ ॥ पतिवपिशूकिचक्यगिभ्यो रक् ॥ ६. ४ ॥

एभ्यो रक्प्रत्ययो भवति । "पत्लृ गतौ" पतति पत्यते वा **पत्रं** पर्णं वाहनं वा ॥ "टु वप्" वपतीति **वप्रं** प्राकारः कूटं वा ॥ "शुक गतौ" शुक्यते गम्यते कार्यार्थं दैत्यैः इति **शुक्रः** दैत्यगुरुः । शुक्रं रेतश्च ॥ "चक तृप्तौ प्रतिघाते च" चकतीति **चक्रं** प्रसिद्धम् ॥ "अगि" गत्यर्थः । अङ्गति गच्छति **अग्रं** प्रान्तं आद्यं वा ॥

॥ ३३६ ॥ दुनोतेः दीर्घश्च ॥ ६. ५ ॥

दुनोतेः रक्प्रत्ययो भवति दीर्घश्च । "टु दु उपतापे" दुनोतीति **दूरं** विप्रकृष्टम् ॥

॥ ३३७ ॥ पुलिनलिबलिमलिद्रुहिभ्यः किनः ॥ ६. ६ ॥

एभ्यः किनप्रत्ययो भवति । "पुल महत्त्वे" पोलति महत्त्वं यातीति **पुलिनं** नदीतटम् ॥ "णल गन्धे" नलतीति **नलिनं** कमलम् ॥

"बल प्राणने" बलतीति **बलिनः** बलवान् ॥ "मल धारणे" मलति मल्यते वा **मलिनः** प्रसिद्धः ॥ "द्रुह जिघांसायाम्" द्रुह्यतेऽसुरेभ्यः **द्रुहिणः** । अथ वा द्रुह्यत्यशिष्टान् इति द्रुहिणः ब्रह्मा ॥

॥ ३३८ ॥ खलेरीनश्च ॥ ६. ७ ॥

खलेरीनप्रत्ययो भवति, किनश्च । "खल चलने" खलति अश्वमिति **खलीनं खलिनं** कविकम् ।

॥ ३३९ ॥ दृणातेर्घुक् ॥ ६. ८ ॥

दृणातेर्धातोः घुप्रत्ययो भवति । कानुबन्धो यण्वत् । "दृ विदारणे" दृणाति उच्चारणकाले मुखं विदारयति इति **दीर्घः** । कृदन्तस्य "आरनमिनोर्वि" इति दीर्घः । प्राशुः ॥

॥ ३४० ॥ तमेरूलञ् बोऽन्तश्च ॥ ६. ९ ॥

तमेरूलञ्प्रत्ययो भवति, बोऽन्तश्च । "तमु काङ्क्षायाम्" तम्यते आकाङ्क्ष्यत इति **ताम्बूलं** प्रसिद्धम् ॥

॥ ३४१ ॥ मनेरुष्यः ॥ ६. १० ॥

मनेर्धातोरुष्यप्रत्ययो भवति । ["मनै ज्ञाने"] मन्यते सुखदुःखादिकमिति **मनुष्यः** मनुजः ॥

॥ ३४२ ॥ मानेरुषः ॥ ६. ११ ॥

मानेरुषप्रत्ययो भवति । "मान पूजायाम्" मानयति मान्यत इति [वा][1] **मानुषः** मानवः ॥

॥ ३४३ ॥ मृङस्त्यः ॥ ६. १२ ॥

मृङः त्यप्रत्ययो भवति । "मृङ् प्राणत्यागे" म्रियते प्राणैर्वियुज्यते इति **मर्त्यः** मनुजः प्रसिद्धः ॥

---

१ The words within brackets are omitted in the ms.

॥ ३४४ ॥ कृपेरटः ॥ ६. १३ ॥

कृपेरटप्रत्ययो भवति । "कृपू सामर्थ्ये" कल्पत इति **कर्पटम्** वस्त्रम् ॥

॥ ३४५ ॥ कॄभूभ्यां कनः ॥ ६. १४ ॥

आभ्यां कनप्रत्ययो भवति । "कॄ विक्षेपे" किरति विक्षिपत्यन्धकार-मिति **किरणः** रश्मिः ॥ "भू सत्तायाम्" भवन्ति भूतान्यस्मादिति **भुवनं** जगत् । कृदन्तस्योरस्वरादाविवर्णो वर्णोऽन्तस्येत्यादिना उङ् [?] ॥

॥ ३४६ ॥ कुटेष्टिमक् ॥ ६. १५ ॥

कुटेष्टिमक्प्रत्ययो भवति । "कुट कौटिल्ये" कुट्यत इति **कुट्टिमं** बद्धभूमिकम् ॥

॥ ३४७ ॥ कषेरायः ॥ ६. १६ ॥

कषेरायप्रत्ययो भवति । "कष हिंसायाम्" कषतीति **कषायः** रसविशेषः, सौरभ्यं वा ॥

॥ ३४८ ॥ वलिमलिगोमिभ्योऽयः ॥ ६. १७ ॥

एषामयप्रत्ययो भवति । "वल भृतौ" वल्यत इति **वलयं** हस्तक-टकम् ॥ "मल धारणे" मलति चन्दनादिगन्धमिति **मलयः** पर्वतः वाटिका च ॥ "गोम उपलेपने" गोम्यते भूरनेनेति **गोमयं** गोशकृत् ॥

॥ ३४९ ॥ शृणातेरावः ॥ ६. १८ ॥

शृणातेरावप्रत्ययो भवति । "शॄ हिंसायाम्" शीर्यते मनागापोऽनेनेति **शरावः** मृत्पात्रविशेषः ॥

॥ ३५० ॥ मडिकुडिमङ्गिभ्योऽलः ॥ ६. १९ ॥

एभ्योऽलः प्रत्ययो भवति । "मडि भूषायाम्" इदनुबन्धत्वान्नागम । मण्ड्यत इति **मण्डलं** वृत्तम् ॥ "कुडि स्नेहने" इदनुबन्धः । कुण्ड्यत इति

कुण्डलं कर्णाभरणम् ॥ "मगिः" गत्यर्थः । मङ्गति सुकृतिनमिति **मङ्गलं** भद्रम् ॥

॥ ३५१ ॥ कन्देररः ॥ ६. २० ॥

कन्देररप्रत्ययो भवति । "कदि वैक्लव्ये" इदनुबन्धत्वान्नागमः । कन्दति विक्लवो भवति अत्र नरः **कन्दरः** पाषाणरन्ध्रप्रदेशः ॥

॥ ३५२ ॥ कुलेः किशः ॥ ६. २१ ॥

कुलेः किशप्रत्ययो भवति । "कुल संस्त्याने" भयदत्वात् पर्वतानां कोलति सङ्कीकरोति इति **कुलिशं** वज्रम् ॥

॥ ३५३ ॥ पटिजटिभ्यामलिञ् ॥ ६. २२ ॥

आभ्यामलिञ्प्रत्ययो भवति । "पट गतौ" पटतीति **पाटलिः** ॥ "जट संघाते" जटति जटघने वा **जटालिः** वृक्षविशेषः । ञानुबन्ध इज्वद्भावार्थः । अस्योपधाया दीर्घः ॥

॥ ३५४ ॥ राते रिफः ॥ ६. २३ ॥

राते रिफप्रत्ययो भवति । "रा ला दाने" रातीति **रेफः** वर्णविशेषः ॥

॥ ३५५ ॥ लिशेः सक् ॥ ६. २४ ॥

लिशेः सक्प्रत्ययो भवति । "लिश श्लेषणे" लिशतीति **लिक्षा** ईषद्वपुः प्राणी । "छशोश्च" षत्वम् । "षढोः कस्सि" कत्वम् । निमित्वात् षत्वम् । स्त्रियामा ॥

॥ ३५६ ॥ ध्वनेः क्षो दीर्घश्च ॥ ६. २५ ॥

ध्वनेः क्षप्रत्ययो भवति दीर्घश्च । "ध्वन शब्दे" ध्वनतीति **ध्वाङ्क्षः** वायसः बकश्च ॥

॥ ३५७ ॥ दीधीङो ङितिः ॥ ६. २६ ॥

दीधीङो धातोः ङितिप्रत्ययो भवति । "दीधीङ् दीप्तिदेवनयोः" दीधीते दीप्यते इति **दीधितिः** रश्मिः ॥

॥ ३५८ ॥ अतेस्त्रिः ॥ ६. २७ ॥

अतेस्त्रिः प्रत्ययो भवति । "अत सातत्यगमने" अतति धर्मार्थमिति अतते वा **अत्रिः** ऋषिः ॥

॥ ३५९ ॥ वचेरालाटौ दीर्घश्च ॥ ६. २८ ॥

वचेः धातोः आलाटौ प्रत्ययौ भवतः दीर्घश्च । "वच परिभाषणे" अत्यर्थं वक्तीति **वाचालः** ॥ **वाचाटः** बहुभाषी ॥

॥ ३६० ॥ खलेरतिकः ॥ ६. २९ ॥

खलेरतिकः प्रत्ययो भवति । "खल चलने" खलतीति **खलतिकः** देशः । तद्वनानि खलतिकम् ॥

॥ ३६१ ॥ नञि पतेर्यः ॥ ६. ३० ॥

नञ्युपपदे पतेर्यो भवति । "पतृ गतौ" नयन्ति येन जातेन पूर्वजाः । नस्य तत्पुरुषे लोप्यः मामात्यविवक्षायाम् [?] । पौत्रोऽप्यपत्यमित्युच्यते । **अपत्यं** पुत्रः पौत्रश्च ॥

॥ ३६२ ॥ कलेरशः ॥ ६. ३१ ॥

कलेरशप्रत्ययो भवति । "कल गतौ सख्याने च" कलत्युदकानीति **कलशः** कुम्भः ॥

॥ ३६३ ॥ हृञष्टीतकन् ॥ ६. ३२ ॥

हरतेष्टीतकन्प्रत्ययो भवति । "हृञ् हरणे" हरति रोगानिति **हरीतकी** । टकारो नदाद्यर्थः ॥

॥ ३६४ ॥ उन्देः ककः ॥ ६. ३३ ॥

उन्देः ककप्रत्ययो भवति । "उन्दी क्लेदने" उनत्ति क्लिद्यते अनेन वस्त्विति **उदकं** जलम् ॥

॥ ३६५ ॥ पातेरकः ॥ ६. ३४ ॥

पातेरकप्रत्ययो भवति । "पतृ गतौ" हेताविन् । पातयति पत्यते वा तपस इति **पातकम्** पापम् ॥

॥ ३६६ ॥ उन्देरनो नलोपश्च ॥ ६. ३५ ॥

उन्देरनः प्रत्ययो भवति नलोपश्च। "उन्दी क्लेदने" उनत्ति **ओदनम्** भुक्तम् गुण उतः ॥

॥ ३६७ ॥ सिनोतेर्नः ॥ ६. ३६ ॥

सिनोतेः न· प्रत्ययो भवति। "षिञ् बन्धने" सिनोति परबलमिति सीयते वा **सेना** कटकम्। स्त्रियामा ॥

॥ ३६८ ॥ द्यतेरिच्च ॥ ६. ३७ ॥

द्यतेः नः प्रत्ययो भवति, अकारस्य इच्च। "दो अवखण्डने" द्यति अन्धकारमिति **दिनं** वासरः ॥

॥ ३६९ ॥ मुहेर्धिक् हस्य गः ॥ ६. ३८ ॥

मुहेर्धिक्प्रत्ययो भवति, हस्य च ग·। "मुह वैचित्ये" मुह्यतीति **मुग्धा** अप्रगल्भा। कोऽगुणार्थे ॥

॥ ३७० ॥ सचेः लिलश्च चस्य लुक् ॥ ६. ३९ ॥

सचे. लिलप्रत्ययो भवति, चस्य लुक् च। "षच सेचने" सचत इति **सलिलं** जलम् ॥

॥ ३७१ ॥ कुरेः करकः ॥ ६. ४० ॥

कुरेः धातोः करकप्रत्ययो भवति। "कुर शब्दे" कुरतीति **कुरकः** श्वा ॥

॥ ३७२ ॥ आप्नोतेः क्विप् ह्रस्वः ॥ ६. ४१ ॥

आप्नोतेः क्विप्प्रत्ययो भवति, ह्रस्वश्च। "आप्लृ व्याप्तौ" आप्नुवन्ति समुद्रमिति **आपः** जलानि। अपश्च। जसि दीर्घ. ॥

॥ ३७३ ॥ वन्देस्त्रश्छादेशश्च ॥ ६. ४२ ॥

वन्देः त्रप्रत्ययो भवति, छादेशश्च। "वदि अभिवादनस्तुत्यो." इदनुबन्धत्वान्नागम। वन्दते उपाध्यायमिति **छात्रः** विद्यार्थी ॥

॥ ३७४ ॥ **कलेरहः** ॥ ६. ४३ ॥

कलेरहप्रत्ययो भवति । "कल गतौ संख्याने च" । चुरादिः कलयत्युभयोः माहात्म्यमिति **कलहः** प्रसिद्धः ॥

॥ ३७५ ॥ **उम्भेरिक् द्विश्च** ॥ ६. ४४ ॥

उम्भेरिक्प्रत्ययो भवति द्विरादेशश्च । इकारोक्तः सविभक्तिरादेशो स्वरः [[१]] । "उभ उम्भ पूरणे" उभत इति द्वौ पदार्थौ । द्विवचनमिह ॥

॥ ३७६ ॥ **नमिसमिभ्यामञ्** ॥ ६. ४५ ॥

आभ्यामञ्प्रत्ययो भवति । "णमु प्रह्वत्वे" नमति नम्यते वा **नाम** संज्ञा ॥ "षम स्तम" समतीति **साम** वेदः । आनुबन्ध इज्वद्भावार्थः । तेन दीर्घत्वम् ॥

॥ ३७७ ॥ **कूजेरिलो जः किश्च** ॥ ६. ४६ ॥

कूजेरिलः प्रत्ययो भवति । जस्य कत्वम् । "कूज अव्यक्ते शब्दे" कूजतीति **कोकिलः** पक्षिविशेष ॥

॥ ३७८ ॥ **मयतेरूरोखौ** ॥ ६. ४७ ॥

मयते. धातोरूरोख इत्येतौ प्रत्ययौ भवतः । "मीङ् हिंसायाम्" मयत इति **मयूरः** कलापी ॥ मयते विस्तार यातीति **मयूखः** किरण. ॥

॥ ३७९ ॥ **अङ्गेरुलः** ॥ ६. ४८ ॥

अङ्गेरुलप्रत्ययो भवति । ["अगि." गत्यर्थ. । अङ्गतीति **अङ्गुलः** ॥

॥ ३८० ॥ **कनिचनिभ्यामकः** ॥ ६. ४९ ॥

आभ्यामकः प्रत्ययो भवति ।] "कनी दीप्तिकान्तिगतिषु" कनतीति **कनकं** सुवर्णम् ॥ ["चैन श्रद्धोपहननयोः"] चनत इति **चनकः** धान्यविशेषः ॥

---

१. The words within brackets are omitted in the ms

॥ ३८१ ॥ चटिवटिकटिभ्य उश्च ॥ ६. ५० ॥

एभ्य उप्रत्ययो भवति । "चट भेदे" चटति माधुर्यात् हृदयं भिनत्ति इति **चटुः** प्रियवाक्यम् ॥ "वट वेष्टने" वटति वेष्टति इति **वटुः** माणवकः ॥ "कट गतौ" कटतीति **कटुः** रसविशेषः ॥ चकारादकश्च । चटति भिनत्तीति **चटकः** गृहपक्षी ॥ **वटकः** पक्वान्नविशेष ॥ कटति भुजमावृणोतीति **कटकः** हस्ताभरणम् । कटकं सेना च ॥

॥ ३८२ ॥ अशेर्मकः ॥ ६. ५१ ॥

अशेर्मकप्रत्ययो भवति । "अशू व्याप्तौ" अश्नुते इति **अश्मकाः** देशः ॥

॥ ३८३ ॥ मङ्गेः कधः ॥ ६. ५२ ॥

मङ्गेः कधप्रत्ययो भवति । "मगि" गत्यर्थे । इदनुबन्धत्वान्नागमः । मङ्गतीति **मगधः** देशो राजा च । मगधा पुरी । कानुबन्धत्वान्नलोपः ॥

॥ ३८४ ॥ दिवेर्दिविः ॥ ६. ५३ ॥

दिवेः दिविप्रत्ययो[?] भवति । "दिवु क्रीडादिषु" दीव्यन्ति क्रीडन्ति अत्र पुण्यवन्त इति **द्यौः** स्वर्गः ॥

॥ ३८५ ॥ कलेरिङ्गः ॥ ६. ५४ ॥

कलेरिङ्ग प्रत्ययो भवति । "कल गतौ" कलतीति **कलिङ्गः** देशः ॥

॥ ३८६ ॥ वसेरिष्ठः ॥ ६. ५५ ॥

वसेरिष्ठः प्रत्ययो भवति । "वस निवासे" वसति तपसे **वसिष्ठः** ऋषिः ॥

॥ ३८७ ॥ उङो मक् ॥ ६. ५६ ॥

उङो मक्प्रत्ययो भवति । "उङ् शब्दे" उवत इति **उमा** पार्वती ॥

॥ ३८८ ॥ असिकुषिभ्यां सिक् ॥ ६. ५७ ॥

आभ्यां सिक्प्रत्ययो भवति । "अशू व्याप्तौ" अश्नुते व्याप्नोत्यासनेन घटादीनर्थानिति **अक्षि** नयनम् ॥ "कुष निष्कर्षे" कुष्णातीति **कुक्षिः** उदरैकदेश । "छशोश्च" इति षत्वम् । "षढो कस्सि" इति कत्वम् । "कष सयोगे" क्ष. ॥

॥ ३८९ ॥ अतेर्मन् दीर्घश्च ॥ ६. ५८ ॥

अतेर्मन्प्रत्ययो भवति दीर्घश्च । "अत सातत्यगमने" अतति संसारे सततं गच्छतीति **आत्मा** विश्वरूपः ॥

॥ ३९० ॥ वनिस्तस्य दः ॥ ६. ५९ ॥

अतेर्वनिप्रत्ययो भवति, तस्य दश्च । इकार उच्चारणार्थः । "अत सातत्यगमने" अतति सन्तत गच्छति जनोऽत्र **अध्वा** मार्गः ॥

॥ ३९१ ॥ धिषेर्न्यक् ॥ ६. ६० ॥

धिषेः न्यक्प्रत्ययो भवति । "धिष् शब्दे" दिधेष्टि शब्दं करोति इति **धिष्ण्यं** गृहम् । नस्य णत्वम् ॥

॥ ३९२ ॥ जलेर्मञ् ॥ ६. ६१ ॥

जलेर्मञ्प्रत्ययो भवति । "जल अपवारणे" । चुरादिः । जाल्यते **जाल्मः** मूर्खः । कारितलोपे ञानुबन्धत्वात् दीर्घ ॥

॥ ३९३ ॥ क्लिशेः कोरो ललोपश्च ॥ ६. ६२ ॥

क्लिशेः कोरप्रत्ययो भवति ललोपश्च । "क्लिशू विबाधने" क्लिश्यत इति **किशोरः** बालोऽश्वः । कानुबद्धत्वादगुणत्वम् ॥

॥ ३९४ ॥ उषेरधिः ॥ ६. ६३ ॥

उपेरधिप्रत्ययो भवति । "उष दाहे" उषतीति **ओषधिः** भेषजम् ॥

॥ ३९५ ॥ कनेरुटो मकिश्च ॥ ६. ६४. ॥

कनेरुटप्रत्ययो भवति, धातोः मकिरादेशश्च । "कनी" दीप्त्यादिषु । कनतीति **मकुटः** शेखर ॥

॥ ३९६ ॥ सुखेः को मुखिश्च ॥ ६. ६५ ॥

सुखेः कः प्रत्ययो भवति, धातोः मुखिश्च । इकार उच्चारणार्थः । "सुख दु:ख तत्क्रियायाम्" चौरादिः । सुखयति अन्नादिखादनेनेति **मुखं** वक्त्रम् । कानुबन्धः, तेनागुणत्वम् ॥

॥ ३९७ ॥ महेर्हस्य घः ॥ ६. ६६ ॥

महेः कः प्रत्ययो भवति, हस्य घत्वं च । "अर्ह मह पूजायाम्" महतीति **मघा** नक्षत्रम् ॥

॥ ३९८ ॥ मुहेर्गुणश्च ॥ ६. ६७ ॥

मुहेः कः प्रत्ययो भवति । हस्य घः । गुणत्वम् । "मुह वैचित्ये" मुह्यतीति **मोघः** विफलः ॥

॥ ३९९ ॥ सावमेरिन् दीर्घश्च ॥ ६. ६८ ॥

सावुपपदे अमेर्धातोः इन्प्रत्ययो भवति, दीर्घश्च । "अमु गतौ" सुपूर्वः । शोभनममति **स्वामी** प्रभुः । "इन्हन्पूषा" इत्यादिना सौ दीर्घः ॥

शब्दानामानन्त्यात् व्युत्पत्तिर्दृश्यते येषाम् ।
तेषां विज्ञैः कार्या मान्योर्धातोः ततः प्रत्ययान्ताम् [?] ॥

इति दौर्गसिंह्यामुणादिवृत्तौ

षष्ठः पादः समाप्तः



INDEX OF SŪTRAS

——

INDEX OF WORDS

* Words marked with asterisk are found only in the commentary.